Sanskrit-Chrestomathie / Zunächst zum Gebrauch bei Vorlesungen herausgegeben von Otto Böhtlingk.

Contributors

Böhtlingk, Otto von, 1815-1904.

Publication/Creation

St. Petersburg : Gedruckt bei der Kaiserlichen akademie der wissenschaften, zu haben bei W. Gräff's erben; [etc., etc.], 1845.

Persistent URL

https://wellcomecollection.org/works/f3bsmye2


License and attribution

This work has been identified as being free of known restrictions under copyright law, including all related and neighbouring rights and is being made available under the Creative Commons, Public Domain Mark.

You can copy, modify, distribute and perform the work, even for commercial purposes, without asking permission.

wellcome collection

Wellcome Collection
183 Euston Road
London NW1 2BE UK
T +44 (0)20 7611 8722
E library@wellcomecollection.org
https://wellcomecollection.org



Pages 33 - 48 missing

BOEHTLINGK, O.

Digitized by the Internet Archive
in 2016

https://archive.org/details/b28743635

Sanskrit-Chrestomathie.

ZUNÄCHST ZUM GEBRAUCH BEI VORLESUNGEN

HERAUSGEGEBEN

VON

OTTO BÖHTLINGK.

ST. PETERSBURG.

GEDRUCKT BEI DER KAISERLICHEN AKADEMIE DER WISSENSCHAFTEN.

1845.

Zu haben bei W. Gräff's Erben in St. Petersburg und bei Leopold Voss in Leipzig.

Auf Verfügung der Kais. Akademie der Wissenschaften. St. Petersburg, d. 8-ten April 1845.

Fuss,
beständiger Secretair.

WELLCOME LIBRARY INSTITUTE

VORWORT.

Wie gross das Bedürfniss einer Sanskrit-Chrestomathie war, beweist schon der Umstand, dass ein Mann wie Lassen sich entschliessen konnte, seine edlen Kräfte, die zum Nutzen Aller, welche ihre Studien dem alten Indien und Persien zugewandt haben, ihm noch lange erhalten werden mögen, einem Werke zu widmen, dem ein weit untergeordneteres Talent gewachsen gewesen wäre. Und wenn das Ergebniss dieser Mühen noch immer andern Wünschen Raum gab, so hatte dieses seinen Grund eben in der bedeutenden Persönlichkeit dieses Gelehrten. Was schon ein Mal bearbeitet worden war, wollte Lassen uns nicht von Neuem anbieten, und etwas bedeutendes Neues konnte er nicht geben, da dazu ein längerer Aufenthalt in London oder Paris erforderlich gewesen wäre.

In der Ueberzeugung, dass Lassen's Anthologie wegen ihres geringen Umfanges, so wie wegen des Inhalts und des Stiles einiger Stücke, nicht ganz geeignet sei, dem Anfänger ein richtiges Bild von dem Geiste und der Sprache der alten Inder zu geben, wagte ich es unter den für ein solches Unternehmen günstigsten äusseren Verhältnissen eine neue Chrestomathie zu bearbeiten, die, wenn auch nichts bisher Ungedrucktes enthaltend, doch vermöge ihres Umfanges, des hohen Alters mancher Stücke, der Mannigfaltigkeit der Stilarten und des interessanten Inhalts manchem Lehrer und Schüler willkommen sein möchte. Doch gestehe ich offen, dass ich von meinem Unternehmen abgestanden wäre, wenn ich frü-

her erfahren hätte, dass mein verehrter Lehrer selbst eine neue Ausgabe seiner Anthologie zu veranstalten beabsichtige.

Das Erscheinen des Lexicons, ohne welches die Chrestomathie ihren Zweck ganz verfehlen würde, werde ich nach Kräften zu beschleunigen suchen. Dasselbe wird sich auf die Werke der einheimischen Lexicographen und Grammatiker gründen und sich keineswegs auf die Chrestomathie beschränken. Den Umfang desselben vermag ich noch nicht genau anzugeben, aber dieses kann ich schon jetzt versprechen, dass es die neue Ausgabe des Bopp'schen Glossars an Vollständigkeit überbieten wird.

Auf das Lexicon gedenke ich eine Grammatik folgen zu lassen, die es sich zur Aufgabe stellen wird, das von den einheimischen Grammatikern uns überlieferte reiche Material vollständig zu verarbeiten, ohne jedoch dem System derselben, das in Bopp's Grammatik noch häufig genug durchschimmert, zu huldigen.

Um nun wieder auf die Chrestomathie zu kommen, so liegt der Plan, den ich dabei befolgt habe, offen am Tage. *Nala* und die beiden Episoden aus dem *Rāmājaṇa* sind in einer einfachen und leicht verständlichen Sprache abgefasst und gehören, wenn wir die *Veden* (im weitesten Sinne) ausnehmen, mit zu den ältesten Denkmälern der Sanskrit-Sprache. Der Manu ist schon bedeutend schwieriger. Die Prosa des *Hitopadeça* bildet den Uebergang zu der Kunstpoesie der spätern Zeit, dem *Amarūçataka*, Bhartṛhari und *Raghuvaṁça*. Die Geschichte des *Vidūshaka* giebt uns eine Probe vom Stile der schon in Verfall gerathenen Sprache. Die Hymnen aus dem *Ṛgveda*, die selbst einem Meister im klassischen Sanskrit Schwierigkeiten darbieten würden, sind aus diesem Grunde, wie bei Lassen, an's Ende des Werkes verlegt worden.

Ueber die einzelnen Theile des Werkes habe ich Folgendes zu bemerken:

I. *Nala.* Die mannigfachen Veränderungen, die ich bei Constituirung meines Textes mit der zweiten Auflage des *Nala* von Bopp vorgenommen habe, sind am Ende der Anmerkungen zum *Nala* gewissenhaft angegeben. Ich habe mich nicht gescheut einzelne Verse, die den Strophengang unterbrachen, so wie ganze Strophen, die Wiederholungen oder den Leser ermüdende Anhäufungen von müssigen Beiwörtern enthielten, auszuscheiden. Die 39 Verse, die zwischen der 13-ten und 14-ten Strophe des 13-ten Buches sich bei Nīlakantha und Bopp vorfinden, bringen, wie sich Jedermann leicht überzeugen kann, eine Verwirrung in den Gang der Erzählung hinein. Im Ganzen ist mein Text um 119½ Strophen oder 239 Verse kürzer als der Bopp'sche geworden. Die Varianten haben uns theils die Anmerkungen von Bopp, theils die Calcuttaer Ausgabe des *Mahābhārata* geliefert.

II. *Viçvāmitra.* III. *Daçaratha's Tod.* Bei diesen beiden Episoden habe ich mich an die Schlegel'sche Ausgabe des *Rāmājaṇa* gehalten, und in den Anmerkungen nur solche Abweichungen der Bengalischen Recension aus der Gorresio'schen Ausgabe bemerkt, welche zur Schlichtung der Streitfrage über die Priorität der beiden Recensionen einen kleinen Beitrag liefern könnten. Aus der Analyse derselben wird der Schüler gewiss Nutzen ziehen können.

IV. *Manu's Gesetze.* Hier konnte ich nur die Ausgaben von Haughton und Loiseleur Deslongchamps benutzen. Alle Erklärungen der Scholiasten, die der Letztere uns giebt, sind auch in unsere Anmerkungen übergegangen.

V. *Fabeln aus dem Hitopadeça.* Bis auf die Einleitung und 9 Fabeln, die entweder zu viel Verse enthalten oder anstössigen Inhalts sind, ist der ganze *Hitopadeça* nach der musterhaften Ausgabe von Schlegel und Lassen aufgenommen worden.

Der *Hitopadeça* besteht eigentlich aus drei Fabeln (Fabel I. im 1-ten, 2-ten und 3-ten Buche), in die eine Menge anderer eingefügt werden. In die eingefügten Fabeln werden wieder neue einge-

schachtelt. Die Folge davon ist, dass man jeden Augenblick den Faden einer angefangenen oder wieder aufgenommenen Erzählung verliert. Indem ich jene drei Fabeln fortliess, ging der eigentliche Rahmen verloren und ich entschloss mich nun, jede Fabel für sich in ununterbrochener Folge zu geben. Eine Idee von der Art und Weise, wie im *Hitopadeça* eine Fabel in die andere eingeschachtelt wird, kann sich der Schüler aus Fabel XII. XIII. und XXIV. XXV. in unserer Chrestomathie bilden. Ausser dem «Commentarius criticus in Hitopadesam» von Lassen, den wir fleissig zu Rathe gezogen haben, hat uns an ein Paar Stellen auch die 1830 zu Calcutta erschienene Ausgabe des *Hitopadeça* eine erwünschte Variante dargeboten.

VI. *Amarūçataka.* Die im Buchhandel nicht mehr vorhandene Calcuttaer Ausgabe dieses Werkes verdankt das Asiatische Museum der Kais. Akad. der Wissenschaften nebst andern seltenen Calcuttaer Drucken der Freigebigkeit der Directoren der Ostindischen Compagnie und der Vermittelung des Herrn Professor Wilson, dessen liebenswürdige Gefälligkeit nicht genug gerühmt werden kann.

VII. *Bhartṛhari.* Hier hat der Herausgeber ausser der Bohlen'schen Ausgabe noch Loiseleur Deslongchamps' «Yadjnadattabadha u. s w.,» so wie Dr. C. Schütz' «Kritische und erklärende Anmerkungen zu der von H. Pr. v. B. besorgten Ausgabe des *Chaur.* uud Bhartr.» und Stenzler's gediegene Recension in den Iahrbüchern für wissenschaftliche Kritik, Februar 1835. No. 30 und 31. benutzt. Den von uns aufgenommenen Strophen entsprechen die folgenden bei Bohlen: I. 3 (1), 7 (2), 14 (3), 55 (4), 65 (5), 73 — 75 6 — 8), 81 (9), 82 (10), 84 (11). II. 2 (12), 3 (13), 5 (14), 6 (15), 11 (16), 17 (17), 24 (18), 25 (19), 30 (20), 31 (21), 33 (22), 38 (23), 50 (24), 53 (25), 57 (26), 58 (27), 62—65 (28—31), 70 (32), 72—75 (33 - 36), 77 (37), 78 (38), 81 (39), 82 (40),

89 (41), 91 (42), 94 (43). III. 91 (44), 13 (45), 39 (46), 50 (47), 51 (48), 76 (49).

VIII. *Raghuvaṁça.* Der Text stimmt mit der Stenzler'schen Ausgabe überein, bei den Anmerkungen sind auch die Scholien der Calcuttaer Ausgabe berücksichtigt worden.

IX. *Geschichte des Vidūshaka.* Die nicht unwichtigen Varianten zu diesem aus dem *Kathāsaritsāgara, Taraṁga* XVIII. Str. 61 — 406. entlehnten Mährchen hat uns der Herausgeber jener Sammlung, dem wir schon von früher her zu Dank verpflichtet waren, auf das Bereitwilligste mitgetheilt.

X. 19 *Hymnen aus dem Ṛgveda.* Diese Hymnen bilden den 1-ten *Adhjāja* des von Rosen edirten 1-ten *Ashṭaka* des *Ṛgveda.* In Betreff der Accente hatte ich grosse Hoffnungen (vgl. Lassen in d. Z. f. d. K. d. M. Bd III. S. 480. in der Note) auf die Stevenson'sche Ausgabe gesetzt, aber wie erstaunte ich, als ich durch meinen Freund Westergaard ein Exemplar dieses in Europa so seltenen Werkes erhielt und nur eine Strophe der *Gājatrī* am Eingange des Werkes accentuirt fand.

तत्सवितुर्वरेणियं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्

Das Werk führt den Sanskrit-Titel: त्रिविद्या त्रिगुणात्मिका १ भाग, und den Englischen: «The threefold science.» Bombay: Printed at the American Mission press. M. DCCC. XXXIII. Der Text, der sich bis an's Ende des 7-ten *Anuvāka* des 1-ten *Maṇḍala* (bis Hymne XXXV bei Rosen) erstreckt, ist lithographirt und mit Auszügen aus dem Commentar des Mādhava und des Sājaṇāk'ārja (diese hören aber mit dem 1-ten Adhjāja auf), so wie mit einer Paraphrase in einem neuern Indischen Dialekte begleitet. Auf den Text folgt eine englische Uebersetzung. Stevenson mag ein sehr guter Missionär sein, wie er denn auch nicht ermangelt das Werk

mit einigen in's Sanskrit übersetzten Sprüchen aus der heiligen Schrift zu beschliessen; aber ein grosser Meister im Sanskrit ist er nicht, wie seine Ausgabe des *Sāmaveda*, so wie folgende Excerpte aus dem Scholiasten in seiner Ausgabe des *Ṛgveda* darthun möchten: II. 1. 3. *c.* उद्यची उद्यन्, III. 1. 1. *c.* नस्यतं भुज्ञाथां, III. 1. 3. *c.* रुद्रवर्तनी शत्रुरोदनकारिणां प्रूरुभटानां वर्तनीः, IV. 10. *b.* सुपारः सुष्ठु कर्मणः, V. 5. *c.* दध्याशिर दौषघातकं, VI. 2. *b.* विपत्तसा विविधे पत्तसी, VI. 5. *a.* ज्ञत्नुभिः भज्ञद्भिः, VI. 6. *a.* देवयतो मरुत्संज्ञकान्देवान्, VI. 7. *c.* वर्चसा दीप्ती, X. 2. *d.* रेज्ञति कम्पते u. s. w.

Da ich mich nun auf diese Weise in meinen Erwartungen getäuscht fand, so wandte ich mich an Herrn Professor Hoefer in Berlin. Nicht nur ich, sondern wohl auch die Leser dieses Werkes werden es dem genannten Gelehrten Dank wissen, dass er sich der Mühe unterzogen hat, die 19 Hymnen nach Rosen's Texte zu copiren und nach Ms. Chambers, No 60. mit Accenten zu versehen. Die ersten 6 Hymnen sind nochmals mit der Handschrift No 42, die nur so weit die Accente giebt, verglichen worden. Bei zwei zusammengeflossenen Vocalen hat Hoefer auch zwei *Pada*-Handschriften zu Rathe gezogen. Ich hoffe, dass man mit mir darüber einig sein wird, dass die Accente auch wesentlich zum Verständniss des Textes beitragen, und dass wir das Recht haben, an einen künftigen Herausgeber der *Veden* die Anforderung zu stellen, dass er denselben seine Aufmerksamkeit schenke. Sobald mir ein grösserer mit Accenten versehener Text zu Gebote stehen wird, werde ich es nicht unterlassen, meinen über dieselben veröffentlichten Versuch zu berichtigen und zu vervollständigen. Aber den Namen *Circumflex*, den v. Ewald in der Z. f. d. K. d. M. Bd. V. S. 441 in der Note durch «*heller Laut*» ersetzen möchte, kann ich für's Erste noch nicht aufgeben, weil die Definition des *Svarita* bei Pā-

ṇini [1]) ganz zum Griechischen Accent jenes Namens passt. Auch möchte स्वरित vielleicht nicht «hell, klar» bedeuten, sondern «mit den Accenten (d. i. mit dem Acut und dem Gravis zugleich) versehen.» In den Anmerkungen habe ich Rosen, dessen Verlust wir noch immer nicht verschmerzen können, fleissig benutzt. Eine Abschrift von Jāska's *Nighantu* und vom *Nairuktaçabda-samgraha*, die ich bisweilen citirt habe, verdanke ich der Freundschaft des Herrn Dr. Fr. Spiegel. Eine Verweisung auf Jāska's *Nirukta* dagegen, so wie auf die *Vāg'as. Samh.* und auf das *Ait. Br.* rührt immer von Rosen her. Ueber manches bisher noch Dunkle wird ein Abriss der *Veda*-Grammatik, den ich nach den von Rosen und Stevenson publicirten Texten, so wie nach dem uns von den Indischen Grammatikern überlieferten Material in Kurzem zu veröffentlichen gedenke, wie ich hoffe, einiges Licht werfen.

Was die Orthographie anbetrifft, so habe ich, wie schon zu *Nala* II. 22 *b.* bemerkt worden ist, in diesem Werke immer derjenigen Schreibart den Vorzug gegeben, die der unsprünglichen Form eines Wortes am nächsten kommt. Ich schreibe demnach रत्नस्तु und nicht रत्नःतु; am Ende eines Wortes dagegen, selbst im Compositum, setze ich den *Anusvāra* und den *Visarga*, so bald es die einheimischen Grammatiker gestatten. Statt दुःख schreibe ich aber immer दुष्ख, weil diese Orthographie sich auf die Grammatiker (Pāṇini VIII. 3. 41.), jene dagegen nur auf die Handschriften stützt. Aus dem oben angeführten Grunde schreibe ich ferner: पराग्मुख st. पराङ्मुख, तन्ने st. तन्मे, कृच्छय st. कृच्छ्र्य, निसूदन st. निषूदन, तद्धि st. तद्धि u. s. w. So habe ich auch in der Pause, so wie am Ende eines Verses den weichen Consonanten (ग, ड, द, ब) st. des harten

---

1) I. 2. 31: समाहारः स्वरितः «die Verbindung der *beiden Accente* (des Udātta mit dem Anudātta) *heisst* Svarita,» und I. 2. 32: तस्यादित उदात्तमर्धह्रस्वं «am Anfange desselben ist eine halbe Mora udātta.»

(क, ट, त, प) gebraucht, wenn die Grammatik jenen für primitiver erklärt. Ich schreibe demnach hier: वेदविद्, आनुषग् (*Rv.* XIII. 5., von सञ्ज्), तद्, एतद्, यद्, इद्, चिद् (wegen तदा, यदा, यदि, इदम्, इदानीम् u. s. w.), चेद् (च + इद्), u. s. w. Vgl. Pāṇini VIII. 4. 59. न lässt man jetzt vor ञ und ण unverändert, doch ist dieses durchaus falsch; vgl. Pāṇ. VIII. 4. 40. Colebrooke, a *Grammar* etc. S. 24. § 7 Carey, S. 24. § 1. Yates, S. 27. *Rule* IX. Die Schreibart पूर्व und गन्धर्व gründet sich auf *Amarak.* II. IV. 21. 135, 136, बृहत् und बृहस्पति auf die *Veden.* In den *Veda*-Hymnen habe ich mich mehr an die Orthographie der Handschriften gehalten, weil hier die Abschreiber bis auf die euphonischen Veränderungen beim Zusammenstossen zweier Wörter, ziemlich gewissenhaft zu Werke gegangen zu sein scheinen.

Die Gründe, aus denen ich in der Prosa am Ende eines mit einem Consonanten endigenden Satzes den *Virāma* fortlasse, sind in der Einleitung zur Ring-*Çakuntalā*, S. XIII auseinandergesetzt worden.

Wenn dieses Werk zur Verbreitung und Erleichterung der Sanskrit-Studien beiträgt, und der Lehrer aus den Anmerkungen, die mehr für ihn, als für den Schüler bestimmt sind, einigen Nutzen zieht; dann ist der Zweck des Unternehmens erreicht.

St. Petersburg, den $\frac{\text{18-ten Februar}}{\text{2-ten März}}$ 1845.

OTTO BÖHTLINGK.

॥ अथ नलोपाख्यानं ॥

बृहदश्व उवाच ।

आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवानक्षकोविदः ॥ १ ॥
अतिष्ठदनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
उपर्युपरि सर्वेषामादित्य इव तेजसा ॥ २ ॥
ब्रह्मण्यो वेदविच्छूरो निषधेषु महीपतिः ।
अन्नप्रियः सत्यवादी महानक्षौहिणीपतिः ॥ ३ ॥
ईप्सितो नरनारीणामुदारः संयतेन्द्रियः ।
रन्तिता धन्विनां श्रेष्ठः साक्षादिव मनुः स्वयं ॥ ४ ॥
तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः ।
पूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजः ॥ ५ ॥
स प्रजार्थे परं यत्नमकरोत्सुसमाहितः ।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत ॥ ६ ॥
तं स भीमः प्रजाकामस्तोषयामास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसं ॥ ७ ॥
तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान्महायशाः ॥ ८ ॥

दमयन्तीं दमं दान्तं दमनं च सुवर्चसं ।
उपपन्नान्गुणैः सर्वैर्भीमान्भीमपराक्रमान् ॥ ९ ॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥ १० ॥
अथ तां वयसि प्राप्ते दासीनां समलंकृतं ।
शतं शतं सखीनां च पर्युपासच्छचीमिव ॥ ११ ॥
तत्र स्म राजते भैमी सर्वाभरणभूषिता ।
सखीमध्ये ऽनवद्याङ्गी विद्युत्सौदामिनी यथा ॥ १२ ॥
न देवेषु न यक्षेषु तादृग्रूपवती क्वचित् ।
मानुषेष्वपि चान्येषु दृष्टपूर्वाथवा श्रुता ॥ १३ ॥
नलश्च नरशार्दूलो लोकेष्वप्रतिमो भुवि ।
कन्दर्प इव रूपेण मूर्तिमानभवत्स्वयं ॥ १४ ॥
तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥ १५ ॥
तयोरदृष्टकामो ऽभूच्छृण्वतोः सततं गुणान् ।
अन्योऽन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः ॥ १६ ॥
अशक्नुवन्नलः कामं तदा धारयितुं हृदा ।
अन्तःपुरसमीपस्थे वन आस्ते रहो गतः ॥ १७ ॥
स ददर्श ततो हंसाञ्जातरूपपरिष्कृतान् ।
वने विचरतां तेषामेकं जग्राह पक्षिणं ॥ १८ ॥
ततो ऽन्तरीक्षगो वाचं व्याजहार नलं तदा ।
हन्तव्यो ऽस्मि न ते राजन्करिष्यामि तव प्रियं ॥ १९ ॥
दमयन्तीसकाशे त्वां कथयिष्यामि नैषध ।
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित् ॥ २० ॥

एवमुक्तस्ततो हंसमुत्ससर्ज महीपतिः ।
ते तु हंसाः समुत्पत्य विदर्भानगमंस्ततः ॥ २१ ॥
विदर्भनगरीं गत्वा दमयन्त्यास्तदान्तिके ।
निपेतुस्ते गरुत्मन्तः सा ददर्श च तान्गणान् ॥ २२ ॥
सा तानद्भुतरूपान्वै दृष्ट्वा सखीगणावृता ।
कृष्टा ग्रहीतुं खगमांस्त्वरमाणोपचक्रमे ॥ २३ ॥
अथ हंसा विससृपुः सर्वतः प्रमदावने ।
एकैकशस्तदा कन्यास्तान्हंसान्समुपाद्रवन् ॥ २४ ॥
दमयन्ती तु यं हंसं समुपाधावदन्तिके ।
स मानुषीं गिरं कृत्वा दमयन्तीमथाब्रवीत् ॥ २५ ॥
दमयन्ति नलो नाम निषधेषु महीपतिः ।
अश्विनोः सदृशो रूपे न समास्तस्य मानुषाः ॥ २६ ॥
तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि ।
सफलं ते भवेज्जन्म रूपं चेदं सुमध्यमे ॥ २७ ॥
वयं हि देवगन्धर्वमानुषोरगरक्षसान् ।
दृष्टवन्तो न चास्माभिर्दृष्टपूर्वस्तथाविधः ॥ २८ ॥
त्वं चापि रत्नं नारीणां नरेषु च नलो वरः ।
विशिष्टया विशिष्टेन संगमो गुणवान्भवेत् ॥ २९ ॥
एवमुक्ता तु हंसेन दमयन्ती विशांपते ।
अब्रवीत्तत्र तं हंसं वमप्येवं नले वद ॥ ३० ॥
तथेत्युक्त्वाऽथ तां कन्यां विदर्भस्य विशांपते ।
पुनरागम्य निषधान्नले सर्वं न्यवेदयत् ॥ ३१ ॥

॥ इति नलोपाख्याने प्रथमोऽध्यायः ॥

बृहदश्व उवाच ।

दमयन्ती तु तच्छ्रुत्वा वचो हंसस्य भारत ।
ततः प्रभृति न स्वस्था नलं प्रति बभूव सा ॥ १ ॥
ततश्चिन्तापरा दीना विवर्णवदना कृशा ।
बभूव दमयन्ती तु निःश्वासपरमा तदा ॥ २ ॥
ऊर्ध्वदृष्टिर्ध्यानपरा बभूवोन्मत्तदर्शना ।
पाण्डुवर्णा क्षणेनाथ कृच्छ्रयाविष्टचेतना ॥ ३ ॥
न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ।
न नक्तं न दिवा शेते हा हेति रुदती पुनः ॥ ४ ॥
ततो विदर्भपतये दमयन्त्याः सखोत्तमः ।
न्यवेदयत्तामस्वस्थां दमयन्तीं नरेश्वरे ॥ ५ ॥
तच्छ्रुत्वा नृपतिर्भीमो दमयन्तीसखीगणात् ।
चिन्तयामास तत्कार्यं सुमहत्स्वां सुतां प्रति ॥ ६ ॥
स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनां ।
अपश्यदात्मना कार्यं दमयन्त्याः स्वयंवरं ॥ ७ ॥
स सोऽनमन्त्रयामास महीपालान्विशांपतिः ।
अनुभूयतामयं वीराः स्वयंवर इति प्रभो ॥ ८ ॥
श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरं ।
अभिजग्मुस्ततो भीमं राजानो भीमशासनात् ॥ ९ ॥
हस्त्यश्वरथघोषेण पूरयन्तो वसुंधरां ।
विचित्रमाल्याभरणैर्बलैर्दृश्यैः स्वलंकृतैः ॥ १० ॥
तेषां भीमो महाबाहुः पार्थिवानां महात्मनां ।
यथार्हमकरोत्पूजां ते ऽवसंस्तत्र पूजिताः ॥ ११ ॥

एतस्मिन्नेव काले तु सुराणामृषिसत्तमौ ।
अर्चमानौ महात्मानाविन्द्रलोकमितौ गतौ ॥ १२ ॥
नारदः पर्वतश्चैव महाप्राज्ञौ महाव्रतौ ।
देवराजस्य भवनं विविशाते सुपूजितौ ॥ १३ ॥
तावर्चयित्वा मघवा ततः कुशलमव्ययं ।
पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥ १४ ॥

नारद उवाच ।

आवयोः कुशलं देव सर्वत्र गतमीश्वर ।
लोके च मघवन्कृत्स्ने नृपाः कुशलिनो विभो ॥ १५ ॥

बृहदश्व उवाच ।

नारदस्य वचः श्रुत्वा पप्रच्छ बलवृत्रहा ।
धर्मज्ञाः पृथिवीपालास्त्यक्तजीवितयोधिनः ॥ १६ ॥
शस्त्रेण निधनं काले ये गच्छन्त्यपराङ्मुखाः ।
अयं लोको ऽक्षयस्तेषां यथैव मम कामधुग् ॥ १७ ॥
क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तानहं ।
आगच्छतो महीपालान्दयितानतिथीन्मम ॥ १८ ॥
एवमुक्तस्तु शक्रेण नारदः प्रत्यभाषत ।
शृणु मे मघवन्येन न दृश्यन्ते महीक्षितः ॥ १९ ॥
विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता ।
रूपेणा समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥ २० ॥
तस्याः स्वयंवरः शक्र भविता नचिरादिव ।
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥ २१ ॥

तां रत्नभूतां लोकस्य प्रार्थयन्तो महीक्षितः ।
काङ्क्षन्ति स्म विशेषेण बलवृत्रनिषूदन ॥ २२ ॥
एतस्मिन्कथ्यमाने तु लोकपालाश्च साग्निकाः ।
आजग्मुर्देवराजस्य समीपममरोत्तमाः ॥ २३ ॥
ततस्ते प्रशशंसुः सर्वे नारदस्य वचो महत् ।
श्रुत्वैव चाब्रुवन्हृष्टा गच्छामो वयमप्युत ॥ २४ ॥
ततः सर्वे महाराज सगणाः सहवाहनाः ।
विदर्भानभिजग्मुस्ते यतः सर्वे महीक्षितः ॥ २५ ॥
नलोऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमं ।
अभ्यगच्छद्दमयन्तीमनुव्रतः ॥ २६ ॥
अथ देवाः पथि नलं ददृशुर्भूतले स्थितं ।
साक्षादिव स्थितं मूर्त्या मन्मथं रूपसंपदा ॥ २७ ॥
तं दृष्ट्वा लोकपालास्ते भ्राजमानं यथा रविं ।
तस्थुर्विगतसंकल्पा विस्मिता रूपसंपदा ॥ २८ ॥
ततोऽन्तरिक्षे विष्टभ्य विमानानि दिवौकसः ।
अब्रुवन्नैषधं राजन्नवतीर्य नभस्तलात् ॥ २९ ॥
भो भो नैषध राजेन्द्र नल सत्यव्रतो भवान् ।
अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ॥ ३० ॥

॥ इति नलोपाख्याने द्वितीयोऽध्यायः ॥

बृहदश्व उवाच ।

तेभ्यः प्रतिश्रुत्य नलः करिष्य इति भारत ।
अथैतान्परिप्रच्छ कृताञ्जलिरुपस्थितः ॥ १ ॥

के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ।
किं च तद्वो मया कार्यं कथयध्वं यथातथं ॥ २ ॥
एवमुक्ते नैषधेन मघवानभ्यभाषत ।
अमरान्वै निबोधास्मान्दमयन्त्यर्थमागतान् ॥ ३ ॥
अहमिन्द्रो ऽयमग्निश्च तथैवायमपांपतिः ।
शरीरान्तकरो नृणां यमो ऽयमपि पार्थिव ॥ ४ ॥
त्वं वै समागतानस्मान्दमयन्त्यै निवेदय ।
लोकपाला महेन्द्राद्याः समायान्ति दिदृक्षवः ॥ ५ ॥
प्राप्तुमिच्छन्ति देवास्त्वां शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतित्वे वरयस्व ह ॥ ६ ॥
एवमुक्तः स शक्रेण नलः प्राञ्जलिरब्रवीत् ।
एकार्थमुपेतं मां न प्रेषयितुमर्हथ ॥ ७ ॥
कथं नु ज्ञातसंकल्पः स्त्रियमुत्सहते पुमान् ।
परार्थमीदृशं वक्तुं तत्क्षमन्तु महेश्वराः ॥ ८ ॥

देवा ऊचुः ।

करिष्य इति संश्रुत्य पूर्वमस्मासु नैषध ।
न करिष्यसि कस्मात्त्वं व्रज नैषध माचिरं ॥ ९ ॥

बृहदश्व उवाच ।

एवमुक्तः स देवैस्तैर्नैषधः पुनरब्रवीत् ।
सुरक्षितानि वेश्मानि प्रवेष्टुं कथमुत्सहे ॥ १० ॥
प्रवेक्ष्यसीति तं शक्रः पुनरेवाभ्यभाषत ।
जगाम स तथेत्युक्त्वा दमयन्त्या निवेशनं ॥ ११ ॥

ददर्श तत्र वैदर्भीं सखीगणसमावृतां ।
देदीप्यमानां वपुषा श्रिया च वरवर्णिनीं ॥ १२ ॥
अतीव सुकुमाराङ्गीं तनुमध्यां सुलोचनां ।
आन्तिपत्नीमिव प्रभां शशिनः स्वेन तेजसा ॥ १३ ॥
तस्य दृष्ट्वैव ववृधे कामस्तां चारुहासिनीं ।
सत्यं चिकीर्षमाणास्तु धारयामास हृच्छयं ॥ १४ ॥
ततस्ता नैषधं दृष्ट्वा संभ्रान्ताः परमाङ्गनाः ।
आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥ १५ ॥
प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः ।
न चैनमभ्यभाषन्त मनोभिस्त्वभ्यपूजयन् ॥ १६ ॥
अहो रूपमहो कान्तिरहो धैर्यं महात्मनः ।
को ऽयं देवो ऽथवा यक्षो गन्धर्वो वा भविष्यति ॥ १७ ॥
न तास्तं शक्नुवन्ति स्म व्याहर्तुमपि किंचन ।
तेजसा धर्षितास्तस्य लज्जावत्यो वराङ्गनाः ॥ १८ ॥
अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी ।
दमयन्ती नलं वीरमभ्यभाषत विस्मिता ॥ १९ ॥
कस्त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन ।
प्राप्तो ऽस्यमरवद्वीर ज्ञातुमिच्छामि ते ऽनघ ॥ २० ॥
कथमागमनं चेह कथं चासि न लक्षितः ।
सुरक्षितं हि मे वेश्म राज्ञा चैवोग्रशासनः ॥ २१ ॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
नलं मां विद्धि कल्याणि देवदूतमिहागतं ॥ २२ ॥
देवास्त्वां प्राप्तुमिच्छन्ति शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतिं वरय शोभने ॥ २३ ॥

तेषामेव प्रभावेन प्रविष्टो ऽस्मि लतान्वितः ।
प्रविशन्तं न मां कश्चिदपश्यद्वाप्यवारयत् ॥ २४ ॥
एतदर्थमहं भद्रे प्रेषितः सुरसत्तमैः ।
एतच्छ्रुत्वा प्रभो बुद्धिं प्रकुरुष्व यथेच्छसि ॥ २५ ॥

॥ इति नलोपाख्याने तृतीयो ऽध्यायः ॥

बृहदश्व उवाच ।

सा नमस्कृत्य देवेभ्यः प्रहस्य नलमब्रवीत् ।
प्रणयस्व यथाश्रद्धं राजन्किं करवाणि ते ॥ १ ॥
अहं चैव हि यच्चान्यन्नमास्ति वस्तु किंचन ।
तत्सर्वं तव विश्रब्धं कुरु प्रणयनीश्वर ॥ २ ॥
हंसानां वचनं यत्तु तन्मां दहति पार्थिव ।
तत्कृते हि मया वीर राजानः संनिपातिताः ॥ ३ ॥
यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद ।
विषमग्निं जलं रज्जुमास्थास्ये तव कारणात् ॥ ४ ॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
तिष्ठत्सु लोकपालेषु कथं मानुषमिच्छसि ॥ ५ ॥
येषामहं लोककृतामीश्वराणां महात्मनां ।
न पादरजसा तुल्यो मनस्ते तेषु वर्तताम् ॥ ६ ॥
विप्रियं ह्याचरन्मर्त्यो देवानां मृत्युमर्हति ।
त्राहि मामनवद्याङ्गि वरयस्व सुरोत्तमान् ॥ ७ ॥

विरजांसि च वासांसि दिव्याश्चित्राः स्रजस्तथा ।
भूषणानि च मुख्यानि देवान्प्राप्य तु भुङ्क्ष्व वै ॥ ८ ॥
य इमां पृथिवीं कृत्स्नां सांक्षप्य ग्रसते पुनः ।
ऊताशमीशं देवानां का तं न वरयेत्पतिं ॥ ९ ॥
यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः ।
धर्ममेवानुरुध्यन्ति का तं न वरयेत्पतिं ॥ १० ॥
धर्मात्मानं महात्मानं दैत्यदानवमर्दनं ।
महेन्द्रं सर्वदेवानां का तं न वरयेत्पतिं ॥ ११ ॥
क्रियतामविशङ्केन मनसा यदि मन्यसे ।
वरणं लोकपालानां सुकृद्वाक्यमिदं शृणु ॥ १२ ॥
नैषधेनैवमुक्ता सा दमयन्ती वचोऽब्रवीत् ।
समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा ॥ १३ ॥
देवेभ्योऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते ।
वृणे त्वामेव भर्तारं सत्यमेतद्ब्रवीमि ते ॥ १४ ॥
तामुवाच ततो राजा वेपमानां कृताञ्जलिं ।
दौत्येनागत्य कल्याणि कथं स्वार्थमिहोत्सहे ॥ १५ ॥
कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः ।
परार्थे यत्नमारभ्य कथं स्वार्थमिहोत्सहे ॥ १६ ॥
एष धर्मो यदि स्वार्थो ममापि भविता ततः ।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयतां ॥ १७ ॥
ततो वाष्पाकुलां वाचं दमयन्ती शुचिस्मिता ।
प्रत्याहरन्ती शनकैर्नलं राजानमब्रवीत् ॥ १८ ॥
उपायोऽयं मया दृष्टो निरपायो नरेश्वर ।
येन दोषो न भविता तव राजन्कथंचन ॥ १९ ॥

त्वं चैव हि नरश्रेष्ठ देवाश्चेन्द्रपुरोगमाः ।
आयान्तु सहिताः सर्वे मम यत्र स्वयंवरः ॥ २० ॥
ततो ऽहं लोकपालानां संनिधौ त्वां नरेश्वर ।
वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति ॥ २१ ॥
एवमुक्तस्तु वैदर्भ्या नलो राजा विशांपते ।
आजगाम पुनस्तत्र यत्र देवाः समागताः ॥ २२ ॥
तमपश्यंस्तथायान्तं लोकपाला महेश्वराः ।
दृष्ट्वा चैनं ततो ऽपृच्छन्वृत्तान्तं सर्वमेव तं ॥ २३ ॥
कच्चिद्दृष्टा त्वया राजन्दमयन्ती शुचिस्मिता ।
किमब्रवीच्च नः सर्वान्वद भूमिपते ऽनघ ॥ २४ ॥

नल उवाच ।

भवद्भिरुक्तमादिष्टा दमयन्त्या निवेशनं ।
प्रविष्टः सुमहाकक्षं दण्डिभिः स्थविरैर्वृतं ॥ २५ ॥
प्रविशन्तं च मां तत्र न कश्चिद्दृष्टवान्नरः ।
ऋते तां पार्थिवसुतां भवतामेव तेजसा ॥ २६ ॥
साध्यश्चास्या मया दृष्टास्तामिश्चाप्युपलक्षितः ।
विस्मिताश्चाभवन्सर्वा दृष्ट्वा मां विबुधेश्वराः ॥ २७ ॥
वर्ण्यमानेषु च मया भवत्सु रुचिराननां ।
मामेव गतसंकल्पा वृणीते सा सुरोत्तमाः ॥ २८ ॥
अब्रवीच्चैव मां बाला आयान्तु सहिताः सुराः ।
त्वया सह नरव्याघ्र मम यत्र स्वयंवरः ॥ २९ ॥
तेषामहं संनिधौ त्वां वरयिष्यामि नैषध ।
एवं तव महाबाहो दोषो न भवितेति ह ॥ ३० ॥

एतावदेव विबुधा यथावृत्तमुदाहृतं ।
मया शेषे प्रमाणं तु भवन्तस्त्रिदशेश्वराः ॥ ३१ ॥

॥ इति नलोपाख्याने चतुर्थो ऽध्यायः ॥

बृहदश्व उवाच ।

अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।
आजुह्राव महीपालान्भीमो राज्ञा स्वयंवरे ॥ १ ॥
तच्छ्रुत्वा पृथिवीपालाः सर्वे कृच्छ्रगतेरितां ।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः ॥ २ ॥
कनकस्तम्भरुचिरं तोरणेन विराजितं ।
विविशुस्ते नृपा रङ्गं महासिंहा इवाचलं ॥ ३ ॥
तत्रासनेषु विविधेष्वासीनाः पृथिवीक्षितः ।
सुरभिस्रग्धराः सर्वे प्रमृष्टमणिकुण्डलाः ॥ ४ ॥
तत्र स्म पीना दृश्यन्ते बाहवः परिघोपमाः ।
आकारवन्तः सुश्लक्ष्णाः पञ्चशीर्षा इवोरगाः ॥ ५ ॥
सुकेशान्तानि चारूणि सुनासाक्षिभ्रुवाणि च ।
मुखानि राज्ञां शोभन्ते नक्षत्राणि यथा दिवि ॥ ६ ॥
दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।
मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥ ७ ॥
तस्या गात्रेषु पतिता तेषां दृष्टिर्महात्मनां ।
तत्र तत्रैव सक्ताभूद्व चचाल च पश्यतां ॥ ८ ॥
ततः संकीर्त्यमानेषु राज्ञां नामसु भारत ।
ददर्श भैमी पुरुषान्पञ्च तुल्याकृतीनथ ॥ ९ ॥

तान्समीक्ष्य ततः सर्वान्निर्विशेषाकृतीन्स्थितान् ।
संदेहादथ वैदर्भी नाभ्यजानाद्बलं नृपं ॥ १० ॥
यं यं हि ददृशे तेषां तं तं मेने नलं नृपं ।
सा चिन्तयन्ती बुद्ध्या तर्कयामास भाविनी ॥ ११ ॥
कथं हि देवाञ्जानीयां कथं विद्यां नलं नृपं ।
. . . . . ॥ १२ ॥
एवं संचिन्तयन्ती सा वैदर्भी भृशदुःखिता ।
श्रुतानि देवलिङ्गानि तर्कयामास भारत ॥ १३ ॥
देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे ।
तानीह तिष्ठतां भूमावेकस्यापि न लक्षये ॥ १४ ॥
सा विनिश्चित्य बहुधा विचार्य च पुनः पुनः ।
शरणं प्रति देवानां प्राप्तकालममन्यत ॥ १५ ॥
वाचा च मनसा चैव नमस्कारं प्रयुज्य सा ।
देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत् ॥ १६ ॥
हंसानां वचनं श्रुत्वा यदा मे नैषधो वृतः ।
पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ॥ १७ ॥
वचसा मनसा चैव यथा नाभिचराम्यहं ।
तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे ॥ १८ ॥
यथा देवैः स मे भर्ता विहितो निषधाधिपः ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ १९ ॥
यथेदं व्रतमारब्धं नलस्याराधने मया ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ २० ॥
स्वं चैव रूपं कुर्वन्तु लोकपाला महेश्वराः ।
यथाहमभिजानीयां पुण्यश्लोकं नराधिपं ॥ २१ ॥

निशम्य दमयन्त्यास्तत्करुणं परिदेवितं ।
यथोक्तं चक्रिरे देवाः सामर्थ्यं लिङ्गधारणे ॥ २२ ॥
सापश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् ।
क्षपितस्रग्रजोहीनानस्थितानस्पृशतः क्षितिं ॥ २३ ॥
छायाद्वितीयो म्लानस्रग्रजःस्वेदसमन्वितः ।
भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः ॥ २४ ॥
सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत ।
नैषधं वरयामास भैमी धर्मेण पाण्डव ॥ २५ ॥
विलज्जमाना वस्त्रान्ते ग्रहीत्वायतलोचना ।
स्कन्धदेशे ऽसृजत्तस्य स्रजं परमशोभनां ॥ २६ ॥
वरयामास चैवैनं पतित्वे वरवर्णिनी ।
ततो हा हेति सहसा मुक्तः शब्दो नराधिपैः ॥ २७ ॥
देवैर्महर्षिभिस्तत्र साधु साधिति भारत ।
विस्मितैरीरितः शब्दः प्रशंसद्भिर्नलं नृपं ॥ २८ ॥
दमयन्तीं तु कौरव्य वीरसेनसुतो नृपः ।
आश्वासयद्वरारोहां प्रहृष्टेनान्तरात्मना ॥ २९ ॥
यद्यं भजसि कल्याणि पुमांसं देवसंनिधौ ।
तस्मान्मां विद्धि भर्तारमेवं ते वचने स्थितं ॥ ३० ॥
यावच्च मे धरिष्यन्ति प्राणा देहे शुचिस्मिते ।
तावद्वयि भविष्यामि सत्यमेतद्ब्रवीमि ते ॥ ३१ ॥
दमयन्तीं तथा वाग्भिरभिनन्द्य कृताञ्जलिः ।
. . . . . ॥ ३२ ॥
तौ परस्परतः प्रीतौ दृष्ट्वा वह्निपुरोगमान् ।
तानेव शरणं देवाञ्जग्मतुर्मनसा तदा ॥ ३३ ॥

वृते तु नैषधे भैम्या लोकपाला महौजसः ।
प्रहृष्टमनसः सर्वे नलायाष्टौ वरान्ददुः ॥ ३४ ॥
प्रत्यक्षदर्शनं यज्ञे गतिं चानुत्तमां शुभां ।
नैषधाय ददौ शक्रः प्रीयमाणः शचीपतिः ॥ ३५ ॥
अग्निरात्मभवं प्रादाद्यत्र वाञ्छति नैषधः ।
लोकानात्मप्रभांश्चैव ददौ तस्मै हुताशनः ॥ ३६ ॥
यमस्त्वन्नरसं प्रादाद्धर्मे च परमां स्थितिं ।
अपांपतिरपां भावं यत्र वाञ्छति नैषधः ॥ ३७ ॥
स्रजश्चोत्तमगन्धाढ्याः सर्वे च मिषुनं ददुः ।
वरानेवं प्रदायास्य देवास्ते त्रिदिवं गताः ॥ ३८ ॥
पार्थिवाश्चानुभूयास्य विवाहं विस्मयान्विताः ।
दमयन्त्याश्च मुदिताः प्रतिजग्मुर्यथागतं ॥ ३९ ॥
गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः ।
विवाहं कारयामास दमयन्त्या नलस्य च ॥ ४० ॥
उष्य तत्र यथाकामं नैषधो द्विपदां वरः ।
भीमेन समनुज्ञातो जगाम नगरं स्वकं ॥ ४१ ॥
अतीव मुदितो राज्ञा भ्राजमानो ऽग्निमानिव ।
अरक्षयत्प्रजा वीरो धर्मेण परिपालयन् ॥ ४२ ॥
इजे चाप्यश्वमेधेन ययातिरिव नाहुषः ।
अन्यैश्च बहुभिर्धीमान्क्रतुभिश्चाप्तदक्षिणैः ॥ ४३ ॥
पुनश्च रमणीयेषु वनेषूपवनेषु च ।
दमयन्त्या सह नलो विजहारामरोपमः ॥ ४४ ॥
जनयामास च नलो दमयन्त्यां महामनाः ।
इन्द्रसेनं सुतं चापि इन्द्रसेनां च कन्यकां ॥ ४५ ॥

एवं स यजमानश्च विक्रमैश्च नराधिपः ।
रराज वसुसंपूर्णां वसुधां वसुधाधिपः ॥ ४६ ॥

॥ इति नलोपाख्याने पञ्चमोऽध्यायः ॥

बृहदश्व उवाच ।

कृते तु नैषधे भैम्या लोकपाला महौजसः ।
यान्तो ददृशुरायान्तं द्वापरं कलिना सह ॥ १ ॥
अथाब्रवीत्कलिं शक्रः संप्रेक्ष्य बलवृत्रहा ।
द्वापरेण सहायेन कले ब्रूहि क्व यास्यसि ॥ २ ॥
ततोऽब्रवीत्कलिः शक्रं दमयन्त्याः स्वयंवरं ।
गत्वा हि वरयिष्ये तां मनो हि मम तां गतं ॥ ३ ॥
तमब्रवीत्प्रहस्येन्द्रो निवृत्तः स स्वयंवरः ।
वृतस्तया नलो राजा पतिरस्मत्समीपतः ॥ ४ ॥
एवमुक्तस्तु शक्रेण कलिः क्रोधसमन्वितः ।
देवानामब्रवीत्तान्सर्वानुवाचेदं वचस्तदा ॥ ५ ॥
देवानां मानुषं मध्ये यत्सा पतिमविन्दत ।
तत्र तस्या भवेद्व्यायं विपुलं दण्डधारणं ॥ ६ ॥
एवमुक्ते तु कलिना प्रत्यूचुस्ते दिवौकसः ।
अस्माभिः समनुज्ञाते दमयन्त्या नलो वृतः ॥ ७ ॥
का च सर्वगुणोपेतं नाभ्रयेत नलं नृपं ।
यो वेद धर्मानखिलान्यथावच्चरितव्रतः ॥ ८ ॥
यो ऽधीते चतुरो वेदान्सर्वानाख्यानपञ्चमान् ।
नित्यं तृप्ता गृहे यस्य देवा यज्ञेषु धर्मतः ॥ ९ ॥

यस्मिन्दाक्ष्यं धृतिर्दानं तपः शौचं दमः शमः ।
ध्रुवाणि पुरुषव्याघ्रे लोकपालसमे नृपे ॥ १० ॥
एवंरूपं नलं यो वै कामयेच्चापितुं कले ।
आत्मानं स शपेन्मूढो हन्यादात्मानमात्मना ॥ ११ ॥
एवंगुणं नलं यो वै कामयेच्चापितुं कले ।
कृच्छ्रे स नरके मज्जेदगाधे विपुले ह्रदे ॥ १२ ॥
ततो गतेषु देवेषु कलिर्द्वापरमब्रवीत् ।
संहर्तुं नोत्सहे कोपं नले वत्स्यामि द्वापर ॥ १३ ॥
भ्रंशयिष्यामि तं राज्याद्व भैम्या सह रंस्यते ।
वनप्यन्तान्समाविश्य साहाय्यं कर्तुमर्हसि ॥ १४ ॥

॥ इति नलोपाख्याने षष्ठो ऽध्यायः ॥

बृहदश्व उवाच ।

एवं स समयं कृत्वा द्वापरेण कलिः सह ।
आजगाम ततस्तत्र यत्र राजा स नैषधः ॥ १ ॥
स नित्यमन्तरप्रेप्सुर्निषधेष्ववसच्चिरं ।
अथास्य द्वादशे वर्षे ददर्श कलिरन्तरं ॥ २ ॥
कृत्वा मूत्रमुपस्पृश्य संध्यां सो ऽस्ते स्म नैषधः ।
अकृत्वा पादयोः शौचं तत्रैनं कलिराविशत् ॥ ३ ॥
स समाविश्य च नलं समीपं पुष्करस्य च ।
गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै ॥ ४ ॥

अक्षद्यूते नलं जेता भवान्हि सकितो मया ।
निषधान्प्रतिपद्यस्व जित्वा राज्यं नलं नृपं ॥ ५ ॥
एवमुक्तस्तु कलिना पुष्करो नलमभ्ययात् ।
कलिश्चैव वृषो भूत्वा गवां पुष्करमभ्यगात् ॥ ६ ॥
आसाद्य तु नलं वीरं पुष्करः परवीरहा ।
दीव्यावेत्यब्रवीद्धाता वृषेणेति मुहुर्मुहुः ॥ ७ ॥
न चक्षमे ततो राज्ञा समाह्वानं महामनाः ।
वैदर्भ्याः प्रेक्षमाणायाः पणकालमनन्यत ॥ ८ ॥
तमक्षमदसंमत्तं सुहृदो न तु कश्चन ।
निवारणे ऽभवञ्जेतो दीव्यमानमरिंदमं ॥ ९ ॥
ततः पौरजनाः सर्वे मन्त्रिभिः सह भारत ।
राजानं द्रष्टुमागच्छन्निवारयितुमातुरं ॥ १० ॥
ततः सूत उपागम्य दमयन्त्यै न्यवेदयत् ।
एष पौरजनो देवि द्वारि तिष्ठति कार्यवान् ॥ ११ ॥
निवेद्यतां नैषधाय सर्वाः प्रकृतयः स्थिताः ।
अमृष्यमाणा व्यसनं राज्ञो धर्मार्थदर्शिनः ॥ १२ ॥
ततः सा वाष्पकलया वाचा दुष्प्रेक्षया कर्षिता ।
उवाच नैषधं भैमी शोकोपहतचेतना ॥ १३ ॥
राजन्पौरजनो द्वारि त्वां दिदृक्षुरवास्थितः ।
मन्त्रिभिः सहितः सर्वैः राजभक्तिपुरस्कृतः ॥ १४ ॥
तां तथा रुचिरापाङ्गीं विलपन्तीं तथाविधं ।
आविष्टः कलिना राजा नाभ्यभाषत किंचन ॥ १५ ॥
ततस्ते मन्त्रिणः सर्वे ते चैव पुरवासिनः ।
नायमस्तीति दुष्प्रेक्षा व्रीडिता जग्मुरालयान् ॥ १६ ॥

तदा तद्भवद्द्यूतं पुष्करस्य नलस्य च ।
युधिष्ठिर बहून्मासान्पुण्यश्लोकस्त्वजीयत ॥ १७ ॥

॥ इति नलोपाख्याने सप्तमो ऽध्यायः ॥

बृहदश्व उवाच ।

दमयन्ती ततो दृष्ट्वा पुण्यश्लोकं नराधिपं ।
उन्मत्तवदनुन्मत्ता देवने गतचेतसं ॥ १ ॥
भयशोकसमाविष्टा राजन्भीमसुता ततः ।
चिन्तयामास तत्कार्यं सुमहत्पार्थिवं प्रति ॥ २ ॥
सा शङ्कमाना तत्पापं चिकीर्षन्ती च तत्प्रियं ।
नलं च हृतसर्वस्वमुपलभ्येदमब्रवीत् ॥ ३ ॥
बृहत्सेनामतियशां तां धात्रीं परिचारिकां ।
हितां सर्वार्थकुशलामनुरक्तां सुभाषितां ॥ ४ ॥
बृहत्सेने व्रजामात्यानानाय्य नलशासनात् ।
आचक्ष्व यद्धृतं द्रव्यमवशिष्टं च यद्वसु ॥ ५ ॥
ततस्ते मन्त्रिणः सर्वे विज्ञाय नलशासनं ।
अपि नो भागधेयं स्यादित्युक्ता नलमाव्रजन् ॥ ६ ॥
तास्तु सर्वाः प्रकृतयो द्वितीयं समुपस्थिताः ।
न्यवेदयद्भीमसुता न स तत्प्रत्यनन्दत ॥ ७ ॥
वाक्यमप्रतिनन्दन्तं भर्तारमभिवीक्ष्य सा ।
दमयन्ती पुनर्वेश्म व्रीडिता प्रविवेश ह ॥ ८ ॥
निशम्य सततं चान्नान्पुण्यश्लोकपराङ्मुखान् ।
नलं च हृतसर्वस्वं धात्रीं पुनरुवाच ह ॥ ९ ॥

*

बृहत्सेने पुनर्गच्छ वार्ष्णेयं नलशासनात् ।
सूतमानय कल्याणि महत्कार्यमुपस्थितं ॥ १० ॥
बृहत्सेना तु तच्छ्रुत्वा दमयन्त्याः प्रभाषितं ।
वार्ष्णेयमानयामास पुरुषैराप्तकारिभिः ॥ ११ ॥
वार्ष्णेयं तु ततो भैमी शात्वयञ्श्लक्ष्णया गिरा ।
उवाच देशकालज्ञा प्राप्तकालमनिन्दिता ॥ १२ ॥
ज्ञानीषे त्वं यथा राज्ञा सम्यग्वृत्तः सदा त्वयि ।
तस्य त्वं विषमस्थस्य साहाय्यं कर्तुमर्हसि ॥ १३ ॥
यथा यथा हि नृपतिः पुष्करेणैव ज्ञीयते ।
तथा तथास्य वै द्यूते भूयो रागो ऽभिवर्धते ॥ १४ ॥
यथा च पुष्करस्याज्ञाः पतन्ति वशवर्तिनः ।
तथा विपर्ययश्चापि नलस्याज्ञेषु दृश्यते ॥ १५ ॥
सुहृत्स्वज्ञनवाक्यानि यथावद्व प्रणोति च ।
ममापि च तथा वाक्यं नाभिनन्दति मोक्षितः ॥ १६ ॥
नूनं मन्ये न दोषो ऽस्ति नैषधस्य महात्मनः ।
यत्र मे वचनं राज्ञा नाभिनन्दति मोक्षितः ॥ १७ ॥
शरणं त्वां प्रपन्नास्मि सारथे कुरु मद्वचः ।
न हि मे प्रुध्यते भावः कदाचिद्विनशेदपि ॥ १८ ॥
नलस्य दयितानश्वान्योज्ञयित्वा मनोज्ञवान् ।
इदमारोप्य मिथुनं कुण्डिनं यातुमर्हसि ॥ १९ ॥
मम ज्ञातिषु निक्षिप्य दारकौ स्यन्दनं तथा ।
अश्वांश्चेमान्यथाकामं वस वान्यत्र गच्छ वा ॥ २० ॥
दमयन्त्यास्तु तद्वाक्यं वार्ष्णेयो नलसारथिः ।
न्यवेदयदशेषेण नलामात्येषु मुख्यशः ॥ २१ ॥

तैः समेत्य विनिश्चित्य सो ऽनुज्ञातो महीपते ।
ययौ मिथुनमारोप्य विदर्भांस्तेन वाहिना ॥ २२ ॥
कयांस्तत्र विनिक्षिप्य सूतो रथवरं च तं ।
इन्द्रसेनां च तां कन्यामिन्द्रसेनं च बालकं ॥ २३ ॥
आमन्त्र्य भीमं राजानमार्तः शोचन्नलं नृपं ।
अटमानस्ततो ऽयोध्यां जगाम नगरीं तदा ॥ २४ ॥
ऋतुपर्णं स राजानमुपतस्थे सुदुःखितः ।
भृतिं चोपययौ तस्य सारथ्येन महीपतेः ॥ २५ ॥

॥ इति नलोपाख्याने ऽष्टमो ऽध्यायः ॥

बृहदश्व उवाच ।

ततस्तु याते वार्ष्णेये पुण्यश्लोकस्य दीव्यतः ।
पुष्करेण कृतं राज्यं यच्चान्यद्वसु किंचन ॥ १ ॥
कृतराज्यं नलं राजन्प्रहसन्पुष्करो ऽब्रवीत् ।
द्यूतं प्रवर्ततां भूयः प्रतिपाणो ऽस्ति कस्तव ॥ २ ॥
शिष्टा ते दमयन्त्येका सर्वमन्यज्जितं मया ।
दमयन्त्याः पणः साधु वर्ततां यदि मन्यसे ॥ ३ ॥
पुष्करेणैवमुक्तस्य पुण्यश्लोकस्य मन्युना ।
व्यदीर्यतेव हृदयं न चैनं किंचिदब्रवीत् ॥ ४ ॥
ततः पुष्करमालोक्य नलः परममन्युमान् ।
उत्सृज्य सर्वगात्रेभ्यो भूषणानि महायशाः ॥ ५ ॥

एकवासा ह्यसंवीतः सुहृच्शोकविवर्धनः ।
निश्चक्राम ततो राज्ञा त्यक्ता सुविपुलां श्रियं ॥ ६ ॥
दमयन्त्येकवस्त्रार्थ गच्छन्तं पृष्ठतो ऽन्वगात् ।
स तया वाक्यतः सार्धं त्रिरात्रं नैषधो ऽवसत् ॥ ७ ॥
पुष्करस्तु महाराज घोषयामास वै पुरे ।
नले यः सम्यगातिष्ठेत्स गच्छेद्वध्यतां मम ॥ ८ ॥
पुष्करस्य तु वाक्येन तस्य विद्वेषणेन च ।
पौरा न तस्य सत्कारं कृतवन्तो युधिष्ठिर ॥ ९ ॥
स तथा नगराभ्यासे सत्कारार्हो न सत्कृतः ।
त्रिरात्रमुषितो राज्ञा जलमात्रेण वर्तयन् ॥ १० ॥
पीड्यमानः क्षुधा तत्र फलमूलानि कर्षयन् ।
प्रातिष्ठत ततो राज्ञा दमयन्ती तमन्वगात् ॥ ११ ॥
क्षुधया पीड्यमानस्तु नलो बह्वतिथे ऽहनि ।
अपश्यच्छकुनान्कांश्चिद्धिरण्यसदृशच्छदान् ॥ १२ ॥
स चिन्तयामास तदा निषधाधिपतिर्बली ।
अस्ति भक्ष्यो ममाद्यायं वसु चेदं भविष्यति ॥ १३ ॥
ततस्तान्पर्यधानेन वाससा स समावृणोत् ।
तस्य तद्वस्त्रमादाय सर्वे जग्मुर्विहायसा ॥ १४ ॥
उत्पतन्तः खगा वाक्यमेतदाहुस्ततो नलं ।
दृष्ट्वा दिग्वाससं भूमौ स्थितं दीनमधोमुखं ॥ १५ ॥
वयमक्षाः सुदुर्बुद्धे तव वासो जिहीर्षवः ।
आगता न हि नः प्रीतिः सवासासि गते त्वयि ॥ १६ ॥
तान्समीक्ष्य गतानक्षानात्मानं च विवाससं ।
पुण्यश्लोकस्तदा राजन्दमयन्तीमथाब्रवीत् ॥ १७ ॥

येषां प्रकोपादैश्वर्यात्प्रच्युतो ऽकृतनिन्दिते ।
प्राणयात्रां न विन्दे च दुःखितः क्षुधयान्वितः ॥ १८ ॥
येषां कृते न सत्कारमकुर्वन्मयि नैषधाः ।
त इमे शकुना भूत्वा वासो ऽप्यपहरन्ति मे ॥ १९ ॥
वैषम्यं परमं प्राप्तो दुःखितो गतचेतनः ।
भर्ता ते ऽहं निबोधेदं वचनं हितमात्मनः ॥ २० ॥
एते गच्छन्ति बहवः पन्थानो दक्षिणापथं ।
अवन्तीमृक्षवन्तं च समतिक्रम्य पर्वतं ॥ २१ ॥
एष विन्ध्यो महाशैलः पयोज्ञी च समुद्रगा ।
आश्रमाश्च महर्षीणां बहुमूलफलान्विताः ॥ २२ ॥
एष पन्था विदर्भाणामसौ गच्छति कोशलान् ।
अतः परं च देशो ऽयं दक्षिणो दक्षिणापथः ॥ २३ ॥
एतद्वाक्यं नलो राज्ञा दमयन्तीं समाहितः ।
उवाचासकृदार्त्तो हि भैमीमुद्दिश्य भारत ॥ २४ ॥
ततः सा वाष्पकलया वाचा दुःखेन कर्षिता ।
उवाच दमयन्ती तं नैषधं करुणं वचः ॥ २५ ॥
उद्वेजते मे हृदयं सीदत्यङ्गानि सर्वशः ।
तव पार्थिव संकल्पं चिन्तयन्त्याः पुनः पुनः ॥ २६ ॥
हृतराज्यं हृतद्रव्यं विवस्त्रं क्षुत्तृषान्वितं ।
कथमुत्सृज्य गच्छेयमहं त्वां निर्जने वने ॥ २७ ॥
श्रान्तस्य ते क्षुधार्त्तस्य चिन्तयानस्य तत्सुखं ।
वने घोरे महाराज नाशयिष्याम्यहं क्लमं ॥ २८ ॥
न च भार्यासमं किंचिद्विद्यते भिषजां मतं ।
औषधं सर्वदुःखेषु सत्यमेतद्ब्रवीमि ते ॥ २९ ॥

नल उवाच ।

एवमेतद्यथात्थ त्वं दमयन्ति सुमध्यमे ।
नास्ति भार्यासमं मित्रं नरस्यार्त्तस्य भेषजं ॥ ३० ॥
न चाहं त्यक्तुकामस्त्वां किमर्थं भीरु शङ्कसे ।
त्यजेयमकृमात्मानं न चैवं त्वामनिन्दिते ॥ ३१ ॥

दमयन्त्युवाच ।

यदि मां त्वं महाराज न विक्रातुमिकेच्छसि ।
तत्किमर्थं विदर्भाणां पन्थाः समुपदिश्यते ॥ ३२ ॥
ब्रवीमि चाहं नृपते न तु मां त्यक्तुमर्हसि ।
चेतसा वपकृष्टेन मां त्यजेथा महीपते ॥ ३३ ॥
पन्थानं हि ममाभीक्ष्णमाख्यासि च नरोत्तम ।
अतोनिमित्तं शोकं मे वर्धयस्यमरोपम ॥ ३४ ॥
यदि चायमभिप्रायस्तव ज्ञातीन्व्रजेदिति ।
सहितावेव गच्छावो विदर्भान्यदि मन्यसे ॥ ३५ ॥
विदर्भराजस्तत्र त्वां पूजयिष्यति मानद ।
तेन त्वं पूजितो राजन्सुखं वत्स्यसि नो गृहे ॥ ३६ ॥

॥ इति नलोपाख्याने नवमोऽध्यायः ॥

नल उवाच ।

यथा राज्यं तव पितुस्तथा मम न संशयः ।
न तु तत्र गमिष्यामि विषमस्थः कथंचन ॥ १ ॥

कथं समृद्धो गत्वाहं तव हर्षविवर्धनः ।
परिच्युतो गमिष्यामि तव शोकविवर्धनः ॥ २ ॥

बृहदश्व उवाच ।

इति ब्रुवन्नलो राज्ञा दमयन्तीं पुनः पुनः ।
शात्वयामास कल्याणीं वाससो ऽर्धेन संवृतां ॥ ३ ॥
तावेकवस्त्रसंवीतावटमानावितस्ततः ।
क्षुत्पिपासापरिश्रान्तौ सभां कांचिदुपेयतुः ॥ ४ ॥
तां सभामुपसंप्राप्य तदा स निषधाधिपः ।
वैदर्भ्या सहितो राज्ञा निषसाद महीतले ॥ ५ ॥
स वै विवस्त्रो विकटो मलिनः पांशुगुण्ठितः ।
दमयन्त्या सह श्रान्तः सुषाप धरणीतले ॥ ६ ॥
दमयन्त्यपि कल्याणी निद्रयापकृता ततः ।
सहसा दुष्खमासाद्य सुकुमारी तपस्विनी ॥ ७ ॥
सुप्तायां दमयन्त्यां तु नलो राज्ञा विशांपते ।
शोकोन्मथितचित्तात्मा न स्म शेते यथा पुरा ॥ ८ ॥
स तद्राज्यापहरणं सुहृत्त्यागं च सर्वशः ।
वने च तं परिध्वंसं प्रेक्ष्य चिन्तामुपेयिवान् ॥ ९ ॥
किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
किं नु मे मरणं श्रेयः परित्यागो ऽथवा नु वा ॥ १० ॥
मामियं ह्यनुरक्तैव दुष्खमाप्नोति मत्कृते ।
मद्विहीना वियं गच्छेत्कदाचित्स्वजनं प्रति ॥ ११ ॥
मयि निःसंशयं दुष्खमियं प्राप्स्यत्यनुव्रता ।
उत्सर्गे संशयः स्यात्तु विन्देतापि सुखं क्वचित् ॥ १२ ॥

स विनिश्चित्य बहुधा विचार्य च पुनः पुनः ।
उत्सर्गं मन्यते श्रेयो दमयन्त्या नराधिपः ॥ १३ ॥
न चैषा तेजसा शक्या कैश्चिद्धर्षयितुं पथि ।
यशस्विनी महाभागा महत्तेयं पतिव्रता ॥ १४ ॥
एवं तस्य तदा बुद्धिर्दमयन्त्यां न्यवर्तत ।
कलिना दुष्टभावेन दमयन्त्या विसर्जने ॥ १५ ॥
सो ऽवस्त्रतामात्मनश्च तस्याश्चाप्येकवस्त्रतां ।
चिन्तयित्वाध्यगाद्राजा वस्त्रार्धस्यावकर्तनं ॥ १६ ॥
कथं वासो विकर्तेयं न च बुध्येत मे प्रिया ।
विचिन्त्यैवं नलो राजा सभां पर्यचरत्तदा ॥ १७ ॥
परिधावन्नथ नल इतश्चेतश्च भारत ।
आससाद सभोद्देशे विकोषं खड्गमुत्तमं ॥ १८ ॥
तेनार्धं वाससश्छित्त्वा निवस्य च परंतपः ।
सुप्तामुत्सृज्य वैदर्भीं प्राद्रवद्गतचेतनः ॥ १९ ॥
ततो निवृत्तहृदयः पुनरागम्य तां सभां ।
दमयन्तीं तदा दृष्ट्वा रुरोद निषधाधिपः ॥ २० ॥
यां न वायुर्न चादित्यः पुरा पश्यति मे प्रियां ।
सेयमद्य सभामध्ये शेते भूमावनाथवत् ॥ २१ ॥
इयं वस्त्रावकर्तेन संवीता चारुहासिनी ।
उन्मत्तेव वरारोहा कथं बुद्ध्वा भविष्यति ॥ २२ ॥
कथमेका सती भैमी मया विरहिता शुभा ।
चरिष्यति वने घोरे मृगव्यालनिषेविते ॥ २३ ॥
आदित्या वसवो रुद्रा अश्विनौ समरुद्गणौ ।
रक्षन्तु त्वां महाभागे धर्मेणासि समावृता ॥ २४ ॥

एवमुक्ता प्रियां भार्यां द्यूतेनाप्रतिमां भुवि ।
कलिनापकृतज्ञानो नलः प्रातिष्ठदुद्यतः ॥ २५ ॥
गत्वा गत्वा नलो राज्ञा पुनरेति सभां मुहुः ।
आकृष्यमाणः कलिना सौहृदेनावकृष्यते ॥ २६ ॥
द्विधेव हृदयं तस्य दुष्क्रियतस्यामवत्तदा ।
दोलेव मुहुरायाति याति चैव सभां प्रति ॥ २७ ॥
अवकृष्टस्तु कलिना नोक्तिः प्राह्रवद्बलः ।
सुप्तामुत्सृज्य तां भार्यां विलप्य करुणं बहु ॥ २८ ॥
नष्टात्मा कलिना स्पृष्टस्तद्विगणायन्नृपः ।
जगामैकां वने शून्ये भार्यामुत्सृज्य दुष्क्रियतः ॥ २९ ॥

॥ इति नलोपाख्याने दशमोऽध्यायः ॥

बृहदश्व उवाच ।

अपक्रान्ते नले राजन्दमयन्ती गतक्लमा ।
अबुध्यत वरारोहा संत्रस्ता विजने वने ॥ १ ॥
अपश्यमाना भर्तारं शोकदुःखसमन्विता ।
प्राक्रोशदुच्चैः संत्रस्ता महाराजेति नैषधं ॥ २ ॥
क्व नाथ क्व महाराज क्व स्वामिन्किं जहासि मां ।
क्व कृतास्मि विनष्टास्मि भीतास्मि विजने वने ॥ ३ ॥
ननु नाम महाराज धर्मज्ञः सत्यवागसि ।
कथमुक्त्वा तथा सत्यं सुप्तामुत्सृज्य मां गतः ॥ ४ ॥
कथमुत्सृज्य गन्तासि दत्तां भार्यामनुव्रतां ।
विशेषतोऽनपकृते परेणापकृते सति ॥ ५ ॥

शक्यसे ता गिराः सम्यक्कर्तुं मयि नरेश्वर ।
यास्तेषां लोकपालानां संनिधौ कथिताः पुरा ॥ ६ ॥
नाकाले विहितो मृत्युर्मर्त्यानां पुरुषर्षभ ।
यत्र कान्ता त्वयोत्सृष्टा मुहूर्तमपि जीवति ॥ ७ ॥
पर्याप्तः परिहासो ऽयमेतावान्पुरुषर्षभ ।
भीतास्मतिदुर्धर्ष दर्शयात्मानमीश्वर ॥ ८ ॥
दृश्यसे दृश्यसे राजन्नेष दृष्टो ऽसि नैषध ।
आवार्य गुल्मैरात्मानं किं मां न प्रतिभाषसे ॥ ९ ॥
नृशंसं वत राजेन्द्र यन्मामेवंगतामिह ।
विलपन्तीं समागम्य नाश्वासयसि पार्थिव ॥ १० ॥
न शोचाम्यहमात्मानं न चान्यदपि किंचन ।
कथं नु भवितास्येक इति त्वां नृप शोचिमि ॥ ११ ॥
कथं नु राजंस्तृषितः क्षुधितः श्रमकर्षितः ।
सायाह्ने वृक्षमूलेषु मामपश्यन्भविष्यसि ॥ १२ ॥
ततः सा तीव्रशोकार्ता प्रदीप्तेव च मन्युना ।
इतश्चेतश्च रुदती पर्यधावत दुःखिता ॥ १३ ॥
मुहुरुत्पतते बाला मुहुः पतति विह्वला ।
मुहुरालीयते भीता मुहुः क्रोशति रोदिति ॥ १४ ॥
अतीव शोकसंतप्ता मुहुर्निःश्वस्य दुःखिता ।
उवाच भैमी निःश्वस्य रुदत्यथ पतिव्रता ॥ १५ ॥
यस्याभिशापाद्दुःखार्तो दुःखं विन्दति नैषधः ।
तस्य भूतस्य नो दुःखाद्दुःखमन्यधिकं भवेत् ॥ १६ ॥
अपापचेतसं पापो य एवं कृतवान्नलं ।
तस्माद्दुःखतरं प्राप्य जीवत्वसुखजीविकां ॥ १७ ॥

एवं तु विलपन्ती सा राज्ञो भार्या महात्मनः ।
हा हा राजन्निति मुहुरितश्चेतश्च धावति ॥ १८ ॥
तां क्रन्दमानामत्यर्थं कुररीमिव वाशतीं ।
करुणं बहु शोचन्तीं विलपन्तीं मुहुर्मुहुः ॥ १९ ॥
सहसाभ्यागतो भैमीमभ्यासपरिवर्तिनीं ।
ग्राहोग्राहनगरो ग्राहो महाकायः क्षुधान्वितः ॥ २० ॥
सा ग्रस्यमाना ग्राहेण शोकेन च परिप्लुता ।
नात्मानं शोचति तथा यथा शोचति नैषधं ॥ २१ ॥
हा नाथ मामिह वने ग्रस्यमानामनाथवत् ।
ग्राहेणानेन क्षिप्ते किमर्थं नानुधावसि ॥ २२ ॥
कथं भविष्यसि पुनर्मामनुस्मृत्य नैषध ।
शापान्मुक्तः पुनर्लब्ध्वा बुद्धिं चेतो धनानि च ॥ २३ ॥
आप्तस्य ते क्षुधार्त्तस्य परिग्लानस्य नैषध ।
कः श्रमं राजशार्दूल नाशयिष्यति तेऽनघ ॥ २४ ॥
ततः कश्चिन्मृगव्याधो विचरन्गहने वने ।
आक्रन्दमानां संश्रुत्य क्षवेनाभिससार ह ॥ २५ ॥
मुक्तः पाटयामास शस्त्रेण निशितेन च ।
निर्विचेष्टं भुजंगं तं विशस्य मृगजीवनः ॥ २६ ॥
मोक्षयित्वा स तां व्याधः प्रक्षाल्य सलिलेन च ।
समाश्वास्य कृताहारमथ पप्रच्छ भारत ॥ २७ ॥
कस्य त्वं मृगशावाक्षि कथं चाभ्यागता वनं ।
कथं चेदं महत्कृच्छ्रं प्राप्तवत्यसि भाविनि ॥ २८ ॥
दमयन्ती तथा तेन पृच्छ्यमाना विशांपते ।
सर्वमेतद्यथावृत्तमाचचक्षे ऽस्य भारत ॥ २९ ॥

तामर्धवस्त्रसंवीतां पीनश्रोणिपयोधरां ।
सुकुमारानवद्याङ्गीं पूर्णचन्द्रनिभाननां ॥ ३० ॥
अरालपक्ष्मनयनां तथा मधुरभाषिणीं ।
लक्षयित्वा मृगव्याधः कामस्य वशमीयिवान् ॥ ३१ ॥
तामेवं श्लक्ष्णया वाचा लुब्धको मृदुपूर्वया ।
शालयामास कामार्त्तस्तद्बुध्यत भाविनी ॥ ३२ ॥
दमयन्त्यपि तं दुष्टमुपलभ्य पतिव्रता ।
तीव्ररोषसमाविष्टा प्रज्वालेव मन्युना ॥ ३३ ॥
स तु पापमतिः क्षुद्रः प्रधर्षयितुमातुरः ।
दुर्धर्षां तर्कयामास दीप्तामग्निशिखामिव ॥ ३४ ॥
दमयन्ती तु दुष्टवार्त्ता पतिराज्यविनाकृता ।
अतीतवाक्पथे काले शशापैनं रुषान्विता ॥ ३५ ॥
यथाहं नैषधादन्यं मनसापि न चिन्तये ।
तथायं पतितां क्षुद्रः परासुर्मृगजीवनः ॥ ३६ ॥
उक्तमात्रे तु वचने तथा स मृगजीवनः ।
व्यसुः पपात मेदिन्यामग्निदग्ध इव द्रुमः ॥ ३७ ॥

॥ इति नलोपाख्यान एकादशो ऽध्यायः ॥

बृहदश्व उवाच ।

सा निकृत्य मृगव्याधं प्रतस्थे कमलेक्षणा ।
वनं प्रतिभयं शून्यं किल्लिकागणनादितं ॥ १ ॥
सिंहद्वीपिरुरुव्याघ्रनिषेवर्क्षगणैर्युतं ।
नानापक्षिगणाकीर्णं म्लेच्छतस्करसेवितं ॥ २ ॥

जम्ब्वाम्रलोध्रखदिरशालवेत्रसमाकुलं ।
पद्मकामलकप्लक्षकदम्बोडुम्बरावृतं ॥ ३ ॥
नानाधातुशतैर्नद्यान्विविधानपि चाचलान् ।
सरितो निर्झरांश्चैव ददर्शाद्भुतदर्शनान् ॥ ४ ॥
यूथशो ददृशे चात्र विदर्भाधिपनन्दिनी ।
मक्षिणश्च वराहांश्च ऋक्षांश्च वनपन्नगान् ॥ ५ ॥
तेजसा यशसा लक्ष्म्या स्थित्या च परया युता ।
नाबिभ्यत्सा नृपसुता भैमी तत्राथ कस्यचित् ॥ ६ ॥
दारुणामटवीं प्राप्य भर्तृव्यसनपीडिता ।
विदर्भतनया राजन्विललाप सुदुःखिता ॥ ७ ॥
व्यूढोरस्क महाबाहो नैषधानां जनाधिप ।
क्व नु राजन्गतो ऽसीह त्यक्त्वा मां विजने वने ॥ ८ ॥
अश्वमेधादिभिर्वीर क्रतुभिर्भूरिदक्षिणैः ।
कथमिष्ट्वा नरव्याघ्र मयि मिथ्या प्रवर्तसे ॥ ९ ॥
यच्चयोक्तं नरश्रेष्ठ मत्समक्षं महाद्युते ।
स्मर्तुमर्हसि कल्याण वचनं पार्थिवर्षभ ॥ १० ॥
यच्चोक्तं विहगैर्हंसैः समीपे तव भूमिप ।
मत्समक्षं यदुक्तं च तद्वेत्तितुमर्हसि ॥ ११ ॥
क्व वीर ननु नामाहमिष्टा किल तवानघ ।
अस्यामटव्यां घोरायां किं मां न प्रतिभाषसे ॥ १२ ॥
भक्षयत्येष मां रौद्रो व्यात्तास्यो दारुणाकृतिः ।
अरण्यराड्बुधाविष्टः किं मां न त्रातमुर्हसि ॥ १३ ॥
न मे वदन्त्या काचिद्धि प्रियास्तीत्यब्रवीः सदा ।
तामृतां कुरु कल्याण पुरोक्तां भारतीं नृप ॥ १४ ॥

उन्मत्तां विलपन्तीं मां भार्यामिष्टां नराधिप ।
ईप्सितामीप्सितो नाथ किं मां न प्रतिभाषसे ॥ ॥ १५ ॥
यूथभ्रष्टामिवैकां मां हरिणीं पृथुलोचन ।
न मानयसि मामार्य रुदतीमरिकर्षण ॥ १६ ॥
महाराज महारण्ये अहमेकाकिनी सती ।
दमयन्त्यभिभाषे त्वां किं मां न प्रतिभाषसे ॥ १७ ॥
कुलशीलोपसंपन्न चारुसर्वाङ्गदर्शन ।
नाद्य त्वां प्रतिपश्यामि गिरावस्मिन्नरोत्तम ॥ १८ ॥
वने चास्मिन्महाघोरे सिंहव्याघ्रनिषेविते ।
शयानमुपविष्टं वा स्थितं वा निषधाधिप ॥ १९ ॥
कं नु पृच्छामि दुष्पवार्त्ता त्वदर्थे शोककर्शिता ।
कच्चिद्दृष्टस्त्वयारण्ये संगत्येह नलो नृपः ॥ २० ॥
यमन्वेषसि राजानं नलं पद्मनिभेक्षणं ।
अयं स इति कस्याद्य श्रोष्यामि मधुरां गिरं ॥ २१ ॥
अरण्यराडयं श्रीमांश्चतुर्दंष्ट्रो महाहनुः ।
शार्दूलो ऽभिमुखो ऽभ्येति व्रजाम्येनमशङ्किता ॥ २२ ॥
भवान्मृगाणामधिपस्त्वमस्मिन्कानने प्रभुः ।
विदर्भराजतनयां दमयन्तीति विद्धि मां ॥ २३ ॥
पतिमन्वेषतीमेकां कृपणां शोककर्षितां ।
आश्वासय मृगेन्द्रेह यदि दृष्टस्त्वया नलः ॥ २४ ॥
अथवारण्यनृपते नलं यदि न शंससि ।
मां खादय मृगश्रेष्ठ दुष्पवादान्मामिमोचय ॥ २५ ॥
श्रुत्वारण्ये विलपितं ममैष मृगराट्स्वयं ।
यात्येतां मृष्टसलिलामापगां सागरंगमां ॥ २६ ॥

दुष्करं कुरुते ऽत्यन्तं क्षीनो यदनया नलः ।
धारयत्यात्मनो देहं न शोकेनावसीदति ॥ १६ ॥
इमानसितकेशान्तां शतपत्रायतेक्षणां ।
सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथते मनः ॥ १७ ॥
कदा नु खलु दुःखस्य पारं यास्यति वै प्रभा ।
भर्तुः समागमात्साध्वी रोहिणी शशिनो यथा ॥ १८ ॥
अस्या नूनं पुनर्लाभाद्भैषधः प्रीतिमेष्यति ।
राज्ञा राज्यपरिभ्रष्टः पुनर्लब्ध्वा च मेदिनीं ॥ १९ ॥
तुल्यशीलवयोयुक्तां तुल्याभिजनसंवृतां ।
नैषधो ऽर्हति वैदर्भीं तं चेयमसितेक्षणा ॥ २० ॥
युक्तं तस्याप्रमेयस्य वीर्यसत्त्ववतो मया ।
समाश्वासयितुं भार्यां पतिदर्शनलालसां ॥ २१ ॥
अयमाश्वासयाम्येनां पूर्णचन्द्रनिभाननां ।
अदृष्टपूर्वां दुःखस्य दुःखार्त्तां ध्यानतत्परां ॥ २२ ॥

बृहदश्व उवाच ।

एवं विमृश्य विविधैः कारणैर्लक्षणैश्च तां ।
उपागम्य ततो भैमीं सुदेवो ब्राह्मणो ऽब्रवीत् ॥ २३ ॥
अहं सुदेवो वैदर्भि भ्रातुस्ते दयितः सखा ।
भीमस्य वचनाद्राज्ञस्त्वामन्वेष्टुमिहागतः ॥ २४ ॥
कुशली ते पिता राज्ञि जननी भ्रातरश्च ते ।
आयुष्मतौ कुशलिनौ तत्रस्थौ दारकौ च तौ ॥ २५ ॥
त्वत्कृते बन्धुवर्गाश्च गतसत्त्वा इवासते ।
अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति शतशो महीं ॥ २६ ॥

अभिज्ञाय सुदेवं तं दमयन्ती युधाष्ठिर ।
पर्यपृच्छत तान्सर्वान्क्रमेण सुहृदः स्वकान् ॥ २७ ॥
रुरोद च भृशं राजन्वैदर्भी शोककर्षिता ।
दृष्ट्वा सुदेवं सहसा भ्रातुरिष्टं द्विजोत्तमं ॥ २८ ॥
ततो रुदन्तीं तां दृष्ट्वा सुनन्दा शोककर्षितां ।
सुदेवेन सहैकान्ते कथयन्तीं च भारत ॥ २९ ॥
जननित्र्याः कथयामास सैरंध्री रुदिते भृशं ।
ब्राह्मणेन सहागम्य तां वेद यदि मन्यसे ॥ ३० ॥
अथ चेदिपतेर्माता राज्ञश्चान्तःपुरात्तदा ।
जगाम यत्र सा बाला ब्राह्मणेन सहाभवत् ॥ ३१ ॥
ततः सुदेवमानाय्य राजमाता विशांपते ।
पप्रच्छ भार्या कस्येयं सुता वा कस्य भाविनी ॥ ३२ ॥
कथं च भ्रष्टा ज्ञातिभ्यो भर्तुर्वा वामलोचना ।
त्वया च विदिता विप्र कथमेवंगता सती ॥ ३३ ॥
एतदिच्छाम्यहं श्रोतुं वत्तः सर्वमशेषतः ।
तत्त्वेन हि ममाचक्ष्व पृच्छत्या देवरूपिणीं ॥ ३४ ॥
एवमुक्तस्तया राजन्सुदेवो द्विजसत्तमः ।
सुखोपविष्ट आचष्टे दमयन्त्या यथातथं ॥ ३५ ॥

॥ इति नलोपाख्याने षोडशोऽध्यायः ॥

सुदेव उवाच ।

विदर्भराजो धर्मात्मा भीमो नाम महाद्युतिः ।
सुतेयं तस्य कल्याणी दमयन्तीति विश्रुता ॥ १ ॥

राज्ञा तु नैषधो नाम वीरसेनसुतो नलः ।
भार्येयं तस्य कल्याणी पुण्यश्लोकस्य धीमतः ॥ २ ॥
स वै द्यूते जितो भ्रात्रा कृतराज्यो महीपतिः ।
दमयन्त्या गतः सार्धं न प्राज्ञायत कर्हिचित् ॥ ३ ॥
ते वयं दमयन्त्यर्थं चरामः पृथिवीमिमां ।
सेयमासादिता बाला तव पुत्रनिवेशने ॥ ४ ॥
अस्या ह्येष ध्रुवोर्मध्ये सहजः पिप्लुरुत्तमः ।
श्यामायाः पद्मसंकाशो लक्षितो ऽस्तर्कितो मया ॥ ५ ॥
मलेन संवृतो ह्यस्याश्छन्नो ऽभ्रेणेव चन्द्रमाः ।
चिह्नभूतो विभूत्यर्थमयं धात्रा विनिर्मितः ॥ ६ ॥
न चास्या नश्यते रूपं वपुर्मलसमाचितं ।
असंस्कृतमभिव्यक्तं भाति काञ्चनसंनिभं ॥ ७ ॥
अनेन वपुषा बाला पिप्लुनानेन सूचिता ।
लक्षितेयं मया देवी निभृतो ऽग्निरिवोष्मणा ॥ ८ ॥

बृहदश्व उवाच ।

तच्छ्रुत्वा वचनं तस्य सुदेवस्य विशांपते ।
सुनन्दा शोधयामास पिप्लुप्रच्छादनं मलं ॥ ९ ॥
स मलेनापकृष्टेन पिप्लुस्तस्या व्यरोचत ।
दमयन्त्यास्तदा व्यभ्रे नभसीव निशाकरः ॥ १० ॥
पिप्लुं दृष्ट्वा सुनन्दा च राजमाता च भारत ।
रुदत्यौ तां परिष्वज्य मुहूर्तमिव तस्थतुः ॥ ११ ॥
उत्सृज्य वाष्पं शनकै राजमातेदमब्रवीत् ।
भगिन्या दुहिता मे ऽसि पिप्लुनानेन सूचिता ॥ १२ ॥

*

अर्हं च तव माता च राज्ञस्तस्य महात्मनः ।
सुते दशार्णाधिपतेः सुदाम्नश्चारुदर्शने ॥ १३ ॥
भीमस्य राज्ञः सा दत्ता वीरबाहोरहं पुनः ।
त्वं तु ज्ञाता मया दृष्टा दशार्णेषु पितुर्गृहे ॥ १४ ॥
यथैव ते पितुर्गेहं तथैव मम भाविनि ।
यथैव च ममैश्वर्यं दमयन्ति तथा तव ॥ १५ ॥
तां प्रहृष्टेन मनसा दमयन्ती विशांपते ।
प्रणम्य मातुर्भगिनीमिदं वचनमब्रवीत् ॥ १६ ॥
अज्ञायमानापि सती सुखमस्युषिता त्वयि ।
सर्वकामैः सुविहिता रक्ष्यमाणा सदा त्वया ॥ १७ ॥
सुखात्सुखतरो वासो भविष्यति न संशयः ।
चिरविप्रोषितां मातर्मामनुज्ञातुमर्हसि ॥ १८ ॥
दारकौ च हि मे नीतौ वसतस्तत्र बालकौ ।
पित्रा विहीनौ शोकार्तौ मया चैव कथं नु तौ ॥ १९ ॥
यदि चापि प्रियं किंचिन्मयि कर्तुमिहेच्छसि ।
विदर्भान्यातुमिच्छामि शीघ्रं मे यानमादिश ॥ २० ॥
बाढमित्येव तामुक्ता दृष्टा मातृष्वसा नृप ।
गुप्तां बलेन महता पुत्रस्यानुमते ततः ॥ २१ ॥
पुष्करं ज्येष्ठमागम्य विश्वामित्रं ददर्श ह ॥ २ ॥
तप्यन्तमृषिभिः सार्धं मातुलं परमातुरः ।
विषण्णवदनो दीनस्तृष्णया च श्रमेण च ॥ ३ ॥
पपाताङ्के मुने राम वाक्यं चेदमुवाच ह ।
न मे ऽस्ति माता न पिता ज्ञातयो बान्धवाः कुतः ॥ ४ ॥
त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुंगव ।
त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ॥ ५ ॥
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः ।
स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमं ॥ ६ ॥
स मे नाथो ह्यनाथस्य भव भव्येन चेतसा ।
पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥ ७ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः ।
शात्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥
यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः ।
परलोकहितार्थाय तस्य कालोऽयमागतः ॥ ९ ॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥
सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः ।
पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत ॥ ११ ॥
नाथवांश्च शुनःशेपो यज्ञश्चाविघ्नितो भवेत् ।
देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः ॥ १२ ॥
मुनेस्तु वचनं श्रुत्वा मधुस्यन्दादयः सुताः ।
साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् ॥ १३ ॥
कथमात्मसुतान्हित्वा त्रायसेऽन्यसुतान्विभो ।
अकार्यमिव पश्यामः स्वमांसमिव भोजने ॥ १४ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां मुनिपुंगवः ।
क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥ १५ ॥
निःसाध्वसमिदं प्रोक्तं धर्मादपि विगर्हितं ।
अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणं ॥ १६ ॥
श्वमांसभोजनाः सर्वे वाशिष्ठा इव जातिषु ।
पूर्णवर्षसहस्रं तु पृथिव्यामनुवत्स्यथ ॥ १७ ॥
कृत्वा शापसमायुक्तान्पुत्रान्मुनिवरस्तदा ।
पुनःशेपमुवाचार्तं कृत्वा रक्षां निरामयां ॥ १८ ॥
पवित्रपाशैराबद्धो रक्तमाल्यानुलेपनः ।
वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥ १९ ॥

इमे च गाथे द्वे दिव्ये गायेथा मुनिपुत्रक ।
अम्बरीषस्य यज्ञे ऽस्मिंस्ततः सिद्धिमवाप्स्यसि ॥ २० ॥
पुनःशेफो गृहीत्वा ते द्वे गाथे सुसमाहितः ।
त्वरया राजसिंहं तमम्बरीषमुवाच ह ॥ २१ ॥
राजसिंह महाबुद्धे शीघ्रं गच्छामहे वयं ।
निवर्तयस्व राजेन्द्र दीक्षां च समुपाविश ॥ २२ ॥
तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः ।
जगाम नृपतिः शीघ्रं यज्ञवाटमतन्द्रितः ॥ २३ ॥
सदस्यानुमते राज्ञा पवित्रकृतलक्षणं ।
पशुं रक्ताम्बरं कृत्वा यूपे तं समबन्धयत् ॥ २४ ॥
स वह्नो वाग्भिरार्याभिरभितुष्टाव वै सुरौ ।
इन्द्रमिन्द्रानुजं चैव यथावन्मुनिपुत्रकः ॥ २५ ॥
तस्मै प्रीतः सहस्राक्षो रहस्यस्तुतितोषितः ।
दीर्घमायुस्तदा प्रादाच्छुनःशेफाय वासवः ॥ २६ ॥
स च राज्ञा नरश्रेष्ठ तस्य यज्ञस्य लब्धवान् ।
फलं वज्रगुणं राम सहस्राक्षप्रसादजं ॥ २७ ॥
विश्वामित्रो ऽपि धर्मात्मा भूयस्तेपे महत्तपः ।
पुष्करेष्वेव वर्षाणां सहस्रं नियतव्रतः ॥ २८ ॥

॥ इति विश्वामित्रोपाख्याने द्वादशः सर्गः ॥

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिं ।
अभ्यागच्छन्सुराः सर्वे तपःफलचिकीर्षवः ॥ १ ॥
तत्रैनमब्रवीद्ब्रह्मा पुनः सुरुचिरं वचः ।
ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः प्रभोः ॥ २ ॥

तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ।
विश्वामित्रो ऽपि तच्छ्रुत्वा भूयस्तेपे महत्तपः ॥ ३ ॥
ततः कालेन महता मेनका परमाप्सराः ।
पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ॥ ४ ॥
तां ददर्श महातेजा मेनकां कुशिकात्मजः ।
रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५ ॥
तां दृष्ट्वा चारुसर्वाङ्गीं मेनकां विजने वने ।
कन्दर्पवशगो ऽभ्येत्य मुनिर्वचनमब्रवीत् ॥ ६ ॥
अप्सरः स्वागतं ते ऽस्तु वस चेह ममाश्रमे ।
अनुगृह्णीष्व भद्रं ते मदनेन विमोहितं ॥ ७ ॥
इत्युक्ता सा वरारोहा तत्र वासमथाकरोत् ।
तपसो हि महाविघ्नो विश्वामित्रमुपागमत् ॥ ८ ॥
तस्यां वसत्यां वर्षाणि पञ्च पञ्च च राघव ।
विश्वामित्राश्रमे सौम्ये सुखेन व्यतिचक्रमुः ॥ ९ ॥
अथ काले गते तस्मिन्विश्वामित्रो महामुनिः ।
सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः ॥ १० ॥
बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ।
सर्वदेवानां कर्मैतत्तपोऽपहरणं महत् ॥ ११ ॥
अहोरात्रापदेशेन गताः संवत्सरा दश ।
काममोहाभिभूतस्य विघ्नो ऽयं प्रत्युपस्थितः ॥ १२ ॥
स निःश्वसन्मुनिवरः पश्चात्तापेन दुष्कृतः ।
भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थितां ॥ १३ ॥
मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ।
उत्तरं पर्वतं राम विश्वामित्रो जगाम ह ॥ १४ ॥

स कृत्वा नैष्ठिकीं बुद्धिं ज्ञेतुकामो महायशाः ।
कौशिकीतीरमासाद्य तपस्तेपे दुरासदं ॥ १५ ॥
तस्य वर्षसहस्राणि घोरं तप उपासतः ।
उत्तरे पर्वते राम देवतानामभूद्भयं ॥ १६ ॥
ग्रसन्त्रयन्समागम्य सर्वे सर्षिगणाः सुराः ।
महर्षिशब्दं लभतां साध्यं कुशिकात्मजः ॥ १७ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ।
ग्रब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं ॥ १८ ॥
महर्षे स्वागतं वत्स तपसोग्रेण तोषितः ।
महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक ॥ १९ ॥
ब्रह्मणस्तद्वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
न विषण्णो न संतुष्टः प्रत्युवाच पितामहं ॥ २० ॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ।
यदि मे भगवानाह ततो ऽहं विजितेन्द्रियः ॥ २१ ॥
तमुवाच ततो ब्रह्मा न तावत्त्वं जितेन्द्रियः ।
यतस्व मुनिशार्दूल इत्युक्त्वा स दिवं गतः ॥ २२ ॥
विश्वामित्रो ऽपि तत्रैव तेपे घोरतरं तपः ।
ऊर्ध्वबाहुर्निरालम्ब एकपादप्रतिष्ठितः ॥ २३ ॥
वायुभक्षः स्थितः स्थाने एकस्मिन्स्थाणुवत्स्थिरः ।
घर्मे पञ्चतपा भूत्वा वर्षास्वब्भावकाशिकः ॥ २४ ॥
शिशिरे सलिले शायी रात्र्यहानि तपोधनः ।
एवं वर्षसहस्रं हि तपो घोरमुपागमत् ॥ २५ ॥
तस्मिन्संतप्यमाने तु विश्वामित्रे महामुनौ ।
संतापः सुमहानासीत्सुराणां वासवस्य च ॥ २६ ॥

संभ्रमं परमास्थाय ततः शक्रः सुराधिपः ।
चिन्तयित्वा तपोविघ्नमुपायं रघुनन्दन ॥ २७ ॥
आहूयाप्सरसं रम्भां मरुद्गणावृतः प्रभुः ।
उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ २८ ॥

॥ इति विश्वामित्रोपाख्याने त्रयोदशः सर्गः ॥

सुरकार्यमिदं रम्भे कर्तव्यं सुमहत्त्वया ।
लोभनं कौशिकस्येह काममोहसमन्वितं ॥ १ ॥
तथोक्ता साप्सरा राम सहस्राक्षेण धीमता ।
व्रीडिता प्राञ्जलिर्वाक्यं प्रत्युवाच सुरेश्वरं ॥ २ ॥
अयं सुरपते घोरो विश्वामित्रो महामुनिः ।
क्रोधमुत्सृजते क्रूरं मयि देव न संशयः ॥ ३ ॥
ततो हि मे भयं देव प्रसादं कर्तुमर्हसि ।
एवमुक्तस्तया राम सभयं भीतया तदा ॥ ४ ॥
तामुवाच सहस्राक्षो वेपमानां कृताञ्जलिं ।
मा भैषी रम्भे भद्रं ते कुरुष्व मम शासनं ॥ ५ ॥
कोकिलो हृदयग्राही माधवे रुचिरद्रुमे ।
अहं कन्दर्पसहितः स्थास्यामि तव पार्श्वतः ॥ ६ ॥
त्वं हि रूपं बहुगुणं कृत्वा परमभास्वरं ।
तमृषिं कौशिकं रम्भे भेदयस्व तपस्विनं ॥ ७ ॥
सा श्रुत्वा वचनं तस्य कृत्वा रूपमनुत्तमं ।
लोभयामास ललिता विश्वामित्रं शुचिस्मिता ॥ ८ ॥
कोकिलस्य तु शुश्राव वल्गु व्याहरतः स्वनं ।
संप्रहृष्टेन मनसा स चैनामन्ववैक्षत ॥ ९ ॥

अथ तस्य च शब्देन गीतेनाप्रतिमेन च ।
दर्शनेन च रम्भाया मुनिः संदेहमागतः ॥ १० ॥
सहस्रात्तस्य तत्सर्वं विज्ञाय मुनिपुंगवः ।
रम्भां क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥ ११ ॥
यन्मां लोभयसे रम्भे कामक्रोधजयैषिणं ।
दश वर्षसहस्राणि शैलो स्थास्यसि दुर्भगे ॥ १२ ॥
ब्राह्मणः समहातेजास्तपोबलसमन्वितः ।
उद्धरिष्यति रम्भे त्वां मत्क्रोधकलुषीकृतां ॥ १३ ॥
एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः ।
अशक्नुवन्धारयितुं कोपं संतापमागतः ॥ १४ ॥
तस्य शापेन महता रम्भा शैली तदाभवत् ।
वचः श्रुत्वा तु कन्दर्पो महर्षेः स च निर्गतः ॥ १५ ॥
कोपेन च महातेजास्तपोऽपहरणे कृते ।
इन्द्रियैरजितै राम न लेभे शान्तिमात्मनः ॥ १६ ॥
बभूवास्य पुनश्चिन्ता . . . . . .
. . . . . ॥ १७ ॥
नैव क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ।
अथवा नोच्छ्वसिष्यामि संवत्सरशतान्यपि ॥ १८ ॥
अहं हि शोषयिष्यामि आत्मानं विजितेन्द्रियः ।
तावद्यावद्धि मे प्राप्तं ब्राह्मण्यं तपसार्जितं ॥ १९ ॥
अनुच्छ्वसन्नभुञ्जानस्तिष्ठेयं शाश्वतीः समाः ।
न हि मे तप्यमानस्य क्षयं यास्यन्ति मूर्तयः ॥ २० ॥

॥ इति विश्वामित्रोपाख्याने चतुर्दशः सर्गः ॥

अथ कैमवतीं राम दिशं त्यक्त्वा महामुनिः ।
पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणं ॥ १ ॥
मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमं ।
चकाराप्रतिमं लोके तपः परमदुष्करं ॥ २ ॥
पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिं ।
विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥ ३ ॥
स कृत्वा निश्चयं राम तप आतिष्ठताव्ययं ।
तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतः ॥ ४ ॥
भोक्तुमारब्धवानन्नं तस्मिन्काले रघूत्तम ।
इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ॥ ५ ॥
तस्मै दत्त्वा तदा सिद्धं सर्वं विप्राय निश्चितः ।
निःशेषिते ऽन्ने भगवानभुक्त्वैव महातपाः ॥ ६ ॥
न किंचिदवदद्विप्रं मौनव्रतमुपास्थितः ।
तथैव मौनमकरोदनुच्छ्वासं च राघव ॥ ७ ॥
तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ।
त्रैलोक्यं येन संभ्रान्तमादीपितमिवाभवत् ॥ ८ ॥
ततो देवर्षिगन्धर्वाः पन्नगोरगराक्षसाः ।
कश्मलोपप्लुताः सर्वे पितामहमथाब्रुवन् ॥ ९ ॥
बहुभिः कारणैर्देव विश्वामित्रो महामुनिः ।
लोभितः क्रोधितश्चैव तपसा चाभिवर्धते ॥ १० ॥
न दीयते यदि ह्यस्य मनसा यदभीप्सितं ।
विनाशयति त्रैलोक्यं तपसा सचराचरं ॥ ११ ॥
व्याकुलाश्च दिशः सर्वा न च किंचित्प्रकाशते ।
सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ॥ १२ ॥

प्रकम्पते च पृथिवी वायुर्वातीह संकुलः ।
ब्रह्मन्न प्रतिजानीमो नास्तिको जायते जनः ॥ १३ ॥
संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसं ।
भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा ॥ १४ ॥
बुद्धिं न कुरुते यावद्दाशे देव महामुनिः ।
तावत्प्रसाद्यो भगवानग्निरूपो महाद्युतिः ॥ १५ ॥
कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यते ऽखिलं ।
देवराज्यं चिकीर्षेत दीयतामस्य यन्नतं ॥ १६ ॥
ततः सुरगणाः सर्वे पितामहपुरोगमाः ।
विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ॥ १७ ॥
ब्रह्मर्षे स्वागतं ते ऽस्तु तपसा स्म सुतोषिताः ।
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥ १८ ॥
दीर्घमायुश्च ते ब्रह्मन्ददामि समरुद्गणः ।
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखं ॥ १९ ॥
पितामहवचः श्रुत्वा सर्वेषां त्रिदिवौकसां ।
कृत्वा प्रणामं मुदितो व्याजहार महामुनिः ॥ २० ॥
ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ।
ओंकारो ऽथ वषट्कारो वेदाश्च वरयन्तु मां ॥ २१ ॥
तत्त्ववेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ।
ब्रह्मपुत्रो वशिष्ठो मामेवं वदतु देवताः ॥ २२ ॥
ततः प्रसादितो देवैर्वशिष्ठो जपतां वरः ।
सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥ २३ ॥
ब्रह्मर्षिर्वं न संदेहः सर्वं संपद्यते तव ।
इत्युक्ता देवताश्चापि सर्वा जग्मुर्यथागतं ॥ २४ ॥

विश्वामित्रो ऽपि धर्मात्मा लब्धा ब्राह्मण्यमुत्तमं ।
पूजयामास ब्रह्मर्षिं वशिष्ठं जपतां वरं ॥ २५ ॥
कृतकामो महीं सर्वां चचार तपसि स्थितः ।
एवं वनेन ब्राह्मण्यं प्राप्तं राम महात्मना ॥ २६ ॥

॥ इति विश्वामित्रोपाख्याने पञ्चदशः सर्गः ॥

॥ इति विश्वामित्रोपाख्यानं समाप्तं ॥

DAÇARATHA'S TOD.

AUS DEM RĀMĀJAṆA.

प्रतिबुद्धो मुहूर्तेन शोकोपहतचेतनः ।
अथ राजा दशरथः स चिन्तामभ्यपद्यत ॥ १ ॥
रामलक्ष्मणयोश्चैव विवासाद्वासवोपमः ।
आविवेशोपसर्गस्तं तमः सूर्यमिवासुरं ॥ २ ॥
स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनं ।
अर्धरात्रे दशरथः संस्मरन्दुष्कृतं कृतं ॥ ३ ॥
कौशल्यां पुत्रशोकार्त्तामिदं वचनमब्रवीत् ।
यदि जागर्षि कौशल्ये शृणु मे ऽव्यहिता वचः ॥ ४ ॥
यदाचरति कल्याणि शुभं वा यदि वाशुभं ।
तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥ ५ ॥

गुरुलाघवमर्थानामारम्भे कर्मणां फलं ।
दोषं वा यो न जानाति स बाल इति होच्यते ॥ ६ ॥
कश्चिदाम्रवणं छित्त्वा पलाशांश्च निषिञ्चति ।
पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥ ७ ॥
अविज्ञाय फलं यो हि कर्म त्वेवानुधावति ।
स शोचेत्फलवेलायां यथा किंशुकसेवकः ॥ ८ ॥
सो ऽहमाम्रवणं छित्त्वा पलाशांश्च न्यषेचयं ।
रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः ॥ ९ ॥
लब्धशब्देन कौशल्ये कुमारेण धनुष्मता ।
कुमारः शब्दवेधीति मया पापमिदं कृतं ॥ १० ॥
तदिदं मे ऽनुसंप्राप्तं देवि दुष्वं स्वयंकृतं ।
संमोहादिह बालेन यथा स्याद्भक्षितं विषं ॥ ११ ॥
यथान्यः पुरुषः कश्चित्पलाशैर्मोहितो भवेत् ।
एवं मयाप्यविज्ञातं शब्दवेध्यमिदं फलं ॥ १२ ॥
देव्यनूढा त्वमभवो युवराजो भवान्यहं ।
ततः प्रावृडनुप्राप्ता मम कामविवर्धिनी ॥ १३ ॥
अपास्य हि रसान्भौमांस्तप्त्वा च जगदंशुभिः ।
परेताचरितां भीमां रविरविशते दिशं ॥ १४ ॥
उच्चमत्तर्दधे सद्यः स्निग्धा ददृशिरे घनाः ।
ततो जलर्षिरे सर्वे भेकसारंगवर्हिणः ॥ १५ ॥
स्निग्धपद्मोत्तराः स्नाताः कृच्छ्रादिव पतत्रिणः ।
वृष्टिवातावधूताग्र्यान्पादपानभिषेदिरे ॥ १६ ॥
पतितेनाम्भसा क्षुब्धः पतमानेन चासकृत् ।
आबभौ मत्तसारंगस्तोयराशिरिवाचलः ॥ १७ ॥

पाण्डुरारुणवर्णानि स्रोतांसि विमलान्यपि ।
सुस्रुवुर्गिरिधातुभ्यः सभस्मानि भुजंगवत् ॥ १८ ॥
तस्मिन्नतिसुखे काले धनुष्मानिषुमान्रथी ।
व्यायामकृतसंकल्पः सरयूमन्वयां नदीं ॥ १९ ॥
निपाने महिषं रात्रौ गजं वाभ्यागतं नदीं ।
अन्यद्वा श्वापदं किंचिज्जिघांसुरजितेन्द्रियः ॥ २० ॥
अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः ।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥ २१ ॥
ततोऽहं शरमुद्धृत्य दीप्तमाशीविषोपमं ।
शब्दं प्रति गजप्रेप्सुरभिलक्ष्यमपातयं ॥ २२ ॥
तत्र वागुषसि व्यक्ता प्रादुरासीद्धनौकसः ।
हा केति पततस्तोये बाणाद्यथितमर्मणः ॥ २३ ॥
तस्मिन्निपतिते बाणे वागभूत्तत्र मानुषी ।
कथमस्मद्विधे शस्त्रं निपतेत्तु तपस्विनि ॥ २४ ॥
प्रविविक्तां नदीं रात्रावुदकोरा ऽहमागतः ।
इषुणाभिहतः केन कस्य वापकृतं मया ॥ २५ ॥
ऋषेर्हि न्यस्तदण्डस्य वने वन्येन जीवतः ।
कथं नु शस्त्रेण वधो मद्विधस्य विधीयते ॥ २६ ॥
जटाभारधरस्यैव वल्कलाजिनवाससः ।
को वधेन मनार्थी स्यात्किं वास्यापकृतं मया ॥ २७ ॥
एवं निष्फलमारब्धं केवलानर्थसंहितं ।
न कश्चित्साधु मन्येत यथैव गुरुतल्पगं ॥ २८ ॥
नेमं तथानुशोचामि जीवितक्षयमात्मनः ।
मातरं पितरं चोभावनुशोचामि मद्वधे ॥ २९ ॥

तदेतन्मिथुनं वृद्धं चिरकालभृतं मया ।
मयि पञ्चत्वमापन्ने का वृत्तिं वर्तयिष्यति ॥ ३० ॥
वृद्धौ च मातापितरावन्धौ चैकेषुणा हतः ।
केन स्म निहताः सर्वे सुबलेनाकृतात्मना ॥ ३१ ॥
तां गिरं करुणां श्रुत्वा मम धर्मानुकाङ्क्षिणः ।
कराभ्यां सशरं चापं व्यथितस्यापतद्भुवि ॥ ३२ ॥
तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः ।
अपश्यमिषुणा तीरे सरय्वास्तापसं हतं ॥ ३३ ॥
अवकीर्णजटाभारं प्रविद्धकलशोदकं ।
पांशुशोणितदिग्धाङ्गं शयानं शल्यपीडितं ॥ ३४ ॥
स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतनं ।
इत्युवाच वचः क्रूरं दिधक्षन्निव तेजसा ॥ ३५ ॥
किं तवापकृतं राजन्वने निवसता मया ।
निक्षेपुरम्भो गुर्वर्थं यदहं ताडितस्त्वया ॥ ३६ ॥
एकेन खलु बाणेन मर्माण्यभिहते मयि ।
द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे ॥ ३७ ॥
तौ नूनं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ ।
चिरमाशाकृतां कष्टां तृष्णां संधारयिष्यतः ॥ ३८ ॥
न नूनं तपसो वास्ति फलयोगः श्रुतस्य वा ।
पिता यद्मां न जानीते शयानं पतितं भुवि ॥ ३९ ॥
जानन्नपि च किं कुर्यादशक्तश्चापरिक्रमः ।
भिद्यमानमिवाशक्तस्त्रातुमन्यो नगो नगं ॥ ४० ॥
पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ।
न त्वामनुदहेत्क्रुद्धो वनमग्निरिवैधितः ॥ ४१ ॥

*

इयमेकपदी राजन्यतो मे पितुराश्रमः ।
तं प्रसाद्य गत्वा त्वं न त्वां स कुपितः शपेत् ॥ ४२ ॥
विशल्यं कुरु मां राजन्मर्म मे निशितः शरः ।
रुणद्धि मृदु सोत्सेधं तीरमम्बुरयो यथा ॥ ४३ ॥
सशल्यः क्लिश्यते प्राणैर्विशल्यो विनशिष्यति ।
इति मामाविशच्चिन्ता तस्य शल्यापकर्षणे ॥ ४४ ॥
दुष्कृतस्य च दीनस्य मम शोकातुरस्य च ।
लक्षयामास हृदये चिन्तां मुनिसुतस्तदा ॥ ४५ ॥
ताम्यमानः स मां कृच्छ्राद्बुवाच परमार्त्तवत् ।
सीदमानो विवृत्ताङ्गश्चेष्टमानो गतः क्षयं ॥ ४६ ॥
संस्तम्भ्य शोकं धैर्येण स्थिरचित्तो भवाम्यहं ।
ब्रह्महत्याकृतं पापं हृदयादपनीयतां ॥ ४७ ॥
न द्विजातिरहं राजन्मा भूत्ते मनसो व्यथा ।
शूद्रायामस्मि वैश्येन जातो जनपदाधिप ॥ ४८ ॥
इतीव वदतः कृच्छ्राद्बाणाभिहतमर्मणः ।
विघूर्णितो विचेष्टस्य वेपमानस्य भूतले ॥ ४९ ॥
तस्य वाताम्यमानस्य तं बाणमहमुद्धरं ।
स मामुद्वीक्ष्य संत्रस्तो ह्रदौ प्राणांस्तपोधनः ॥ ५० ॥

॥ इति दशरथप्राणत्यागे प्रथमः सर्गः ॥

वधमप्रतिरूपं तु मत्वर्षेस्तस्य राघवः ।
प्रलपन्निव धर्मात्मा कौशल्यामिदमब्रवीत् ॥ १ ॥
तदज्ञानान्महत्पापं कृत्वाहं व्याकुलेन्द्रियः ।
एकस्त्वचिन्तयं बुद्ध्या कथं नु सुकृतं भवेत् ॥ २ ॥

ततस्तं घटमादाय पूर्णं परमवारिणा ।
आश्रमं तमहं प्राप यथाख्यातपथं गतः ॥ ३ ॥
तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ ।
अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ॥ ४ ॥
तद्विमित्ताभिरासीनौ कथाभिरपरिश्रमौ ।
तामाशां मत्कृते क्षीणावुपासीनावनाथवत् ॥ ५ ॥
पादशब्दं तु मे श्रुत्वा मुनिर्वाक्यमभाषत ।
किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ॥ ६ ॥
यद्व दत्तमिदं तात सलिले क्रीडता त्वया ।
उत्कण्ठिता ते मातेयं प्रविश क्षिप्रमाश्रमं ॥ ७ ॥
यद्यलीकं कृतं पुत्र मात्रा ते यदिवा मया ।
न तन्मनसि कर्तव्यं त्वया तात तपस्विना ॥ ८ ॥
त्वं गतिस्त्वगतीनां च चक्षुस्त्वं क्षीनचक्षुषां ।
समासक्तास्त्वयि प्राणाः कथं त्वं नाभिभाषसे ॥ ९ ॥
मुनिमव्यक्तया वाचा तमहं सज्यमानया ।
क्षीनव्यञ्जनया प्रेक्ष्य भीतचित्त इवाब्रुवं ॥ १० ॥
मनसः कर्मचेष्टाभिरभिसंस्तभ्य वाग्बलं ।
आचचक्षे वधं तस्मै पुत्रव्यसनजं भयं ॥ ११ ॥
नक्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः ।
सज्जनावमतं दुष्कमिदं प्राप्तं स्वकर्मजं ॥ १२ ॥
भगवंश्चापहस्तोऽहं सरयूतीरमागतः ।
जिघांसुः श्वापदं किंचिद्विपाने वागतं गजं ॥ १३ ॥
ततः श्रुतो मया शब्दो जले कुम्भस्य पूरणे ।
द्विपोऽयमिति मत्वा हि बाणेनाभिहतो मया ॥ १४ ॥

गत्वा नद्यास्ततस्तीरमपश्यमिषुणा हृदि ।
विनिर्भिन्नं गतप्राणं शयानं भुवि तापसं ॥ १५ ॥
ततस्तस्यैव वचनादुपेत्य परितप्यतः ।
स मया सहसा बाण उद्धृतो मर्मतस्तदा ॥ १६ ॥
स चोद्धृतेन बाणेन तत्रैव स्वर्गमास्थितः ।
भगवन्तावुभौ शोचन्वृद्धाविति विलप्य च ॥ १७ ॥
अज्ञानाद्भवतः पुत्रः सहसाभिहतो मया ।
शेषमेवंगते यत्स्यात्तत्प्रसीदतु मे मुनिः ॥ १८ ॥
स तच्छ्रुत्वा वचः क्रूरं मयोक्तमवशंसिना ।
नाशकत्तीव्रमायासमकर्तुं भगवानृषिः ॥ १९ ॥
स बाष्पपूर्णवदनो निःश्वसञ्शोकमूर्छितः ।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितं ॥ २० ॥
यद्येतदशुभं कर्म न स्म मे ऽकथयः स्वयं ।
फलेद्मूर्धा स्म ते राजन्सद्यः शतसहस्रधा ॥ २१ ॥
क्षत्रियेण वधो राजन्वानप्रस्थे विशेषतः ।
ज्ञानपूर्वकृतः स्थानाच्यावयेदपि वज्रिणं ॥ २२ ॥
सप्तधा तु फलेन्मूर्धा मुनौ तपसि तिष्ठति ।
ज्ञानाद्विसृजतः शस्त्रं तादृशे ब्रह्मचारिणि ॥ २३ ॥
अज्ञानाद्धि कृतं यस्मादिदं तेनैव जीवसि ।
अपि क्षत्र कुलं न स्याद्राघवाणां कुतो भवान् ॥ २४ ॥
नय नौ नृप तं देशमिति मां चाभ्यभाषत ।
अद्य तं द्रष्टुमिच्छावः पुत्रं पश्चिमदर्शनं ॥ २५ ॥
रुधिरेणावसिक्ताङ्गं प्रकीर्णाजिनवाससं ।
शयानं भुवि निःसंज्ञं धर्मराजवशं गतं ॥ २६ ॥

अथाब्रुमेकस्तं देशं नीत्वा तौ भृशदुःखितौ ।
अस्पर्शयं कृतं पुत्रं तं मुनिं सह भार्यया ॥ २७ ॥
तं पुत्रमात्मनः स्पृष्ट्वा तमासाद्य तपस्विनं ।
निपेततुः शरीरे ऽस्य पिता चैनमुवाच ह ॥ २८ ॥
नाभिवादयसे माद्य न च मामभिभाषसे ।
किं च शेषे तु भूमौ त्वं वत्स किं कुपितो ह्यसि ॥ २९ ॥
नन्वहं ते प्रियः पुत्र मातरं पश्य धार्मिक ।
किं नु नालिङ्गसे पुत्र सुकुमारवचो वद ॥ ३० ॥
कस्य वापररात्रे ऽहं श्रोष्यामि हृदयंगमं ।
अधीयानस्य मधुरं शास्त्रं वान्यद्विशेषतः ॥ ३१ ॥
को मां संध्यामुपास्यैव स्नात्वा हुतहुताशनः ।
श्लाघयिष्यत्युपासीनः पुत्रशोकभयार्दितं ॥ ३२ ॥
कन्दमूलफलं हृत्वा को मां प्रियमिवातिथिं ।
भोजयिष्यत्यकर्मण्यमप्रयच्छनायकं ॥ ३३ ॥
इमामन्धां च वृद्धां च मातरं ते तपस्विनीं ।
कथं वत्स भरिष्यामि कृपणां पुत्रगर्धिनीं ॥ ३४ ॥
तिष्ठ मा मा गमः पुत्र यमस्य सदनं प्रति ।
श्वो मया सह गन्तासि जनन्या च समेधितः ॥ ३५ ॥
उभावपि च शोकार्त्तावनाथौ कृपणौ वने ।
क्षिप्रमेव गमिष्यावस्त्वया हीनौ यमक्षयं ॥ ३६ ॥
ततो वैवस्वतं दृष्ट्वा तं प्रवक्ष्यामि भारतीं ।
क्षमतां धर्मराजो मे विभृयात्पितरावयं ॥ ३७ ॥
दातुमर्हति धर्मात्मा लोकपालो महायशाः ।
ईदृशस्य ममाक्षय्यामेकामभयदक्षिणां ॥ ३८ ॥

अपापो ऽसि यथा पुत्र निकृतः पापकर्मणा ।
तेन सत्येन गच्छाशु ये लोकाः शस्त्रयोधिनां ॥ ३९ ॥
यां हि शूरा गतिं यान्ति संग्रामेष्वनिवर्तिनः ।
हतास्त्वभिमुखाः पुत्र गतिं तां परमां व्रज ॥ ४० ॥
यां गतिं सगरः शैव्यो दिलीपो ऽनमेनयः ।
नहुषो धुन्धुमारश्च प्राप्तास्तां गच्छ पुत्रक ॥ ४१ ॥
या गतिः सर्वसाधूनां स्वाध्यायात्तपसश्च या ।
भूमिदस्याहिताग्नेश्च एकपत्नीव्रतस्य च ॥ ४२ ॥
गोसहस्रप्रदातॄणां गुरुसेवाभृतामपि ।
देहन्यासकृतां या च तां गतिं गच्छ पुत्रक ॥ ४३ ॥
न हि त्वस्मिन्कुले जातो गच्छत्यकुशलां गतिं ।
स तु यास्यति येन त्वं निकृतो मम बान्धवः ॥ ४४ ॥
एवं स कृपणं तत्र पर्यदेवयतासकृत् ।
ततो ऽस्मै कर्तुमुदकं प्रवृत्तः सह भार्यया ॥ ४५ ॥
स तु दिव्येन रूपेण मुनिपुत्रः स्वकर्मभिः ।
(जातं शरीरमुत्सृज्य) पितरौ वाक्यमब्रवीत् ॥ ४६ ॥
स्थानमस्मि महत्प्राप्तो भवतोः परिचारणात् ।
भवत्यावपि च क्षिप्रं मम मूलमुपैष्यतः ॥ ४७ ॥
एवमुक्ता तु दिव्येन विमानेन वपुष्मता ।
स्वर्गमध्यरुहत्क्षिप्रं शक्रेण सह धर्मविद् ॥ ४८ ॥
स कृत्वोदकं तूर्णं तापसः सह भार्यया ।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितं ॥ ४९ ॥
अद्यैव ब्रूहि मां राजन्मरणे नास्ति मे व्यथा ।
यः शरेणैकपुत्रं मां त्वमकार्षीरपुत्रकं ॥ ५० ॥

त्वया तु यदविज्ञानाद्विक्लवो मे स बालकः ।
तेन त्वामपि शप्स्ये ऽहं सुदुष्वमतिदारुणं ॥ ५१ ॥
पुत्रव्यसनजं दुष्वं यदेतन्मम सांप्रतं ।
एवं त्वं पुत्रशोकेन राजन्कालं करिष्यसि ॥ ५२ ॥
अज्ञानात्तु कृतो यस्मात्तत्त्वात्त्वयेणा त्वया मुनिः ।
तस्मात्त्वां नाविशत्वाशु ब्रह्महत्या नराधिप ॥ ५३ ॥
त्वामप्येतादृशो भावः क्षिप्रमेव गमिष्यति ।
जीवितान्तकरो घोरो दातारमिव दक्षिणा ॥ ५४ ॥
एवं शापं मयि न्यस्य विलप्य करुणां बहु ।
चितामारोप्य देहं तद्विधुनं स्वर्गमभ्ययात् ॥ ५५ ॥
तदेतच्चिन्तयानेन स्मृतं पापं मया स्वयं ।
तदा बाल्यात्कृतं देवि शब्दवेध्यानुशिक्षिणा ॥ ५६ ॥
तस्यायं कर्मणो देवि विपाकः समुपस्थितः ।
अपथ्यैः सह संभुक्ते व्याधिरन्नरसे यथा ॥ ५७ ॥
तस्मान्नामागतं भद्रे तस्योदारस्य तद्वचः ।
यदहं पुत्रशोकेन संत्यक्ष्यामि जीवितं ॥ ५८ ॥
इत्युक्त्वा स रुदंस्त्रस्तो भार्यामाह तु भूमिपः ।
चक्षुर्भ्यां त्वां न पश्यामि कौशल्ये साधु मां स्पृश ॥ ५९ ॥
यदि मां संस्पृशेद्रामः सकृदन्वारभेत वा ।
धनं वा यौवराज्यं वा जीवेयमिति मे मतिः ॥ ६० ॥
न तन्मे सदृशं देवि यन्मया राघवे कृतं ।
सदृशं तत्तु तस्यैव यदनेन कृतं मयि ॥ ६१ ॥
दुर्वृत्तमपि कः पुत्रं त्यजेद्भुवि विचक्षणः ।
कश्च प्रव्राज्यमानो वा नासूयेत्पितरं सुतः ॥ ६२ ॥

चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते ।
हृता वैवस्वतस्यैते कौशल्ये वरयन्ति मां ॥ ६३ ॥
अतस्तु किं दुष्कृतरं यदहं जीवितक्षये ।
न हि पश्यामि धर्मज्ञं रामं सत्यपराक्रमं ॥ ६४ ॥
तस्यादर्शनजः शोकः सुतस्याप्रतिकर्मणः ।
उच्छोषयति वै प्राणान्वारिस्तोकमिवातपः ॥ ६५ ॥
न ते मनुष्या देवास्ते ये चारु शुभकुण्डलं ।
मुखं द्रक्ष्यन्ति रामस्य वर्षे पञ्चदशे पुनः ॥ ६६ ॥
कौशल्ये चित्तमोहेन हृदयं सीदतीव मे ।
वेदये न च संयुक्ताञ्शब्दस्पर्शरसानहं ॥ ६७ ॥
चित्तनाशाद्विपद्यन्ते सर्वाण्येवेन्द्रियाणि मे ।
क्षीणस्नेहस्य दीपस्य संसक्ता रश्मयो यथा ॥ ६८ ॥
अयमात्मभवः शोको मामनाथमचेतनं ।
संसाधयति वेगेन यथा कूलं नदीरयः ॥ ६९ ॥
हा राघव महाबाहो हा ममायासनाशन ।
हा पितृप्रिय मे नाथ हा ममासि गतः सुत ॥ ७० ॥
हा कौशल्ये न पश्यामि हा सुमित्रे तपस्विनि ।
हा नृशंसे ममामित्रे कैकेयि कुलपांसनि ॥ ७१ ॥
इति मातुश्च रामस्य सुमित्रायाश्च संनिधौ ।
राजा दशरथः शोचञ्जीवितान्तमुपागमत् ॥ ७२ ॥

॥ इति दशरथप्राणत्यागे द्वितीयः सर्गः ॥

DAS VI. UND VII. BUCH

AUS

MANU'S GESETZEN.

एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः ।
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ॥ १ ॥
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥ २ ॥
संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदं ।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥ ३ ॥
अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदं ।
ग्रामादरण्यं निःसृत्य निवसेद्नियतेन्द्रियः ॥ ४ ॥
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ।
एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकं ॥ ५ ॥
वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा ।
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥ ६ ॥
यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः ।
अब्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ॥ ७ ॥
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥ ८ ॥
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ।
दर्शमस्कन्दयन्पर्वपौर्णमासं च योगतः ॥ ९ ॥

श्रद्धेष्ट्याग्रायणं चैव चातुर्मास्यानि चाहरेत् ।
उत्तरायणं च क्रमशो दक्षस्यायनमेव च ॥ १० ॥
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव विधिवद्विर्वपेत्पृथक् ॥ ११ ॥
देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः ।
शेषमात्मनि युञ्जीत लवणं च स्वयंकृतं ॥ १२ ॥
स्थलजौदकशाकानि पुष्पमूलफलानि च ।
मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् ॥ १३ ॥
वर्तयेदाशु मांसं च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च ॥ १४ ॥
त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितं ।
जीर्णानि चैव वासांसि शाकमूलफलानि च ॥ १५ ॥
न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ।
न ग्रामजातान्यार्त्तो ऽपि मूलानि च फलानि च ॥ १६ ॥
अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा ।
अश्मकुट्टो भवेद्वापि दन्तोलूखलिको ऽपि वा ॥ १७ ॥
सद्यः प्रक्षालको वा स्यान्मासंचयिको ऽपि वा ।
षड्मासनिचयो वा स्यात्समानिचय एव वा ॥ १८ ॥
नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः ।
चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिकः ॥ १९ ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत् ।
पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् ॥ २० ॥
पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा ।
कालपक्वैः स्वयंशीर्णैर्विधानसमतं स्थितः ॥ २१ ॥

भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनं ।
स्थानासनाभ्यां विक्लेत्सवनेषूपयन्नपः ॥ २२ ॥
ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वब्भ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ॥ २३ ॥
उपस्पृशंस्त्रिसवनं पितॄन्देवांश्च तर्पयेत् ।
तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ॥ २४ ॥
अग्नींश्चात्मनि वैतानान्समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥ २५ ॥
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वमनश्चैव वृक्षमूलनिकेतनः ॥ २६ ॥
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ २७ ॥
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ २८ ॥
एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् ।
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥ २९ ॥
ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः ।
विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥ ३० ॥
अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः ।
आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः ॥ ३१ ॥
आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुं ।
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥ ३२ ॥
वनेषु तु विहृत्यैवं तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥ ३३ ॥

आश्रमादाश्रमं गत्वा अनग्निरनिकेतः ।
मिताशी लघ्वाशी यतेन्द्रियः ।
मित्राबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्धते ॥ ३४ ॥
ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ ३५ ॥
अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ ३६ ॥
अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः ॥ ३७ ॥
प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणां ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ ३८ ॥
यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥ ३९ ॥
यस्माद्णुवपि भूतानां द्विजाद्वेत्पद्यते भयं ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥ ४० ॥
आगाराद्भिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ४१ ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥ ४२ ॥
अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ।
उपेक्षको ऽसंकसुको मुनिर्भावसमाहितः ॥ ४३ ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणं ॥ ४४ ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितं ।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥ ४५ ॥

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ४६ ॥
अतिवादांस्तितिक्षेत नावमन्येत कंचन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ४७ ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ४८ ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ४९ ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ ५० ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ॥ ५१ ॥
कृतकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेदियतो नित्यं सर्वभूतान्यपीडयन् ॥ ५२ ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ ५३ ॥
अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ॥ ५४ ॥
एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्यति ॥ ५५ ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥ ५६ ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ ५७ ॥

अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥ ५८ ॥
अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ ५९ ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥ ६० ॥
अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥ ६१ ॥
विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनं ॥ ६२ ॥
देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवं ।
योनिकोटिसहस्रेषु सृतीश्चास्यात्तरात्मनः ॥ ६३ ॥
अधर्मप्रभवं चैव दुष्खयोगं शरीरिणां ।
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयं ॥ ६४ ॥
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥ ६५ ॥
दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणं ॥ ६६ ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकं ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥ ६७ ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥ ६८ ॥
अह्ना रात्र्या च यान्जन्तून्हिनस्त्यज्ञानतो यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान्षडाचरेत् ॥ ६९ ॥

प्राणायामा ब्राह्मणस्य त्रयो ऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ७० ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ ७१ ॥
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषं ।
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ७२ ॥
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥ ७३ ॥
सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ ७४ ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदं ॥ ७५ ॥
अस्थिस्थूणां स्नायुयुतां मांसशोणितलेपनां ।
चर्मावनद्धां दुर्गन्धिपूर्णां मूत्रपुरीषयोः ॥ ७६ ॥
जराशोकसमाविष्टां रोगायतनमातुरं ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ७७ ॥
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्गाढादिमुच्यते ॥ ७८ ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतं ।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनं ॥ ७९ ॥
यदा भावेन भवति सर्वभावेषु निःस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतं ॥ ८० ॥
अनेन विधिना सर्वांस्त्यक्त्वा सङ्गाञ्शनैः शनैः ।
सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥ ८१ ॥

ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितं ।
न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ॥ ८२ ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥ ८३ ॥
इदं शरणमज्ञानामिदमेव विजानतां ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छतां ॥ ८४ ॥
अनेन क्रमयोगेण परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥ ८५ ॥
एष धर्मोऽनुशिष्टो वो यतीनां नियतात्मनां ।
वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥ ८६ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ ८७ ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिं ॥ ८८ ॥
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ॥ ८९ ॥
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिं ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिं ॥ ९० ॥
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥ ९१ ॥
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणं ॥ ९२ ॥
दश लक्षणानि धर्मस्य ये विप्राः समधीयते ।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिं ॥ ९३ ॥

दशलक्षणकं धर्ममनुतिष्ठन्समाहितः ।
वेदान्तं विधिवच्श्रुत्वा संन्यसेदनृणो द्विजः ॥ ९४ ॥
संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् ।
नियतो वेदमभ्यस्य पुत्रैश्चर्षे सुखं वसेत् ॥ ९५ ॥
एवं संन्यस्य कर्माणि स्वकार्यपरमो ऽस्पृहः ।
संन्यासेनापकृत्यैनः प्राप्नोति परमां गतिं ॥ ९६ ॥
एष वो ऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ।
पुण्यो ऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥ ९७ ॥

॥ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां षष्ठो ऽध्यायः ॥

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
संभवश्च यथा तस्य सिद्धिश्च परमा यथा ॥ १ ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणं ॥ २ ॥
अराजके हि लोके ऽस्मिन्सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥ ३ ॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ ४ ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ ५ ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुं ॥ ६ ॥
सो ऽग्निर्भवति वायुश्च सो ऽर्कः सोमः स धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥ ७ ॥

बालो ऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८ ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणं ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयं ॥ ९ ॥
कार्यं सो ऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥ १० ॥
यस्य प्रसादे पद्माश्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ११ ॥
तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयं ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥ १२ ॥
तस्माद्धर्मं यमिष्टेषु संव्यवस्येद्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥ १३ ॥
तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥ १४ ॥
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्माद्न चलन्ति च ॥ १५ ॥
तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेद्नरेष्वन्यायवर्तिषु ॥ १६ ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥ १७ ॥
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥ १८ ॥
समीक्ष्य स धृतः सम्यक्सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥ १९ ॥

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
जले मत्स्यानिवाक्षिंस्युर्दुर्बलान्बलवत्तराः ॥ २० ॥
अद्यात्काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा ।
स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरं ॥ २१ ॥
सर्वो दण्डजितो लोको दुर्लभो हि सुचिर्नरः ।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ॥ २२ ॥
देवदानवगन्धर्वा रक्षांसि पतगोरगाः ।
ते ऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥ २३ ॥
दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥ २४ ॥
यत्र श्यामो लोहितार्क्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥ २५ ॥
तस्याङ्कः संप्रणेतारं राजानं सत्यवादिनं ।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदं ॥ २६ ॥
तं राजा प्रणयन्सम्यक्त्रिवर्गेणाभिवर्धते ।
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥ २७ ॥
दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः ।
धर्माद्विचलितं हन्ति नृपमेव सबान्धवं ॥ २८ ॥
ततो दुर्गं च राष्ट्रं च लोकं च सचराचरं ।
अन्तरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् ॥ २९ ॥
सो ऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ॥ ३० ॥
शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा ।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ॥ ३१ ॥

स्वराष्ट्रे न्यायवृत्तः स्याद्दृशदण्डश्च शत्रुषु ।
सुहृत्स्वनिन्दः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥ ३२ ॥
एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥ ३३ ॥
अतस्तु विपरीतस्य नृपतेरजितात्मनः ।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥ ३४ ॥
स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः ।
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ॥ ३५ ॥
तेन यद्यत्समर्थेन कर्तव्यं रक्षता प्रजाः ।
तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ॥ ३६ ॥
ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः ।
त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ॥ ३७ ॥
वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् ।
वृद्धसेवी हि सततं वृद्धोभिरपि पूज्यते ॥ ३८ ॥
तेभ्यो ऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः ।
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ॥ ३९ ॥
बहवो ऽविनयाद्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ॥ ४० ॥
वेणो विनष्टो ऽविनयान्नहुषश्चैव पार्थिवः ।
सुदासो यवनश्चैव सुमुखो निमिरेव च ॥ ४१ ॥
पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च ।
कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ॥ ४२ ॥
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीं ।
आन्वीक्षिकीं चात्मविद्यां वार्ताारम्भांश्च लोकतः ॥ ४३ ॥

इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशं ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥ ४४ ॥
दश कामसमुत्थानि तथाष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥ ४५ ॥
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
वियुज्यते ऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ ४६ ॥
मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ ४७ ॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं ।
वाग्दण्डजं च पारुष्यं क्रोधजो ऽपि गणो ऽष्टकः ॥ ४८ ॥
द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः ।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥ ४९ ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥ ५० ॥
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजे ऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥ ५१ ॥
सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः ।
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥ ५२ ॥
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यसन्यधो ऽधो व्रजति स्वर्यात्यव्यसनी मृतः ॥ ५३ ॥
मौलाञ्शास्त्रविदः शूराल्लब्धलक्षान्कुलोद्गतान् ।
सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ॥ ५४ ॥
अपि यत्सुकरं कर्म तदप्येकेन दुष्करं ।
विशेषतो ऽसहायेन किमु राज्यं महोदयं ॥ ५५ ॥

तैः सार्धं चिन्तयेद्नित्यं सामान्यं संधिविग्रहं ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥ ५६ ॥
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक्पृथक् ।
समस्तानां च कार्येषु विदध्याद्धितमात्मनः ॥ ५७ ॥
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता ।
मन्त्रयेत्परमं मन्त्रं राज्ञा षाड्गुण्यसंयुतं ॥ ५८ ॥
नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् ।
तेन सार्धं विनिश्चित्य ततः कर्म समारभेत् ॥ ५९ ॥
अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ॥ ६० ॥
निर्वर्तितास्य यावद्भिरितिकर्तव्यता नृभिः ।
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ॥ ६१ ॥
तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्गतान् ।
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥ ६२ ॥
दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदं ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतं ॥ ६३ ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥ ६४ ॥
अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया ।
नृपतौ कोषराष्ट्रे च दूते संधिविपर्ययौ ॥ ६५ ॥
दूत एव हि संधत्ते भिनत्त्येव च संहतान् ।
दूतस्तत्कुरुते कर्म भिद्यन्ते येन वा न वा ॥ ६६ ॥
स विद्यादस्य कृत्येषु निगूढेङ्गितचेष्टितैः ।
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितं ॥ ६७ ॥

बुद्ध्वा च सर्वं तत्त्वेन परराज्ञचिकीर्षितं ।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत् ॥ ६८ ॥
ज्ञाङ्गलं शस्यसंपन्नमार्यप्रायमनाविलं ।
रम्यमानतसामन्तं स्वाज्ञीव्यं देशमावसेत् ॥ ६९ ॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरं ॥ ७० ॥
सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥ ७१ ॥
त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाश्वराः ।
त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः ॥ ७२ ॥
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः ।
तथार्यो न हिंसन्ति नृपं दुर्गसमाश्रितं ॥ ७३ ॥
एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं दश सहस्राणि तस्माद्दुर्गं विशिष्यते ॥ ७४ ॥
तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥ ७५ ॥
तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः ।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितं ॥ ७६ ॥
तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्वितां ।
कुले महति संभूतां हृद्यां रूपगुणान्वितां ॥ ७७ ॥
पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजं ।
ते ऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ॥ ७८ ॥
यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः ।
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ॥ ७९ ॥

सांवत्सरिकमातिथ्यं राष्ट्रादाहारयेद्बलिं ।
स्याच्चाम्नायपरो लोके वर्तेत पितृवद्नृषु ॥ ८० ॥
अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः ।
ते ऽस्य सर्वाण्ययवेक्षेरन्नृणां कार्याणि कुर्वतां ॥ ८१ ॥
आवृत्तानां गुरुकुलाद्विप्राणां पूतकेा भवेत् ।
नृपाणामक्षयेा ह्येष निधिर्ब्राह्मेा ऽभिधीयते ॥ ८२ ॥
न तं स्तेना न चामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥ ८३ ॥
न स्कन्दते न व्यथते न विनश्यति कर्हिचित् ।
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणास्य मुखे हुतं ॥ ८४ ॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणाब्रुवे ।
प्राधीते शतसाहस्रमनन्तं वेदपारगे ॥ ८५ ॥
पात्रस्य हि विशेषेण श्रद्धानस्यैव च ।
अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलं ॥ ८६ ॥
समोत्तमाधमै राज्ञा स्वाकृतः पालयन्प्रजाः ।
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन् ॥ ८७ ॥
संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनं ।
प्रशूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परं ॥ ८८ ॥
आहवेषु मिथो ऽन्योऽन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥ ८९ ॥
न कूटैरायुधैर्हन्यायुध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥ ९० ॥
न च हन्यात्स्थलारूढं न क्लीवं न कृताञ्जलिं ।
न मुक्तकेशं नासीनं न तवास्मीति वादिनं ॥ ९१ ॥

न सुप्तं न विसंनाहं न नग्नं न निरायुधं ।
नायुध्यमानं पश्यन्तं न परेण समागतं ॥ ९२ ॥
नायुधव्यसनप्राप्तं नार्त्तं नातिपरिक्षतं ।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ॥ ९३ ॥
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ।
भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ ९४ ॥
यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं ।
भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥ ९५ ॥
रथाश्वं हस्तिनं छत्त्रं धनं धान्यं पशून्स्त्रियः ।
सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तद् ॥ ९६ ॥
राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ।
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितं ॥ ९७ ॥
एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः ।
अस्माद्धर्माद्न च्यवेत क्षत्त्रियो घ्नन्रणे रिपून् ॥ ९८ ॥
अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः ।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥ ९९ ॥
एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनं ।
अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः ॥ १०० ॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया ।
रक्षितं वर्धयेद्वृद्ध्या वृद्धं दानेन निक्षिपेत् ॥ १०१ ॥
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ।
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः ॥ १०२ ॥
नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत् ।
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत् ॥ १०३ ॥

अमाययैव वर्तेत न कथंचन मायया ।
बुध्येतारिप्रयुक्तां च मायां नित्यं स्वसंवृतः ॥ १०४ ॥
नास्य च्छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु ।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥ १०५ ॥
बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥ १०६ ॥
एवं विजयमानस्य ये ऽस्य स्युः परिपन्थिनः ।
तानानयेद्वशं सर्वाञ्शामादिभिरुपक्रमैः ॥ १०७ ॥
यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः ।
दण्डेनैव प्रसह्यैताञ्शनकैर्वशमानयेत् ॥ १०८ ॥
शामादीनामुपायानां चतुर्णामपि पण्डिताः ।
शामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥ १०९ ॥
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति ।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ॥ ११० ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सो ऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥ १११ ॥
शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा ।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥ ११२ ॥
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् ।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥ ११३ ॥
द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितं ।
तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहं ॥ ११४ ॥
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा ।
विंशतीशं शतेशं च सहस्रपतिमेव च ॥ ११५ ॥

ग्रामे दोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयं ।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने ॥ ११६ ॥
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् ।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयं ॥ ११७ ॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः ।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥ ११८ ॥
दशी कुलं तु भुञ्जीत विंशी पञ्च कुलानि च ।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरं ॥ ११९ ॥
तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि ।
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः ॥ १२० ॥
नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकं ।
उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहं ॥ १२१ ॥
स ताननुपरिक्रामेत्सर्वानेव सदा स्वयं ।
तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः ॥ १२२ ॥
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः ।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः ॥ १२३ ॥
ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः ।
तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनं ॥ १२४ ॥
राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च ।
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः ॥ १२५ ॥
षण्णो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनं ।
षाण्मासिकस्तथाच्छादो धान्यद्रोणास्तु मासिकः ॥ १२६ ॥
क्रयविक्रयमध्वानं भक्तं च सपरिव्ययं ।
योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् ॥ १२७ ॥

यथा फलेन युज्येत राज्ञा कर्ता च कर्मणां ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् ॥ १२८ ॥
यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥ १२९ ॥
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥ १३० ॥
आददीताथ षड्भागं द्रुमांसमधुसर्पिषां ।
गन्धौषधिरसानां च पुष्पमूलफलस्य च ॥ १३१ ॥
पत्रशाकतृणानां च चर्मणां वैदलस्य च ।
मृन्मयानां च भाण्डानां सर्वस्याश्मनयस्य च ॥ १३२ ॥
म्रियमाणो ऽप्यादद्दीत न राज्ञा श्रोत्रियात्करं ।
न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन् ॥ १३३ ॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति ॥ १३४ ॥
श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत् ।
संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसं ॥ १३५ ॥
संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहं ।
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥ १३६ ॥
यत्किंचिदपि वर्षस्य दापयेत्करसंज्ञितं ।
व्यवहारेण जीवन्तं राज्ञा राष्ट्रे पृथग्जनं ॥ १३७ ॥
कारुकाञ्शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः ।
एकैकं कारयेत्कर्म मासि मासि महीपतिः ॥ १३८ ॥
नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया ।
उच्छिन्दन्ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् ॥ १३९ ॥

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः ।
तीक्ष्णश्चैव मृदुश्चैव राज्ञा भवति संमतः ॥ १४० ॥
अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतं ।
स्थापयेदासने तस्मिन्निग्रहः कार्येक्षणे नृणां ॥ १४१ ॥
एवं सर्वं विधायेदमितिकर्तव्यमात्मनः ।
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥ १४२ ॥
विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति ॥ १४३ ॥
क्षत्रियस्य परो धर्मः प्रजानामेव पालनं ।
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥ १४४ ॥
उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभां ॥ १४५ ॥
तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् ।
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ॥ १४६ ॥
गिरिपृष्ठं समारुह्य प्रासादं वा रहो गतः ।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥ १४७ ॥
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ।
स कृत्स्नां पृथिवीं भुङ्क्ते कोषहीनो ऽपि पार्थिवः ॥ १४८ ॥
जडमूकान्धबधिरांस्तिर्यग्योनान्वयोऽतिगान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान्मन्त्रकाले ऽपसारयेत् ॥ १४९ ॥
भिन्दत्यवमता मन्त्रं तैर्यग्योनास्तथैव च ।
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् ॥ १५० ॥
मध्यंदिने ऽर्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्मकामार्थान्सार्धं तैरेक एव वा ॥ १५१ ॥

परस्परविरुद्धानां तेषां च समुपार्जनं ।
कन्यानां संप्रदानं च कुमाराणां च रक्षणं ॥ १५२ ॥
दूतसंप्रेषणं चैव कार्यशेषं तथैव च ।
अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितं ॥ १५३ ॥
कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः ।
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥ १५४ ॥
मध्यमस्य प्रचारं च विजिगीषोश्च चेष्टितं ।
उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः ॥ १५५ ॥
एताः प्रकृतयो मूलं मण्डलस्य समासतः ।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥ १५६ ॥
अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः ।
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥ १५७ ॥
अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्रमुदासीनं तयोः परं ॥ १५८ ॥
तान्सर्वानभिसंदध्याच्छामादिभिरुपक्रमैः ।
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥ १५९ ॥
संधिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ॥ १६० ॥
आसनं चैव यानं च संधिं विग्रहमेव च ।
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥ १६१ ॥
संधिं तु द्विविधं विद्याद्राजा विग्रहमेव च ।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः ॥ १६२ ॥
समानयानकर्मा च विपरीतस्तथैव च ।
तदावायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः ॥ १६३ ॥

स्वयंकृतश्च कार्यार्थमकाले काल एव वा ।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥ १६४ ॥
एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया ।
संहतस्य च मित्रेण द्विविधं यानमुच्यते ॥ १६५ ॥
क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा ।
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनं ॥ १६६ ॥
बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये ।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥ १६७ ॥
अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः ।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥ १६८ ॥
यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः ।
तदाल्पे चाल्पिकां पीडां तदा संधिं समाश्रयेत् ॥ १६९ ॥
यदा प्रकृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशं ।
अत्युच्छ्रितं तथात्मानं तदा कुर्वीत विग्रहं ॥ १७० ॥
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकं ।
परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥ १७१ ॥
यदा तु स्यात्परिक्षीणो वाहनेन बलेन च ।
तदासीत प्रयत्नेन शनकैः शान्त्वयन्नरीन् ॥ १७२ ॥
मन्येतारिं यदा राजा सर्वथा बलवत्तरं ।
तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः ॥ १७३ ॥
यदा परबलानां तु गमनीयतमो भवेत् ।
तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपं ॥ १७४ ॥
निग्रहं प्रकृतीनां च कुर्याद्यो ऽरिबलस्य च ।
उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा ॥ १७५ ॥

यदि तत्रापि संपश्येद्दोषं संश्रयकारितं ।
सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् ॥ १७६ ॥
सर्वोपायैस्तथा कुर्याद्नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥ १७७ ॥
आयतिं सर्वकार्याणां तदात्वं च विचारयेत् ।
अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः ॥ १७८ ॥
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः ।
अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥ १७९ ॥
यद्येनं नाभिसंदध्युर्मित्रोदासीनशत्रवः ।
तथा सर्वं संविदध्यादेष सामासिको नयः ॥ १८० ॥
यदा तु यानमातिष्ठेदरिराष्ट्रं पति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥ १८१ ॥
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः ।
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलं ॥ १८२ ॥
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयं ।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥ १८३ ॥
कृत्वा विधानं मूले तु यात्रिकं च यथाविधि ।
उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च ॥ १८४ ॥
संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकं ।
सांपरायिककल्पेन यायादरिपुरं शनैः ॥ १८५ ॥
शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत् ।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥ १८६ ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥ १८७ ॥

यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलं ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयं ॥ १८८ ॥
सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत् ।
यतश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशं ॥ १८९ ॥
गुल्मांश्च स्थापयेत्तान्कृतसंज्ञान्समन्ततः ।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥ १९० ॥
संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत् ॥ १९१ ॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले ॥ १९२ ॥
कुरुक्षेत्रांश्च मत्स्यांश्च पञ्चालाञ्शूरसेनकान् ।
दीर्घाञ्छ्मश्रूंश्चैव नरानग्रानीकेषु योधयेत् ॥ १९३ ॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक्परीक्षयेत् ।
चेष्टाश्चैव विजानीयाद्दरान्योधयतामपि ॥ १९४ ॥
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनं ॥ १९५ ॥
भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥ १९६ ॥
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतं ।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः ॥ १९७ ॥
शाम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥ १९८ ॥
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥ १९९ ॥

*

त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे ।
तथा युध्येत संपन्नो विजयेत रिपून्यथा ॥ २०० ॥
जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान् ।
प्रदद्यात्परिहारांश्च ख्यापयेदभयानि च ॥ २०१ ॥
सर्वेषां तु विदित्वैषां समासेन चिकीर्षितं ।
स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियां ॥ २०२ ॥
प्रमाणानि च कुर्वीत तेषां धर्म्यान्यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥ २०३ ॥
आदानमप्रियकरं दानं च प्रियकारकं ।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ॥ २०४ ॥
सर्वं कर्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया ॥ २०५ ॥
सह वापि व्रजेद्युक्तः संधिं कृत्वा प्रयत्नतः ।
मित्रं हिरण्यं भूमिं वा संपश्यंस्त्रिविधं फलं ॥ २०६ ॥
पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रन्दं च मण्डले ।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् ॥ २०७ ॥
हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते ।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमं ॥ २०८ ॥
धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते ॥ २०९ ॥
प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तं च कष्टमाजरयिं बुधाः ॥ २१० ॥
आर्यता पुरुषज्ञानं शौर्यं करुणावेदिता ।
स्थैर्यलक्ष्यं च सततमुदासीनगुणोदयः ॥ २११ ॥

क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि ।
परित्यजेदृषो भूमिमात्मार्थमविचारयन् ॥ २१२ ॥
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ २१३ ॥
सह सर्वाः समुत्पन्ना प्रसमीक्ष्यापदो भृशं ।
संयुक्तांश्च वियुक्तांश्च सर्वोपायान्प्रकल्पयेत् ॥ २१४ ॥
उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः ।
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ॥ २१५ ॥
एवं सर्वमिदं राज्ञा सह संमन्त्र्य मन्त्रिभिः ।
व्यायाम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् ॥ २१६ ॥
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्यान्नित्यैर्विषापहैः ॥ २१७ ॥
विषघ्नैरगदैश्चास्य सर्वद्रव्याणि योजयेत् ।
विषघ्नानि च रत्नानि नियतो धारयेत्सदा ॥ २१८ ॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेशाभरणसंयुक्ताः स्पृशेयुः सुसमाहिताः ॥ २१९ ॥
एवं प्रयत्नं कुर्वीत यानशय्यासनाशने ।
स्नाने प्रसाधने चैव सर्वालंकारकेषु च ॥ २२० ॥
भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् ॥ २२१ ॥
अलंकृतश्च संपश्येदायुधीयं पुनर्जनं ।
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥ २२२ ॥
संध्यां चोपास्य प्रणुयादस्तंवेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितं ॥ २२३ ॥

गत्वा कक्षान्तरं वन्यत्समनुज्ञाप्य तं ज्ञनं ।
प्रविशेद्भोजनार्थं च स्त्रीवृतो ऽन्तःपुरं पुनः ॥ २२४ ॥
तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥ २२५ ॥
एतद्विधानमातिष्ठेद्रोगः पृथिवीपतिः ।
अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत् ॥ २२६ ॥

॥ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां सप्तमो ऽध्यायः ॥

FABELN AUS DEM HITOPADEÇA.

I. (I. 2.)

DER WANDERER UND DER TIGER.

अस्मिन्नेकदा दक्षिणारण्ये चरन्नपश्यं । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते । भो भोः पान्थाः । इदं सुवर्णकङ्कणं गृह्यतां । तद्वचनमाकर्ण्य भयात्को ऽपि तत्पार्श्वं न भजते । ततो लोभाकृष्टेन केनचित्पान्थेनालोचितं । भाग्येनैतत्संभवति । किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया । यतः ।

अनिष्टादिष्टलाभे ऽपि न गतिर्न्यायते शुभा ।
यत्रास्ति विषसंसर्गो ऽमृतं तदपि मृत्यवे ॥ १ ॥

किंतु सर्वत्रार्थार्जने संदेह एव । तथा चोक्तं ।

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ २ ॥

तद्विद्रूपयामि तावत् प्रकाशं ब्रूते । कुत्र तव कङ्कणं । व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत् कथं मात्मके वयि विश्वासः । व्याघ्र उवाच । शृणु रे पान्थ । प्रागेव यौवनदशायामतिदुर्वृत्तोऽस्मि । अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च वंशक्षीनश्चाहं । ततः केनचिदहमादिष्टः । दानधर्मादिकं चरतु भवान् तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः । यतः ।

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ ३ ॥
अत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ ४ ॥

मम चैतावाँल्लोभविरहः । येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । किंतु तथापि व्याघ्रो मानुषं खादतीति लोकप्रवादो दुर्निवारः । यतः ।

गतानुगतिको लोकः कुट्टनीमुपदेशिनीं ।
प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजं ॥ ५ ॥

मयापि धर्मशास्त्राण्यधीतानि । शृणु ।

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ॥ ६ ॥

अपरं च ।

प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ ७ ॥

अन्यच्च ।

मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥ ८ ॥

वं चातिदुर्गतः। तेन तत्तुभ्यं दातुं सयत्नो ऽहं। तथा चोक्तं।

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनं।
व्याधितस्यौषधं पथ्यं नीरुजस्तु किमौषधैः॥ ९॥

अन्यच्च।

दातव्यमिति यद्दानं दीयते ऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं॥ १०॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं प्रतिगृह्याण। ततो यावद्सौ तद्वचःप्रतीतो लोभात्सरसि स्नातुं प्रविशति। तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रो ऽवदत् अरेरे महापङ्के पतितो ऽसि। अतस्त्वामुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थो ऽचिन्तयत्

न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः॥ ११॥

किं च।

अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना॥ १२॥

तन्नया भद्रं तद्र कृतं। यदत्र मारात्मके विश्वासः कृतः। तथा चोक्तं।

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥ १३॥

अपरं च।

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।
अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते॥ १४॥

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च।

II. (I. 3.)

DIE GAZELLE, DER SCHAKAL UND DIE KRÆHE.

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरादुत्कता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन्पुष्टाङ्गः शृगालेनालोकितः । तमालोक्याचिन्तयत् अाः कथमेतन्मांसं सुललितं भक्षयामि । भवतु । विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् मित्र । कुशलं ते । मृगेणोक्तं । कस्त्वं । स ब्रूते । क्षुद्रबुद्धिनामा ज्ञम्बुको ऽहमत्रारण्ये बन्धुहीनो मृतवद्विवसामि । इदानीं भवन्तं मित्रमासाद्य पुनः सबन्धुर्लोकं प्रविष्टो ऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यं । मृगेणोक्तं । एवमस्तु । ततो ऽस्तं गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य मित्रं निवसति । तौ दृष्ट्वा काको ऽवदत् सखे चित्राङ्ग । को ऽयं द्वितीयः । मृगो ब्रूते । ज्ञम्बुको ऽयमस्मत्सख्यमिच्छन्नागतः । काको ब्रूते । मित्र । अकस्मादागन्तुना सह विश्वासो न युक्तः । इत्याकर्ण्य ज्ञम्बुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एव । तद्भवता सह कथमद्य यावदेतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्तते ।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डो ऽपि द्रुमायते ॥ १ ॥

अन्यच्च ।

अयं निजः परो वेति गणना लघुचेतसां ।
उदारचरितानां तु वसुधैव कुटुम्बकं ॥ २ ॥

यथायं मृगो मम बन्धुः । तथा भवानपि । मृगो ऽब्रवीत् किमनेनोत्तरोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयतां । यतः ।

न कश्चित्कस्यचिद्मित्रं न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ३ ॥

काकेनोक्तं । एवमस्तु । अथ प्रातः सर्वे यथाभिमतदेशं गताः । एकदा तेन जम्बुकेन सुनिभृतमुक्तं । सखे । अस्मिन्वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति । तदहं त्वां तत्र नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति । अथ क्षेत्रपतिना तद्दृष्ट्वा पाशास्तत्र नियोजिताः । अनन्तरं पुनरागतो मृगः पाशैर्बद्धो ऽचिन्तयत् को मामितः कालपाशादिव व्याधपाशान्मातुं मित्रादन्यः समर्थः । अत्रान्तरे जम्बुकस्तत्रोपस्थितो ऽचिन्तयत् फलितं तावदस्माकं कपटप्रबन्धेन । मनोरथसिद्धिरपि वाञ्छित्यादद्य भविष्यति । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । मृगस्तं दृष्ट्वोल्लासितं ब्रूते । सखे । क्षिप्रं मम बन्धनं । सत्वरं त्रायस्व मां । यतः ।

आपत्सु मित्रं जानीयाद्युद्धे शूरमृणे शुचिं ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ ४ ॥

अपरं च ।

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ५ ॥

जम्बुकः मुहुर्मुहुः पाशं विलोक्याचिन्तयत् दृढस्तावदयं बन्धः । ब्रूते च । सखे । स्नायुनिर्मिता एते पाशाः । तदद्य भट्टारकद्वारे कथमेतान्दन्तैः स्पृशामि । मित्र । यदि नान्यथा मन्यसे । तदा प्रभाते यद्वयोच्यते तन्मया कर्तव्यं । इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स्थितः सः । अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततो ऽन्विष्य तथाविधं दृष्ट्वोवाच । सखे । किमेतद् मृगेणोक्तं । अवधीरितसुहृद्वाक्यस्य फलमेतद् तथा चोक्तं ।

सुहृदां हितकामानां यः शृणोति न भाषितं ।
विपत्संनिहिता तस्य स नरः शत्रुनन्दनः ॥ ६ ॥

दीपनिर्वाणगन्धं च सुकृद्वाक्यमरुन्धतीं ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥ ७ ॥

काको ब्रूते । स वञ्चकः क्व । मृगेणोक्तं । मद्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते । मित्र । उक्तमेव मया पूर्वं ।

अपराधो न मे ऽस्तीति नैतद्विश्वासकारणं ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ ८ ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनं ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखं ॥ ९ ॥

ततः काको दीर्घं निःश्वस्य । अरे वञ्चक । किं त्वया पापकर्मणा कृतं । यतः ।

संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानां ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥ १० ॥

अन्यच्च ।

उपकारिणि विश्रब्धे प्रुद्धमतौ यः समाचरति पापं ।
तं जननसत्यसंधं भगवति वसुधे कथं वहसि ॥ ११ ॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करं ॥ १२ ॥
दुर्जनः परिहर्तव्यो विद्ययालंकृतो ऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ १३ ॥

अथवा स्थितिरियं दुर्जनानां ।

प्राक्पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रं ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मसकः करोति ॥ १४ ॥

तथा च ।

दुर्जनः प्रियवादी च नैतद्विश्वासकारणं ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषं ॥ १५ ॥

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन्काकेनावलोकितः। तमालोक्य काकेनोक्तं । मित्र । त्वमात्मानं मृतवत्संदर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ। यदाहं शब्दं करोमि । तदा त्वमुत्थाय सत्वरमपसरिष्यसि । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । आः स्वयं मृतो ऽयं । इत्युक्त्वा मृगं बन्धनादुच्चयित्वा पाशान्संगृह्णितुं सयत्नो बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य क्षेत्रपतिना लगुडः प्रक्षिप्तः । तेन प्रहारेण शृगालो हतः । तथा चोक्तं ।

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ १६ ॥

अतो ऽहं ब्रवीमिः

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
शृगालात्पाशबद्धो ऽसौ मृगः काकेन रक्षितः ॥ १७ ॥

III. (I. 4.)

DER BLINDE GEIER, DIE KATZE UND DIE VŒGEL.

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकादुल्लितनयनो जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणाः स्वाहारात्किंचित्किंचिद्ददति। तेनासौ जीवति। अथ कदाचिद्दीर्घकर्णो नाम मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयाकुलैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तं।

को ऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह । हा हतो ऽस्मि । अधुनास्य संनिधाने पलायितुमक्षमः । तथा भवितव्यं । तथा भवतु । तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् आर्य । त्वामभिवन्दे । गृध्रो ऽवदत् कस्त्वं । सो ऽब्रवीत् मार्जारो ऽहं । गृध्रो ब्रूते । तद्दूरमपसर । नो चेत् हन्तव्यो ऽसि मया । मार्जारो ऽवदत् श्रूयतां तावन्मद्वचनं । ततो यद्यहं वध्यः । तदा हन्तव्यः । यतः ।

ज्ञातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्यो ऽथवा भवेत् ॥ १ ॥

गृध्रो ब्रूते । ब्रूहि । किमर्थमागतो ऽसि । सो ऽवदत् अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतं चरंस्तिष्ठामि । युष्मांश्च धर्मज्ञानरतान्विश्वासभूमयः पक्षिणः सर्वे सर्वदा समाग्रे प्रस्तुवन्ति । अतः भवद्भो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञाः । यन्नामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः ।

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगताच्छायां नोपसंहरते द्रुमः ॥ २ ॥

यदि वा धनं नास्ति । तदा प्रीतिवचसाप्यतिथिः पूज्यः । यतः ।

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ३ ॥

अन्यच्च ।

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥ ४ ॥

तथा चोक्तं ।

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ ५ ॥

उत्तमस्यापि वर्णस्य नीचो ऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयो ऽतिथिः ॥ ६ ॥

गृध्रो ऽवदत् मार्जारा हि मांसरुचयः । पक्षिशावकाश्चात्र निवसन्ति । तेनैवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतमध्यवसितं । यतः परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्रैकमत्यं । यतः ।

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ७ ॥

अन्यच्च ।

एक एव सुहृद्धर्मो निधने ऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥ ८ ॥

किं च ।

यो ऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरं ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥ ९ ॥

अपि च ।

मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते ।
शक्यस्तेनानुमानेन परो ऽपि परिरक्षितुं ॥ १० ॥

शृणु पुनः ।

स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत् ॥ ११ ॥

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि । तैः शोकार्त्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारस्तैरुलक्ष्यमाणः कोटराद्विःसृत्य पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपय-

द्विस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं त ऊचुः । अनेनैव ऋक्षवेनास्माकं शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य मेलकं कृत्वा गृध्रो व्यापादितः । अतो ऽहं ब्रवीमि ।

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो ऋक्षवः ॥ १२ ॥

IV. (I. 7.)

DER JÆGER, DIE GAZELLE, DER EBER UND DER SCHAKAL.

अस्ति कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धः सन्मृगमन्विष्यमाणो धनुरादाय विन्ध्याटवीमध्यं गतः । ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेण हतः । शूकरेणापि घनघोरगर्जनं कृत्वा मुष्कदेशे हतः स च्छिन्नद्रुम इव भूमौ पपात । यतः ।

जलमग्निं विषं शस्त्रं क्षुधा वा पतनं गिरेः ।
निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते ॥ १ ॥

अत्रान्तरे दीर्घरावो नाम शृगालः परिभ्रमन्नाहारार्थी तान्मृतान्मृगव्याधशूकरानवलोकयामास । आलोक्याचिन्तयत् अहो अद्य महद्भोज्यं मे समुपस्थितं । किं च ।

अचिन्तितानि दुःखानि यथैवायान्ति देहिनां ।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ २ ॥

भवतु । एषां मांसैर्मासत्रयं समधिकं भोजनं मे भविष्यति । ततः प्रथमबुभुक्षायां तावदिमानि स्वादूनि मांसानि विहाय कोदण्डाटनीलग्नं स्नायुबन्धं खादा-

मि । इत्युक्ता तथाकरोत् ततश्छिन्ने स्नायुबन्धे द्रुतमुत्पतितेन धनुषा कुक्षि भिन्नः स दीर्घरावः पञ्चत्वं गतः । अतो ऽहं ब्रवीमि ।

कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः ।
पश्य संचयशीलो ऽसौ धनुषा ज्याम्बुको हतः ॥ ३ ॥

V. (I. 8.)

DER PRINZ UND DIE FRAU DES KAUFMANNSSOHNES.

अस्ति कान्यकुब्जविषये राज्ञा वीरसेनो नाम । तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः । स च महाधनस्तरुणा एकदा स्वनगरं भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूमालोकयामास । ततः स्वकर्म्यं गत्वा स्मराकुलितमतिस्तस्याः कृते द्रुतीं प्रेषितवान् सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहारजर्जितहृदया तदेकचित्ताभवत् तथा चोक्तं ।

न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवं ॥ १ ॥

अथ द्रुतीवचनं श्रुत्वा लावण्यवत्युवाच । अहं पतिव्रता परपुरुषस्पर्शमात्रमपि न करोमि । यतः ।

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ २ ॥
न सा भार्येति विख्याता यस्यां भर्ता न तुष्यति ।
अग्निसाक्षिकमर्यादो भर्ता हि शरणं स्त्रियाः ॥ ३ ॥

ततो यद्यदादिशति मे प्राणेश्वरः । तत्तदेवाहमविचारितं करोमि । द्रुत्योक्तं । सत्यमेतद् लावण्यवत्युवाच । सत्यमेवैतद् तत्सर्वमेव द्रुत्या गत्वा तुङ्गबलस्य

निवेदितं। तच्छ्रुत्वा तुङ्गबलो ऽवदत् स्वामिनानीय समर्पयितव्येति कथमेतच्छक्यं। कुदृन्याह। उपायः क्रियतां। ततः कुदृन्युपदेशेन तं चारुदत्तनामानं वणिक्पुत्रं स राजपुत्रः सेवकं चकार। ततो ऽसौ तेन सर्वविश्वासकार्येषु नियुज्यते। तत्रैकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकालंकारधारिणोक्तं। मया मासमेकं यावद्धौरीव्रतं कर्तव्यं। तदद्यारभ्य प्रतिरात्रमेकां कुलीनां युवतीमानीय समर्पय। सा मया यथोचितेन विधिना पूजयितव्या। ततः स चारुदत्तस्तथाविधां तरुणीमानीय समर्पयति। पश्चात्प्रच्छन्नः किमयं करोतीति निरूपयति। स च तुङ्गबलस्तां युवतीमस्पृशन्नेव वस्त्रालंकारैः संपूज्य रत्नकं दत्त्वा तत्क्षणं प्रस्थापयति। अथ वणिक्पुत्रेण तद्दृष्ट्वोपजातविश्वासेन लोभाकृष्टचेतसा स्ववधूरानीय समर्पिता। स च राजपुत्रस्तां हृदयप्रियां लावण्यवतीं परिज्ञाय ससंभ्रममुत्थाय निर्दयमालिङ्गयानन्दनिमीलितलोचनः पर्यङ्के तया सह विललास। तदालोक्य वणिक्पुत्रश्चित्रलिखित इव इतिकर्तव्यतामूढः परं विषादमगमत्।

VI. (I. 9.)

DER ELEPHANT UND DER SCHAKAL.

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमालोक्य सर्वे शृगालाश्चिन्तयन्ति। यद्ययं केनाप्युपायेन मार्यते। तदास्माकमेतद्देहेन मासचतुष्टयस्य स्वेच्छाभोजनं भविष्यति। तत एकेन वृद्धशृगालेन प्रतिज्ञातं। मया बुद्धिप्रभावादेवैतन्मरणं साधयितव्यं। अनन्तरं स वञ्चकः कर्पूरतिलकसकाशं गत्वा साष्टाङ्गपातं प्रणम्योवाच। देव। दृष्टिप्रसादं कुरु। हस्ती ब्रूते। कस्त्वं। कुतः समायातः। सो ऽवदत् जम्बुको ऽहं सर्वैर्वनवासिभिर्मिलित्वा भवत्सकाशं प्रस्थापितः। यद्विना राज्ञावस्थातुं न युक्तं। तदत्राटवीराज्ये ऽभिषेक्तुं भवान्सर्वस्वामिगुणोपेतो निरूपितः। यतः।

यः कुलाभिज्ञनाचारैरतिशुद्धः प्रतापवान् ।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ १ ॥

अपरं च पश्य ।

राज्ञानं प्रथमं विन्देत्ततो भार्यां ततो धनं ।
राज्ञन्यसति लोके ऽस्मिन्कुतो भार्या कुतो धनं ॥ २ ॥

अन्यच्च ।

पर्ज्जन्य इव भूतानामाधारः पृथिवीपतिः ।
विकले ऽपि हि पर्ज्जन्ये जीव्यते न तु भूपतौ ॥ ३ ॥

किं च ।

नियतविषयवर्त्ती प्रायशो दण्डयोगा-
ज्जगति परवशे ऽस्मिन्दुर्लभः साधुवृत्तः ।
कृशमतिविकलं वा व्याधितं बाधनं वा
पतिमपि कुलनारी दण्डभीत्याभ्युपैति ॥ ४ ॥

तथा लग्नवेला न चलति । तथा कृत्वा सत्वरमागम्यतां देवेन । इत्युक्त्वोत्थाय जम्बुकश्चलितः । ततो ऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन्महापङ्के निमग्नः । दृष्टिनोक्तं । सखे शृगाल । किमधुना विधेयं । महापङ्के पतितो ऽहं । शृगालेन विहस्योक्तं । देव । मम पुच्छे करावलम्बनं कृत्वोत्तिष्ठ । यस्य वचसि त्वया विश्वासः कृतः । तस्य फलमेतद् तथा दृष्टं ।

यदि सत्संगरहितो भविष्यसि भविष्यसि ।
तदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ ५ ॥

ततो महापङ्कनिमग्नो दृष्टी शृगालैर्भक्षितः । अतो ऽहं ब्रवोमि ।

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
शृगालेन कृतो दृष्टी गच्छता पङ्कवर्त्मना ॥ ६ ॥

VII. (II. 2.)

DER AFFE UND DER KEIL.

अस्ति मगधदेशे धर्मारण्यसंनिक्तिवसुधायां शुभदत्तनामा कायस्थः । तेन विक्रारः कारयितुमारब्धः । तत्र करपत्त्रविदार्यमाणास्तम्भस्य कियद्दूरस्फाटितस्य काष्ठखण्डद्वयमध्ये कीलकः सूत्रधारेण स्थापितः । तत्र सायाह्ने वनवासी वानरयूथः क्रीडन्नागतः । तेषेको वानरः कालदण्डप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टः । ततस्तस्य मुष्कद्वयं लम्बमानं काष्ठखण्डद्वयाभ्यन्तरे प्रविष्टं । अनन्तरं स च सहजचपलतया महता प्रयत्नेन तं कीलकमाकृष्टवान् आकृष्टे सति काष्ठाभ्यां चूर्णिताण्डद्वयः पञ्चत्वं गतः । अतो ऽहं ब्रवीमि ।

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स भूमौ निक्तः शेते कीलोत्पाटीव वानरः ॥ १ ॥

VIII. (II. 3.)

DER DIEB, DER ESEL UND DER HUND.

अस्ति वाराणस्यां कर्पूरपटो नाम रजकः । स चैकदाभिनववयस्कया कान्तया सह चिरात्केलिं कृत्वा निर्भरं प्रसुप्तः । तदनन्तरं द्रव्याणि हर्तुं तद्गृहं चौरः प्रविष्टः । तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति कुक्कुरश्चोपविष्टः । अथ गर्दभः श्वानमाह । तव तावदयं व्यापारः । तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि । कुक्कुरो ब्रूते । मम नियोगस्य चर्चा किं त्वया कर्तव्या । त्वमेव जानासि । यथाहमेतस्याहर्निशं गृहरक्षां करोमि । ततो ऽयं चिराद्विवृतो ममोपयोगं न जानाति । तेनाधुना ममाहारदाने ऽपि मन्दादरः । यतो विना विधुरदर्शनं स्वामिनो ऽनुजीविषु मन्दादरा भवन्ति । गर्दभो ब्रूते । शृणु रे वर्वर ।

याचते कार्यकाले यः स किं भृत्यः स किं सुहृद् ।

कुक्कुरो ब्रूते ।

यो न संभावयेद्भृत्यान्कार्यकाले स किं प्रभुः ॥ १ ॥

यतः ।

आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।

पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ २ ॥

ततो गर्दभः सकोपमाह । पापीयांस्त्वं । यद्विपत्तौ स्वामिकार्योपेक्षां करोषि । भवतु । यथा स्वामी जागर्त्ति । तथा मया कर्तव्यं । यतः ।

पृष्ठतः सेवयेद्वर्कं जठरेण हुताशनं ।

स्वामिनं सर्वभावेन परलोकमनायया ॥ ३ ॥

इत्युक्ता स चीत्कारशब्दं कृतवान् ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राविमर्दकोपाद्उत्थाय गर्दभं लगुडेन ताडयामास । अतो ऽहं ब्रवीमि ।

पराधिकारचर्चां यः कुर्यात्स्वामिहितेच्छया ।

स विषीदति चोत्कारात्ताडितो गर्दभो यथा ॥ ४ ॥

IX. (II. 4.)

DER LŒWE, DIE MAUS UND DIE KATZE.

अस्त्यर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः । तस्य पर्वतकुहरमधिशयानस्य केशराग्रं प्रत्यहं कश्चिन्मूषिकश्छिनत्ति । स सिंहः केशराग्रं लूनं दृष्ट्वा कुपितस्तं विवरान्तर्गतं मूषिकमलभमानो ऽचिन्तयत् किमत्र विधेयं । यतः

दुष्टशत्रुर्भविष्यस्तु विक्रमाद्दैव लभ्यते ।

तं निहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥ १ ॥

इत्यालोच्य तेन सिंहेन ग्रामं गत्वा दधिकर्णनामा विडालो मांसाद्याहारं दत्त्वा प्रयत्नादानीय स्वकन्दरे धृतः। ततस्तद्भयान्मूषिको न बहिर्निःसरति। तेनासौ सिंहो ऽक्षतकेशरः सुखं स्वपिति। मूषिकशब्दं यदा यदा शृणोति। तदा तदा मांसाहारदानेन तं विडालं संवर्धयति। अथैकदा स मूषिकः क्षुधा पीडितो बहिश्चरन्मार्जारेण प्राप्तो व्यापादितश्च। अनन्तरं स सिंहो यदा कदाचिदपि तस्य मूषिकस्य शब्दं न शुश्राव। तदोपयोगाभावाद्विडालस्याहारदाने मन्दादरो बभूव। ततो ऽसौ दधिकर्णो ऽप्याहाराभावाद्दुर्बलो ऽभवत् अतो ऽहं ब्रवीमि।

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत्॥ २॥

X. (II. 5.)

DIE KUPPLERIN UND DIE GLOCKE.

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराभिधानं नगरं। तत्प्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः खादितश्च। तत्पाणितः पतिता घण्टा वानरैः प्राप्ता। ते वानरास्तां घण्टामनुक्षणं वादयन्ति। ततो तद्ग्रामवासिजनैः स मानुषः खादितो दृष्टः। प्रतिक्षणं घण्टावादश्च श्रूयते। अनन्तरं घण्टाकर्णः कुपितो मानुषं खादतीत्युक्ता जनाः सर्वे नगरात्पलायिताः। ततः कुटिन्या बकुशो विमृश्य वानरो घण्टां वादयतीति स्वयं परिज्ञाय राज्ञा विज्ञापितः। देव। यदि धनोपनयः क्रियते। तदा घण्टाकर्णमिमं साधयामि। ततो राज्ञा धनं दत्त्वा प्रस्थापिता। कुटिन्या च मण्डलपुन्नागणचक्रादिभिराश्चर्यगौरवं दर्शयित्वा स्वयं वानरप्रियफलानि समादाय वनं प्रविश्य फलान्यवकीर्णानि।

ततो घण्टां परित्यज्य वानराः सर्वे फलासक्ता बभूवुः । कुट्टिनी घण्टा-मादाय समागता । ततः सा सकललोकपूज्याभवत् अतो ऽहं ब्रवीमि ।

शब्दमात्राद्न भेतव्यमज्ञात्वा शब्दकारणं ।
शब्दकेतुं परिज्ञाय कुट्टिनी गौरवं गता ॥ १ ॥

XI. (II. 9.)

DIE FRAU DES KUHHIRTEN UND IHRE BEIDEN LIEBHABER.

अस्ति द्वारावत्यां नगर्यां कस्यचिद्गोपस्य वधूर्वन्धकी । सा च ग्रामणीाख्येन दण्डनायकेन तत्पुत्रेण च समं रमते । तथा चोक्तं ।

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ १ ॥

अन्यच्च ।

न दानेन न मानेन नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा विषमाः स्त्रियः ॥ २ ॥

ततः कदाचिदसौ दण्डनायकपुत्रेण सह रममाणा तिष्ठति । अथ दण्डनायको ऽप्यागतः । तं दृष्ट्वा तत्पुत्रं कुम्भूले धृत्वा दण्डनायकेन समं तथैवाक्रीडत् अनन्तरं तस्या भर्ता गोष्ठात्समागतः । तमालोक्य गोप्योक्तं । दण्डनायक । त्वं लगुडं गृहीत्वा कोपं दर्शयन्सत्वरं याहि । तेन तथानुष्ठिते सति गोपालेन स्वगृहमागत्य भार्या पृष्टा । केन कार्येणात्र दण्डनायकः समागतः । सा ब्रूते । अयं केनापि कारणेन पुत्रस्योपरि क्रुद्धः । स च मार्ग्यमाणो ऽत्रागत्य प्रविष्टः । ततो मया कुम्भूले निक्षिप्य रक्षितः पित्रा चान्विष्यता गृहे न दृष्टः । अतो ऽयं कुपित एव गच्छति । ततः सा तत्पुत्रं कुम्भूलादवतार्य स्वामिनं दर्शितवती । तथा चोक्तं ।

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ ३ ॥

अतो ऽहं ब्रवीमि ।

उत्पन्नेष्वपि कार्येषु मतिर्यस्य न क्षीयते ।
स निस्तरति दुर्गाणि गोपी आरुढयं यथा ॥ ४ ॥

XII. XIII. (II. 10, 11.)

DIE KRÆHE UND DIE SCHLANGE.

DER ELEPHANT UND DER HASE.

कस्मिंश्चित्तरौ वायसदंपती निवसतः । तयोश्चापत्यानि तरुकोटरे ऽवस्थित-कृष्णसर्पेण खादितानि । ततः पुनर्गर्भवती वायसी ब्रूते । स्वामिन् त्यज्यतामयं तरुः । अत्रैतस्मात्कृष्णसर्पादावयोः संततिर्न भविष्यति कदाचित् यतः ।

दुष्टा भार्या शठं मित्रं भृत्याश्चोत्तरदायकाः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ १ ॥

वायसो ऽवदत् प्रिये । न भेतव्यं । वारं वारं मयैतस्यापराधः सोढः । इदानीं निग्रहीतव्यः । वायस्याह । कथमनेन बलवता सार्धं भवान्निग्रहीतुं समर्थः । वायसो ब्रूते । अलमनया शङ्कया । यतः ।

बुद्धिर्यस्य बलं तस्य अबुधस्य कुतो बलं ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ २ ॥

वायस्याह । कथमेतद् वायसः कथयति । अस्ति मन्दराभिधाने पर्वते दुर्गा-लो नाम सिंहः । स च पशूनां वधं सदा विदधान एव तत्रास्ते । ततः सर्वैः पशुभिर्मिलित्वा सिंहो विज्ञप्तः । स्वामिन् किमिति सर्वपशूच्छेदः क्रियते । वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः । सिंहेनोक्तं । भवत्वेवं ।

ततः प्रभृत्येकैकं पशुं सभयमुपनयन्ति ते । अथ कदाचिद्दुःशशकस्य वारः समायातः । सो ऽचिन्तयत् ।

प्राणक्षेतोस्तु विनयः क्रियते जीविताशया ।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ ३ ॥

तन्मन्दं मन्दमुपसर्पामि । इत्युपगच्छति सः । अथ तमालोक्य सिंहो ऽपि क्षुधा पीडितः कोपाद्उवाच । कुतस्त्वं विलम्ब्यागतो ऽसि । सो ऽब्रवीत् नायं ममापराधः । पथि सिंहान्तरेण बलाद्धृतः सम्पुनरागमनाय शपथं कृत्वा स्वामिनं तद्विवेदयितुमत्रागतः । सिंहः सकोपमाह । सत्वरं गत्वा दर्शय । क्वासौ दुरात्मा तिष्ठति । ततः शशकस्तं दृप्तं गृहीत्वा गम्भीरकूपसमीपं गतः । अत्रागत्य पश्यतु स्वामीत्युक्त्वा तस्मिन्कूपजले तस्यैव सिंहस्य प्रतिबिम्बं दर्शितवान् अतो ऽसौ दर्पाध्मातः कोपात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः । अतो ऽहं ब्रवीमि । बुद्धिर्यस्य बलं तस्येत्यादि ।

वायस्याह । सर्वमेतच्छ्रुतं मया । इदानीं यत्कर्तव्यं । ब्रूहि । वायसो ऽवदत् अत्रासन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति । स्नानसमये तदङ्गादवतारितकनकसूत्रं दृष्ट्वा धृत्वानीयास्मिन्कोटरे धरिष्यसि । अथ कनकसूत्रानुसरणप्रवृत्तैः राजपुरुषैः कोटरे निरूप्यमाणो स कृष्णसर्पो द्रष्टव्यो व्यापादयितव्यश्च । अथ कदाचित्स्नातुं जलं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितं । तथानुष्ठिते तद्वृत्तं । अतो ऽहं ब्रवीमि ।

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काकी कनकसूत्रेण कृष्णसर्पमघातयत् ॥ ४ ॥

XIV. (II. 12.)

DAS WASSERHUHN UND DAS MEER.

कदाचित्समुद्रतीरे टिट्टिभदंपती निवसतः । तत्र टिट्टिभी चासन्नप्रसवा भर्तारमाह । नाथ । प्रसवयोग्यं निभृतस्थानमन्विष्यतां । टिट्टिभो ऽवदत् भार्ये । नन्विदमेव स्थानं प्रसूतियोग्यं । सा ब्रूते । समुद्रवेलया स्थानमेतद्व्याप्यते । सो ऽब्रवीत् भद्रे । किमकं निरङ्कस्तेन स्वगृहावस्थितः समुद्रेण नियक्षीतव्यः । टिट्टिभी विहस्याह । स्वामिन् त्वया समुद्रेण च मक्षदत्तरं । टिट्टिभो ऽवदत् . . . . . ततः स्वामिवचनात्सा तत्रैव प्रसूता । समुद्रेणापि तच्छक्तिजिज्ञासार्थं तदण्डान्यपक्षतानि । अथ टिट्टिभी शोकार्त्ता भर्तारमाह । नाथ । कष्टमापतितं । तान्यण्डानि मे नष्टानि । टिट्टिभो ऽवदत् प्रिये । मा भैषीः । इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गत्वा स्ववृत्तान्तमकथयत् तद्वचनाद्गरुत्मता स्वभर्ता नारायणः सृष्टिस्थितिप्रलयकेतुर्विज्ञापितः सन्समुद्रं तदर्पणाय समादिदेश । ततो भगवदाज्ञां मौलौ निधाय समुद्रेण टिट्टिभस्य तान्यण्डानि समर्पितानि । अतो ऽकं ब्रवीमि ।

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः ॥ १ ॥

XV. (III. 2.)

DIE VŒGEL UND DIE AFFEN.

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः । तत्र तरौ निर्मितनीडक्रोडे पक्षिणः सुखं वर्षासु निवसन्ति । अथ नीलपटैरिव जलपटलैरावृते नभस्तले धारासारैर्मुक्तो वृष्टिर्बभूव । ततो वानरास्तरुतले श्रा-

म्यन्तः शीतार्त्ताः कम्पमाना बभूवुः। तथा तानवलोक्य कृपया पक्षिभिरुक्तं। भो भो वानराः।

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राकृतैस्तृणैः।
कृतपादादिसंयुक्ता यूयं किमिति सीदथ ॥ १ ॥

तच्छ्रुत्वा वानरैर्ज्ञातामर्षैरालोचितं। अहो निर्वातनीडगर्भस्थाः सुखिनः पक्षिणोऽस्मान्निन्दन्ति। तद्भवतु तावद्दृष्टेरुपशमः। अनन्तरं शीते पानीयवर्षे तैर्वानरैर्वृक्षाग्रमारुह्य सर्वे नीडा भग्नाः। तेषां पक्षिणामण्डानि चाधः पतितानि। अतोऽहं ब्रवीमि।

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याज्ञान्स्थानभ्रंशं ययुः खगाः ॥ २ ॥

XVI. (III. 3.)

DER ESEL IN DER TIGERHAUT.

अस्ति कस्तिनापुरे कर्पूरविलासो नाम रजकः। तस्य गर्दभोऽतिभारवाहाद्दुर्बलो मुमूर्षुरिवाभवत्। ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसंनिधाने शस्यक्षेत्रमध्ये नियुक्तः। ततो दूरात्तमवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते। स च सुखेन शस्यं चरति। अथैकदा केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुः सज्जीकृत्यानतकायेनैकान्ते स्थितं। तं च दूराद्दृष्ट्वा गर्दभः पुष्टाङ्गो ज्ञातबलो गर्दभीयमिति मत्वा शब्दं कुर्वाणस्तदभिमुखं धावति। ततस्तेन रक्षकेण गर्दभोऽयमिति ज्ञात्वा लीलयैव व्यापादितः। अतोऽहं ब्रवीमि।

सुचिरं हि चरन्नित्यं क्षेत्रे शस्यमबुद्धिमान्।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः ॥ १ ॥

XVII. (III. 4.)

DIE ELEPHANTEN UND DIE HASEN.

कदाचिद्वर्षास्वपि वृष्टेरभावात्तृषार्तो गजयूथो यूथपतिमाह । नाथ । को ऽप्युपायो ऽस्माकं जीवनाय । अस्त्यत्र क्षुद्रजन्तूनां निमज्जनस्थानं । वयं च निमज्जनाभावादन्धा इव बभ्रामः । किं कुर्मः । ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं तेषां दर्शितवान् ततस्तत्तीरावस्थिताः शशका हस्तिपादाक्रान्तिभिर्बद्धवश्रूर्णिताः । अनन्तरं शिलीमुखो नाम शशकः सर्वानाकूय चिन्तयामास । अनेन गजयूथेन पिपासाकुलितेन प्रत्याक्रमेवात्रागन्तव्यं । अतो विनङ्क्षत्यस्मत्कुलं । अथ विजयो नाम वृद्धशशको ऽवदत् मा विषीदत । मयात्र प्रतीकारः कर्तव्यः । इत्यसौ प्रतिज्ञाय चलितः । गच्छता च तेनालोचितं । कथं मया गजयूथनिकटे स्थित्वा वक्तव्यं । यतः

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः ।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः ॥ १ ॥

अतो ऽहं पर्वतशिखरमारुह्य यूथनाथं वक्ष्यामि । तथानुष्ठिते यूथनाथ उवाच । कस्त्वं । कुतः समायातः । स ब्रूते । दूतो ऽहं भगवता चन्द्रेण प्रेषितः । यूथपतिराह । कार्यमुच्यतां । विजयो वदति । शृणु गजेन्द्र ।

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
सदैवावध्यभावेन यथार्थस्य हि वाचकः ॥ २ ॥

तदहं तदाज्ञया ब्रवीमि । शृणु । यदेते चन्द्रसरोरक्षकाः शशकास्त्वया निःसारिताः । तद्न भद्रं कृतं । यतो रक्षकास्ते ऽस्मदीयाः । अत एव लोके मे शशाङ्क इति प्रसिद्धिः । एवमुक्तवति दूते स यूथपतिर्भयादिदमाह । इदमज्ञानतः कृतं । पुनर्नागमिष्यामि । दूत उवाच । तदत्र सरसि भगवन्तं प्रकोपात्कम्पमानं प्रणम्य प्रसाद्य च गच्छ । ततस्तेन रात्रौ नीत्वा तत्र ह्रदजले

चञ्चलं प्रतिबिम्बं दर्शयित्वा यूथपतिः प्रणामं कारितः। देव। अज्ञानादेवानेन कृतं क्षम्यतामित्युक्त्वा प्रस्थापितः। अतो ऽहं ब्रवीमि।

व्यपदेशेन सिद्धिः स्यादतिशक्ते नराधिपे।
शशिनो व्यपदेशेन शशकाः सुखमासते ॥ ३ ॥

XVIII. (III. 5.)

DIE GANS UND DIE KRÆHE.

अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान्पिप्पलवृक्षः। तत्र हंसकाकौ निवसतः। कदाचिद्ग्रीष्मसमये परिश्रान्तः कश्चित्पथिकस्तत्र तरुतले धनुः काण्डं च संनिधाने निधाय सुप्तः। ततः क्षणान्तरे तद्मुखादुत्तच्छायापगता। अनन्तरं सूर्यतेजसा तद्मुखं व्याप्तमवलोक्य तद्वृक्षस्थितेन हंसेन कृपया पक्षौ प्रसार्य पुनस्तत्र च्छाया कृता। ततो निर्भरनिद्रासुखिना तेनाधृगेन मुखव्यादानं कृतं। अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तद्मुखे पुरीषोत्सर्गं कृत्वा पलायितः। ततो यावदसौ सक्रोधमुत्थाय वृक्षाग्रं निरीक्षते। तावत्तेनावलोकितो हंसः काण्डेन कृतो व्यापादितश्च। अतो ऽहं ब्रवीमि।

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित्।
काकसंगाद्धतो हंसस्तिष्ठन्गच्छंश्च वर्तकः ॥ १ ॥

XIX. (III. 5.)

DIE KRÆHE UND DIE WACHTEL.

एकदा सर्वे पक्षिणो भगवतो गरुडस्य यात्राप्रसङ्गेन समुद्रतीरं प्रचलिताः। तत्र काकेन सह वर्तकश्चलितः। अथ गच्छतो गोपालस्य मस्तकावस्थितद्धिभाण्डाद्धारं वारं तेन काकेन दधि खाद्यते। ततो यावदसौ दधिभाण्डं

भूमौ निधाय ऊर्ध्वमवलोकते। तावत्तेन काकवर्तको दृष्टो। ततस्तेन खेटितः काकः पलायितः। वर्तकश्च मन्दगतिः प्राप्तो व्यापादितः। अतो ऽहं ब्रवीमि। न स्थातव्यं न गन्तव्यमित्यादि।

XX. (III. 6.)

DER WAGNER UND SEINE FRAU.

अस्ति यौवनश्रीनगरे मन्दमतिर्नाम रथकारः। स च स्वभार्यां बन्धकीं जानात्येव। किंतु जारेण सममेकस्थाने न हि स्वचक्षुषा पश्यति। ततो ऽसौ रथकारो ऽन्यमन्यग्रामं गच्छामीत्युक्त्वा चलितः सन्निकृष्टं दूरं गत्वा पुनरागत्य स्वगृहे खट्वातले पतित्वा निभृतं स्थितः। अथ मम भर्ता ग्रामान्तरं गत इत्युपजातविश्वासया तया स जारः संध्याकाल एवाकृतः। पश्चात्तेन समं तस्यां खट्वायां सा निर्भरं क्रीडन्ती खट्वातलस्थितेन सह भूता किंचिदङ्गस्पर्शात्स्वामिनं विज्ञाय विषण्णाभवत्। ततो जारेणोक्तं। किमिति त्वं मया सहाद्य निर्भरं न रमसे। विस्मितेव प्रतिभासि। तयोक्तं। यो ऽसौ प्राणेश्वरः। सो ऽद्य ग्रामान्तरं गतः। तेन विना सकलजनपूर्णो ऽप्ययं ग्रामो ऽरण्यवद्मां प्रतिभाति। किं भावि तत्र परस्थाने। किं खादितवान् कथं वा प्रसुप्त इत्यस्मद्धृदयं विदीर्यते। जारेणोक्तं। किमेवंविधः स्त्रैणभूमिः स ते रथकारः। यः कलङ्कारी बन्धकीति ब्रूते। ततस्तयोक्तं। शृणु रे वर्वर। किं ब्रवीषि।

परुषाण्यपि चोक्ता या दृष्टा वा क्रोधचक्षुषा।
सुप्रसन्नमुखी भर्तुः सा नारी धर्मभागिनी ॥ १ ॥

अपरं च।

नगरस्थो वनस्थो वा पापो वा यदि वा शुचिः।
यासां स्त्रीणां प्रियो भर्ता तासां लोका मनोदयाः ॥ २ ॥

अन्यच्च ।

भर्ता हि परमं नार्या भूषणं भूषणैर्विना ।
एषा विरहिता तेन शोभितापि न शोभते ॥ ३ ॥

त्वं च दारो मनोलौल्यात्पुष्पताम्बूलसदृशः कदाचित्सेव्यसे । स च स्वामी मां विक्रेतुं देवेभ्यो ब्राह्मणेभ्यो वा दातुं समर्थः । किं बहुना ।

तस्मिञ्जीवति जीवामि मृते तस्मिन्म्रिये पुनः ।
तन्मरणेऽनुमरणमेष मे दृढनिश्चयः ॥ ४ ॥

यतः ।

तिस्रः कोट्यो ऽर्धकोटी च यानि लोमानि मानवे ।
तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ॥ ५ ॥

अन्यच्च ।

व्यालग्राही यथा व्यालं बलाद्बिलात् ।
तद्वद्भर्तारमादाय स्वर्गलोके महीयते ॥ ६ ॥

अपरं च ।

चितौ परिष्वज्य विचेतनं पतिं
प्रिया हि या मुञ्चति देहमात्मनः ।
कृतातिपापं शतलक्षमप्यसौ
पतिं गृहीत्वा सुरलोकमाप्नुयात् ॥ ७ ॥

एतत्सर्वं श्रुत्वा स रथकारो धन्योऽहं यस्यैतादृशी भार्या सद्भक्तवत्सला प्रियवादिनी चेति मनसि निधाय तां खट्वां स्त्रीपुरुषसहितां मूर्ध्नि कृत्वा चिरं ननर्त । अतोऽहं ब्रवीमि ।

प्रत्यक्षे ऽपि कृते दोषे मूर्खः शास्त्रेण तुष्यति ।
रथकारो निजां भार्यां सद्भारं शिरसाकरोत् ॥ ८ ॥

XXI. (III. 7.)

DER BLAUE SCHAKAL.

अस्ति शृगालः कश्चित् स स्वेच्छया नगरोपान्ते भ्राम्यन्नीलीभाण्डे निपतितः। पश्चात्तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः। अथ नीलीभाण्डस्वामिना तं शृगालमूर्ध्वचरणं निमीलितनयनं दत्तनिष्काशितं दृष्ट्वा मृत इति मत्वा ग्रामाद्दूरं नीत्वासौ धृतः। ततो ऽसौ वनं गत्वात्मानं नीलवर्णमवलोक्याचिन्तयत् अहमिदानीमुत्तमवर्णः। तत्किमात्मोत्कर्षं न साधयामि। इत्यालोच्य शृगालानाहूय तेनोक्तं। अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः। तत्पश्यत मम वर्णं। तदद्यारभ्यास्मदाज्ञयास्मिन्नरण्ये व्यवहारः कार्यः। शृगालाश्च विशिष्टवर्णं तमवलोक्य साष्टाङ्गपातं प्रणम्योचुः। यथाज्ञापयति देवः। ततो ऽनेनैव क्रमेण सर्वेषु पशुष्वरण्यवर्तिष्वाधिपत्यं तस्याभवत् तेन स्वज्ञातिभिरावृतेनाधिकं साधितं। ततस्तेन सिंहव्याघ्रादीनुत्तमपरिजनान्प्राप्य शृगालानवलोक्य लज्जमानेनावज्ञया दूरीकृताः स्वज्ञातयः। ततो विषण्णाञ्शृगालानवलोक्य वृद्धशृगालेन केनचित्प्रतिज्ञातं। मा विषीदत। एवं यावता नीतिज्ञेन वयं मर्मज्ञाः परिभूताः। तद्यथायं विनश्यति। तथा विधेयं। यतो ऽमी व्याघ्राद्यो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते। तद्यथायं परिक्षीयते। तथा कुरुत। तत्र चैवमनुष्ठीयतां। यदा सर्वे संध्यासमये तत्संनिधाने यूयं महारावमेकदैव करिष्यथ। ततस्तं शब्दमाकर्ण्य स्वभावात्तेनापि शब्दः कर्तव्यः। यतः

यः स्वभावो हि यस्य स्यात्तस्यासौ दुरतिक्रमः।
श्वा यदि क्रियते भोगी स किं नाश्नात्युपानहं ॥ १ ॥

ततः शब्दाच्छृगालो ऽयमित्यभिज्ञाय व्याघ्रेण हन्तव्यः। तथानुष्ठिते सति तद्वृत्तं। तथा चोक्तं।

छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निज़ो रिपुः ।
दहत्यन्तर्गतश्चैव शुष्कवृक्षमिवानलः ॥ २ ॥

अतो ऽहं ब्रवीमि ।

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः ।
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥ ३ ॥

XXII. (III. 8.)

DER KRIEGER, DER SEINEN EIGENEN SOHN OPFERT.

अहं पुरा शूद्रकस्य राज्ञः क्रीडासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्या कर्पूरमञ्जर्या सहानुरागवानभवं । तत्र वीरवरो नाम राजपुत्रः कुतश्चिद्देशादागत्य राजद्वारि प्रतीहारमुपगम्योवाच । अहं वर्तनार्थी राजपुत्रः । मां राजदर्शनं कारय । ततस्तेनासौ राजदर्शनं कारितो ब्रूते । देव । यदि मया सेवकेन प्रयोजनमस्ति । तदास्मद्वर्तनं क्रियतां । शूद्रक उवाच । किं ते वर्तनं । वीरवरो ऽवदत् प्रत्यहं टङ्कशतचतुष्टयं । राजाह । का ते सामग्री । स आह । द्वौ बाहू तृतीयश्च खड्गः । राजोवाच । नैतद्दातुं शक्यं । एतच्छ्रुत्वा वीरवरः प्रणम्य चलितः । अथ मन्त्रिभिरुक्तं । देव । दिनचतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपं । किमुपयुक्तो ऽयमेतावद्वर्तनं गृह्णात्यथानुपयुक्तो वा । ततस्तद्वचनादाहूय वीरवरस्य ताम्बूलं दत्त्वा टङ्कशतचतुष्टयं दत्तवान् तद्विनियोगश्च राज्ञा सुनिरूपितः । तत्रार्धं देवेभ्यो ब्राह्मणेभ्यो दत्तं तेन । अपरार्धं च दुःखितेभ्यः । तदवशिष्टं च भोजनव्ययेन व्ययितं । तथैव तत्सर्वं नित्यकृत्यं कृत्वा स राजद्वारमहर्निशं खड्गपाणिः सेवते । यदा च राज्ञा स्वयं समादिश्यते । तदा स्वगृहमुपयाति । अथ चतुर्थ्यां रात्रौ निशीथे स राज्ञा क्रन्दनध्वनिं शुश्राव । तं श्रुत्वा शूद्रको ब्रूते । कः को ऽत्र द्वारि । तेनोक्तं । देव । अहं

वीरवरः । राज्ञोवाच । क्रन्दनानुसरणं क्रियतां । वीरवरो ऽपि यदाज्ञापयति देव इत्युक्त्वा चलितः । ततो राज्ञा चिन्तितं । नैतदुचितं कृतं । यदयं राजपुत्रः सूचीभेद्ये तमसि प्रेषितः । तदहमपि गत्वा किमेतदिति निरूपयामि । ततो राज्ञापि खड्गमादाय तदनुसरणक्रमेण नगराद्बहिर्निर्गत्य गत्वा च वीरवरेण काचित्स्त्री रुदती रूपयौवनसंपन्ना सर्वालंकारभूषिता विलोकिता पृष्टा च । का त्वं । किमर्थं रोदिषि । ततस्तयोक्तं । अहमेतस्य शूद्रकस्य राज्ञो लक्ष्मीश्चिरादेतस्य भुजच्छायायां मह्यता सुखेन विश्रान्ता इदानीं चान्यत्र गमिष्यामि । वीरवरो ब्रूते । कथं पुनरिहावलम्बनं भगवत्याः संभवति । लक्ष्मीरुवाच । यदि त्वमात्मनः पुत्रं शक्तिवरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः सर्वमङ्गलाया उपहारीकरोषि । तदाहं पुनरत्र सुचिरं सुखेन निवसामि । इत्युक्त्वा सादृश्यमभवत् ततो वीरवरेण स्वगृहं गत्वा निद्रावधूतः पुत्रः प्रबोधितः पत्नी च । तौ निद्रां परित्यज्योत्थायोपविष्टौ । वीरवरश्च तयोः समक्षं तत्सर्वं लक्ष्मीवचनमुक्तवान् तच्छ्रुत्वा सानन्दं शक्तिवरो ब्रूते । धन्यो ऽहमेवंभूतः । स्वामिराज्यरक्षायां यस्योपयोगः । तत्को ऽधुना विलम्बनहेतुः । कदापि तावदेवंविधे कर्मण्येतस्य देहस्य विनियोगः श्लाघ्यः । यतः ।

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ १ ॥

शक्तिवरमातोवाच । यद्येतद्व कर्तव्यं । तत्केनान्येन कर्मणामुष्य महावर्तनस्य निष्क्रयो भविष्यति । इत्यालोच्य सर्वे सर्वमङ्गलायतनं गताः । तत्र सर्वमङ्गलां संपूज्य वीरवरो ब्रूते । देवि । प्रसीद । विजयतां शूद्रको राजा । गृह्यतामयमुपहारः । इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद । अथ वीरवरश्चिन्तयामास । गृहीतराजवर्तनस्य तावद्विस्तारो भूतः । अधुनापुत्रस्य जीवनं विडम्बनं । इत्यालोच्यात्मनो ऽपि शिरश्छित्तवान् ततः स्त्रियापि स्वामिनः पुत्रस्य च शोकार्त्तया तथैवानुष्ठितं । तत्सर्वं श्रुत्वा दृष्ट्वा च साश्चर्यं स राज्ञा चिन्तयामास ।

जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ २ ॥

तदेतत्परित्यक्तेन राज्येन न मे प्रयोजनमस्ति । इति शूद्रकेणापि स्वशिरश्छेत्तुमुद्दामितः खड्गः । अथ साक्षाद्भूतिमत्या सर्वमङ्गलया राज्ञा व्यस्ते धृत उक्तश्च । पुत्र । अलं साहसेन । इदानीं तव राज्यभङ्गो नास्ति । राज्ञा साष्टाङ्गपातं प्रणम्योवाच । देवि । किं मे राज्येन जीवितेन वा प्रयोजनमस्ति । यदि ममानुकम्पा विद्यते । तदायं वीरवरः सपुत्रदारो जीवतु । अन्यथाहं यथाप्राप्तिं गतिं गच्छामि । भगवत्युवाच । अनेन सत्त्वोत्कर्षेण भृत्यवात्सल्येन च सर्वसंतुष्टास्मि । इदानीं गच्छ । विजयी भव । अयमपि सदारपुत्रो जीवतु राजपुत्रः । इत्युक्ता देव्यदृश्याभवत् राज्ञा तां प्रणम्यालक्षितश्चलितः प्रासादगर्भं गत्वा सुप्तः । वीरवरोऽपि सपुत्रदारः प्राप्तजीवनः स्वगृहं गतः । अथ पुनर्द्वारस्थो वीरवरो भूपालेन पृष्टः सत्त्वमुवाच । देव । सा रुदती स्त्री मामालोक्यादृश्याभवत् न काप्यन्या विद्यते वार्ता । ततस्तद्वचनमाकर्ण्य संतुष्टो राजाचिन्तयत् कथमयं श्लाघ्यतां महासत्त्वः । यतः ।

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी च प्रगल्भः स्यादनिष्ठुरः ॥ ३ ॥

एतन्महापुरुषलक्षणमेतस्मिन्सर्वमस्ति । ततः स राज्ञा प्रातः शिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादत्वेन तस्य कर्णाटराज्यं ददौ ।

XXIII. (III. 9.)

DER BARBIER, DER EINEN BETTLER ERSCHLÆGT.

अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः । तेन धनार्थं महता क्लेशेन भगवांश्चन्द्रार्धचूडामणिराराधितः । ततः प्रक्षीणपापो भगवतो दर्शनं स्वप्ने

प्राप्तवान् अथ भगवतः प्रसादाच्चक्षेश्वरेणादिष्टं । त्वमद्य प्रातः क्षौरं कृत्वा लगुडहस्तः स्वगृहद्वारि सुनिभृतं स्थास्यसि । ततः समागतं भिक्षुं प्राङ्गणे यं द्रक्ष्यसि। तमेव निर्दयं लगुडेन हनिष्यसि । ततः स भिक्षुः सुवर्णपरिपूर्णकलशो भविष्यति। तेनैव त्वया स्वेच्छया यावज्जीवं सुखिना भवितव्यं । तदनन्तरं तथानुष्ठिते सति तद्भूतं । तच्च क्षौरकरणानीतनापितेनालोक्य चिन्तितं । अये निधिप्राप्तेरयमुपायः । तदहमप्येवं किं न करोमि । ततः प्रभृति स नापितः प्रतिदिनं तथाविधानो लगुडहस्तः प्रातः सुनिभृतं भिक्षोरागमनं प्रतीक्षते । एकदा तेन तथा प्राप्तो भिक्षुर्लगुडेन हत्वा व्यापादितः । तस्मादपराधात्सो ऽपि नापितो राजपुरुषैस्ताडितः पञ्चत्वमगमत् अतो ऽहं ब्रवीमि।

पुण्याल्लब्धं यदेकेन तदन्यमापि भविष्यति ।
हत्वा भिक्षुमतो मोहाद्विध्यर्थी नापितो हतः ॥ १ ॥

XXIV. XXV. (IV. 2. 3.)

DIE BEIDEN GÆNSE UND DIE SCHILDKRŒTE.

DIE DREI FISCHE.

अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः । तत्र चिराद्धंसौ निवसतः । तयोर्मित्रं कूर्मश्च प्रतिवसति। अथ धीवरैरागत्य तत्रोक्तं। यदद्यास्माभिरत्रोषित्वा प्रातः कूर्ममत्स्यादयो व्यापादयितव्याः। तदाकर्ण्य कूर्मो हंसावाह। सुहृदौ। श्रुतो ऽयं धीवरालापः। अधुना मया किं विधातव्यं। हंसावाहतुः। ज्ञायतां पुनस्तावत् प्रातर्यदुचितं। तत्कर्तव्यं। कूर्मो ब्रूते। मा मैवं। यतो दृष्टव्यतिकरो ऽहमत्र। तथा चोक्तं।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ १ ॥

तावाहतुः। कथमेतत् कूर्मः कथयति। पुरैतस्मिन्नेव सरस्येवंविधेष्वेव धी-

वरेषूपस्थितेषु मत्स्यत्रयेणालोचितं । तत्रैको ऽनागतविधातृनामा मत्स्यः । तेनोक्तं । अहं पुनर्ह्रदाशयान्तरं तावद्गच्छामि । इत्युक्त्वा ह्रदान्तरं गतः । अपरेण च प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितं। भाविन्यर्थे प्रमाणाभावात्कुत्र किं समाधातव्यं । तदुत्पन्नकार्ये कार्यमनुष्ठेयं । ततो यद्भविष्येणोक्तं ।

यद्भावि न तद्भावि भावि चेद्न तदन्यथा ।
इति चिन्ताविषघ्नो ऽयमगदः किं न पीयते ॥ २ ॥

अथ प्रातर्ज्वालेन बद्धः सन्प्रत्युत्पन्नमतिर्मृतवदात्मानं प्रदर्श्य स्थितः । ततो ज्वालादपसारितो यथाशक्त्युत्प्लुत्य गभीरनीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि । अनागतविधातेत्यादि ।

तथाहमन्यद्ह्रदं प्राप्नोमि । तथा क्रियतां । हंसावाहतुः । स्थले गच्छतस्तव कुतः कुशलं । कूर्मो ब्रूते । यथाहमपि भवद्भ्यां सहाकाशवर्त्मना गच्छामि । स उपायो विधीयतां । हंसौ ब्रूतः । कथं संभवत्येष उपायः । सो ऽब्रवीत् युवाभ्यां चञ्चा काष्ठमेकं धर्तव्यं । अहं तस्मिन्काष्ठखण्डे मुखेनावलम्बनं कृत्वा भवतोः पक्षबलेन गमिष्यामि । हंसावाहतुः । संभवत्येष उपायः । किंतु एवमावाभ्यां नीयमानं त्वामवलोक्य लोकैः किंचिद्वक्तव्यमेव । तदाकार्यं यदा त्वमुत्तरं ददासि । तदा त्वद्वचनं खलु । तत्सर्वथैकैव स्थीयतां । कूर्मो ब्रूते । किमहमप्राज्ञः । न किमपि मया वक्तव्यं । तथानुष्ठिते तथाविधं कूर्ममवलोक्य सर्वे गोरक्षकाः पश्चाद्धावन्ति वदन्ति च । अहो महदाश्चर्यं । पक्षिभ्यां कूर्मो समुह्यते । तत्र कश्चिद्वदति । यद्ययं कूर्मः पतति । तदात्रैव पक्वा भोक्तव्यः । कश्चिद्वदति । गृहं नेतव्यः । ततस्तत्पुरुषवचनं श्रुत्वा स कूर्मः क्रोधाद्विस्मृतपूर्वसंस्कारस्तान्प्राह । युष्माभिर्मम भक्षितव्यमिति वदन्नपतदेव । पतितस्तैः प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि ।

सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्वष्टो विनश्यति ॥ ३ ॥

XXVI. (IV 4.)

DER KAUFMANN UND SEINE LISTIGE FRAU.

अस्ति विक्रमपुरे समुद्रदत्तनामा वणिग् तस्य रत्नप्रभा नाम वधूः केनापि स्वसेवकेन सह सदा रमते। अथैकदा सा तस्य सेवकस्य मुखे चुम्बनं ददती समुद्रदत्तेनावलोकिता। ततो वन्धकी सा सत्वरं भर्तुः समीपमुपगम्याह। नाथ। एतस्य सेवकस्य तावन्महती निर्वृतिः। यतो युष्मदर्थं नीयमानं कर्पूरमश्नाति। कर्पूरगन्धो मयास्य मुखे प्रत्यक्षेणाघ्रातः। तच्छ्रुत्वा सेवकेनापि प्रकुप्योक्तं। यस्य गृहस्यैतादृशी चेष्टा। तत्र सेवकेन कथं स्थातव्यं। यत्र प्रतिक्षणं गृहिणी सेवकस्य मुखं जिघ्रति। ततो ऽसावुत्थाय चलितः सन्साधुना प्रबोध्यानीय यत्नाद्धृतः। अतो ऽहं ब्रवीमि।

उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान्।
वणिग्जो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ १ ॥

XXVII. (IV. 5.)

DIE KRANICHE UND DIE ICHNEUMONE.

अस्त्युत्तरापथे गृध्रकूटो नाम गिरिः। तत्रैरावतीतीरे न्यग्रोधे वका निवसन्ति। तस्यैव च वृक्षस्याधस्ताद्विवरे सर्पस्तिष्ठति। स च तेषां बालापत्यानि खादति। ततः शोकार्त्तानां वकानां प्रलापं श्रुत्वा केनचिद्वृद्धवकेनोक्तं। एवं कुरुत यूयं। मत्स्यानानीय नकुलविवरादारभ्य सर्पविवरं यावत्पङ्क्तिक्रमेणैकैकशो मत्स्यान्क्षिप्त। ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावद्वेषाद्व्यापादयितव्यश्च। तथानुष्ठिते तद्वृत्तं। अथ तैर्नकुलैस्तत्र वृक्षे वकशावकाश्चयः श्रुतः। पश्चात्तैर्वृक्षमारुह्य शावकाः सर्व एव व्यापादिताः। अत आवां ब्रूवः।

उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत्।
पश्यतो वकमूर्खस्य नकुलैर्भक्षिताः प्रजाः ॥ १ ॥

XXVIII. (IV. 6.)

DER EINSIEDLER UND DIE MAUS.

ग्रस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तेनाश्रमसंनिधाने मूषिकशावकः श्येनमुखाद्भ्रष्टो दृष्टः । पश्चाद्दयालुना मुनिना नीवारकणैः स पालितः । तं च मूषिकं खादितुं यत्नादन्विष्यन्विडालो मुनिना दृष्टः । ततस्तेन तपःप्रभावान्मूषिको विडालः कृतः । स च कुक्कुराद्बिभेति । ततो ऽसौ विडालः कुक्कुरः कृतः । कुक्कुरस्य च व्याघ्राद्भयं महत् तदनन्तरं स कुक्कुरो व्याघ्रः कृतः । अथ व्याघ्रमपि तं मुनिर्मूषिकनिर्विशेषेण पश्यति । तं च मुनिं दृष्ट्वा सर्वे वदन्ति । अनेन मुनिना मूषिको ऽयं व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रः सव्यथो ऽचिन्तयत् यावदनेन मुनिना जीवितव्यं । तावदिदं स्वरूपाख्यानं ममाकीर्तिकरं न पलायिष्यते । इत्यालोच्य मुनिं हन्तुमुद्यतः । ततो मुनिना तज्ज्ञात्वा पुनर्मूषिको भव इत्युक्त्वा मूषिक एव कृतः । अतो ऽहं ब्रवीमि ।

नीचः श्लाघ्यपदं प्राप्य स्वामिनं लोतुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ १ ॥

XXIX. (IV. 7.)

DER KRANICH UND DER KREBS.

ग्रस्ति मालवविषये पद्मगर्भाभिधानं सरः । तत्रैको वृद्धबकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित्कुलीरेण दूरादेव दृष्टः पृष्टश्च । किमिति भवानाहारपरित्यागेन तिष्ठति । बकेनोक्तं । मत्स्या मम जीवनहेतवः । ते चावश्यमत्र कैवर्तैर्व्यापादयितव्याः । इति नगरोपान्ते पर्यालोचना मयाकर्णिता । अतो वर्तनाभावादेवास्मद्मरणमुपस्थितं । इति

ज्ञात्वाक्षमाहारे ऽपि मन्दादरः कृतः । तच्छ्रुत्वा सर्वैर्मत्स्यैरालोचितं । इह समये तावदुपकारक एवास्माकमिति लक्ष्यते । तदयमेव यथाकर्तव्यं पृच्छ्यतां । तथा चोक्तं ।

उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ १ ॥

मत्स्या ऊचुः । को ऽत्र रक्षणोपायः । वको ब्रूते । अस्ति रक्षाहेतुर्ह्रदाशयान्तरगमनं । तत्राहं युष्मान्नयामि । मत्स्यैरपि भयादुक्तं । एवमस्तु । ततो ऽसौ दुष्टवको मत्स्यांस्तानेकैकशो नीत्वाभक्षयत् अनन्तरं कुलीरः कश्चित्तमुवाच । भो वक । मामपि तत्र नय । ततो वको ऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीतवान् अथ वकेन नीतः स्थले स धृतः । कुलीरो ऽपि मत्स्यकङ्कालाकीर्णं भूतलमवलोक्याचिन्तयत् हा हतो ऽस्मि मन्दभाग्यः । भवतु । इदानीं समयोचितं व्यवहरामि । इत्यालोच्य यदासौ ग्रीवां प्रसार्य तं हन्तुमुद्यतः । तदैवासौ कुलीरः करेण तस्य वकस्य ग्रीवां चिच्छेद । अतो ऽहं ब्रवीमि ।

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान् ।
अतिलौल्याद्बकः पश्चान्मृतः कर्कटसंग्रहात् ॥ २ ॥

XXX. (IV. 8.)

DER BRAHMANE UND SEINE SCHÜSSEL.

अस्ति देवीकोट्टनगरे देवशर्मा नाम ब्राह्मणः । तेन विषुवसमये शक्तुभृतः शरावः एकः प्राप्तः । ततस्तमादायासौ भाण्डपूर्णकुम्भकारमण्डपिकैकदेशे शय्यानिक्षिप्तदेहः सत्रात्रावचिन्तयत् यद्यहमिमं शक्तुशरावं विक्रीय दश कपर्दकान्प्राप्नोमि । तदा तैरिह समये शरावांस्ततो घटादीनुपक्रीय विक्रीयानेकधा वृद्धैर्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय लक्षसंख्यानि धनान्युत्पाद्य

विवाहचतुष्टयं करोमि । ततस्तासु पत्नीषु याधिकरूपवती । तस्यामधिकानुरागं करोमि । अनन्तरं ज्ञातेर्ष्यास्तत्सपत्न्यो यदा द्वन्द्वं कुर्वन्ति । तदा कोपाकुलो ऽहं ताः पत्नीर्लगुडेनेत्थं ताडयामि । इत्यभिधायोत्थाय तेन लगुडः क्षिप्तः । अतः शक्तुशरावश्चूर्णितो भाण्डानि च बहूनि भग्नानि । ततो भाण्डभङ्गशब्देनागतकुम्भकारेण तद्दृष्ट्वा स ब्राह्मणस्तिरस्कृतो भाण्डपिकागर्भाद्बहिष्कृतः । अतो ऽहं ब्रवीमि ।

अनागतवतीं चिन्तां कृत्वा यस्तु प्रकृष्यति ।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥ १ ॥

XXXI. (IV. 9.)

DIE BEIDEN DAITJA'S.

पुरा दैत्यौ महोदारौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्यराज्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ । ततस्तयोर्भगवान्परितुष्टः सन्वरं वरयतमित्युवाच । अनन्तरं तयोर्भीरुमययोः समादिष्टया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहितवन्तौ । यद्यावयोर्भगवान्परितुष्टः । तदा स्वप्रियां पार्वतीं परमेश्वरो ददातु । अथ भगवता क्रुद्धेन वरप्रदानस्यावश्यकतया विचारमूढयोः पार्वती प्रदत्ता । ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योऽन्यकलहाभ्यां प्रमाणपुरुषः कश्चित्पृच्छ्यतामिति मतौ कृतायां स एव भर्ता वृद्धद्विजरूपी समागत्य तत्रोपस्थितः । अनन्तरमावाभ्यामियं स्ववललब्धा कस्येयमावयोर्भवतीति ब्राह्मणमपृच्छतां । ब्राह्मणो ब्रूते ।

वर्णश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवानपि ।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥ १ ॥

तयुवाभ्यां क्षत्रधर्मो ऽनुगन्तव्यः। युद्ध एव युवयोर्नियमः। इत्यभिहिते सति साधूक्तमनेनेत्युक्त्वान्योऽन्यतुल्यवीर्यौ समकाले ऽन्योऽन्यघातेन विनाशमुपगतौ। अतो ऽहं ब्रवीमि।

संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि।
न हि संशयितुं कुर्यादित्युवाच बृहस्पतिः॥ २॥
युद्धे विनाशो भवति कदाचिदुभयोरपि।
सुन्दोपसुन्दावन्योऽन्यं समवीर्यौ हतौ न किं॥ ३॥

XXXII. (IV. 10.)

DER BRAHMANE UND SEINE ZIEGE.

अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः। स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे कृत्वा गच्छन्धूर्तत्रयेणावलोकितः। ततस्ते धूर्ता यद्येष च्छागः केनाप्युपायेन प्राप्य खाद्यते तदा महतिप्रकर्षो भवतीत्यालोच्य प्रान्तरे वृक्षत्रयतले ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः। तत्रैकेन धूर्तेन स ब्राह्मणो गच्छन्नभिहितः। भो ब्राह्मण। किमिति त्वया कुक्कुरः स्कन्धेनोह्यते। ब्राह्मणो ब्रूते। नायं श्वा। यज्ञच्छागो ऽयं। अनन्तरं पुनर्द्वितीयेन क्रोशमात्रावस्थितेन तदेवोक्तं। तदाकर्ण्य ब्राह्मणस्तं छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः। तदनन्तरं पुनर्गच्छन्स ब्राह्मणस्तृतीयेन धूर्तेनोक्तः। भो ब्राह्मण। किमिति कुक्कुरं स्कन्धेन भवान्वहति। तदाकर्ण्य निश्चितमेवायं कुक्कुर इति मत्वा छागं त्यक्त्वा स्नात्वा स्वगृहं ययौ। स च्छागो तैर्धूर्तैर्नीत्वा भक्षितः। अतो ऽहं ब्रवीमि।

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनं।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा॥ १॥

XXXIII. (IV. 11.)

DER LŒWE, DIE KRÆHE, DER TIGER, DER SCHAKAL UND DAS KAMEEL.

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्त्रयः काको व्याघ्रः शृगालश्च । अथ तैर्धर्मद्विः सार्थाद्भष्ट उष्ट्रो दृष्टः पृष्टश्च । कुतो भवानागतः । स चात्मवृत्तान्तमकथयत् तैश्च नीत्वा सिंहे समर्पितः । तेन चाभयवाचं दत्त्वा चित्रकर्ण इति नाम कृत्वा स्थापितः । अथ कदाचित्सिंहस्य शरीरवैकल्याद्दूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्याकुला बभूवुः । ततः काकव्याघ्रगोमायुभिरालोचितं । चित्रकर्णमेव यथा स्वामी व्यापादयति । तथानुष्ठीयतां । किमनेन कण्टकभुजास्माकं । व्याघ्रो ब्रूते । स्वामिनाभयवाचं दत्त्वा स्वीकृतः । तत्कथमेवं संभवति । वायसो वदति । इह समये परिक्षीणः स्वामी पापमपि करिष्यति । यतः ।

त्यजेत्क्षुधार्त्ता सक्किलापि पुत्रं खादेत्क्षुधार्त्ता भुजगी स्वमण्डं ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥ १ ॥

अन्यच्च ।

मत्तः प्रमत्तश्चोन्मत्तो भ्रान्तः क्षुब्धो बुभुक्षितः ।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मविद् ॥ २ ॥

इति निश्चित्य सर्वे सिंहान्तिकं ययुः । सिंहेनोक्तं । आहारार्थं प्रातं किंचित् काको ब्रूते । देव । यत्नादपि न किंचित्प्रातं । सिंहो ऽवदत् को ऽधुना जीवनोपायः । काको वदति । नाथ । स्वाधीनाहारपरित्यागेन सर्वनाशो ऽयमुपस्थितः । सिंहो ऽब्रवीत् अत्राहारः कः स्वाधीनः । काकः कर्णे कथयति । चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च । मयैतस्य प्रागभयवाक्प्रदत्ता । तत्कथमिदानीमेवं संभवति । तथा चोक्तं ।

न गोप्रदानं न महीप्रदानं न चान्नदानं न तथाम्बुदानं ।
यथा वदन्तीह महाप्रदानं सर्वप्रदानेष्वभयप्रदानं ॥ ३ ॥

अन्यच्च ।

सर्वकामसमृद्धस्य अश्वमेधस्य यत्फलं ।
तत्फलं समवाप्नोति रन्तिदे शरणागते ॥ ४ ॥

काको ब्रूते । नासौ स्वामिना व्यापादयितव्यः । किंतु वयमेव तथा कुर्मः । यथासौ स्वयमेव देहदानमङ्गीकरोति । तच्छ्रुत्वा सिंहस्तूष्णीं स्थितः । ततोऽसौ लब्धावकाशः स्फुटं कृत्वा सर्वान्गृहीत्वा सिंहसमीपं गतः । अथ काकेनोक्तं । देव । यद्यादाहारो न प्राप्तः । अनेकोपवासक्लिष्टः स्वामी तत्सर्वथा मदीयमांसमुपभुज्यतां । यतः ।

स्वामिमूला भवन्त्येव सर्वाः प्रकृतयः खलु ।
समूलेषु हि वृक्षेषु प्रयत्नः सफलो नृणां ॥ ५ ॥

सिंहेनोक्तं । भद्र । वरं प्राणपरित्यागः । न पुनरीदृशी वृत्तिः । ततो जम्बुकेनापि तथोक्तं । ततः सिंहेनोक्तं । आस्तां । मा मैवं । व्याघ्र उवाच । मद्देहेन जीवतु स्वामी । सिंहेनोक्तं । न कदाचिदेवमुचितं । अथ चित्रकर्णोऽपि ज्ञातप्रत्ययस्तथैवात्मदेहदानमाह । ततस्तद्वन्नेवासौ व्याघ्रेण कुक्षिं विदार्य व्यापादितः सर्वैर्भक्षितश्च । अतोऽहं ब्रवीमि ।

मतिर्दोलायते नूनं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितो यः स म्रियते चित्रकर्णवत् ॥ ६ ॥

XXXIV. (IV. 13.)

DER BRAHMANE UND DAS ICHNEUMON.

अस्त्युज्जयिन्यां माठरो नाम ब्राह्मणः । तस्य ब्राह्मणी बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणस्य कृते राज्ञः श्राद्धं दातुमाह्वा-

नमागतं । तच्छ्रुत्वा ब्राह्मणः सञ्जदारिद्र्यादचिन्तयत् यदि सत्वरं न गच्छामि। तदान्यः कश्चिच्छ्राद्धं ग्रहीष्यति ।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसं ॥ १ ॥

किंतु बालकस्यात्र रक्षको नास्ति । तत्किं करोमि । यातु । चिरकालपालितमिमं पुत्रनिर्विशेषं नकुलं बालकरक्षार्थमवस्थाप्य गच्छामि। तथा कृत्वा स तत्र गतः । ततस्तेन नकुलेन बालकसमीपमागच्छता कृष्णसर्पो दृष्टो व्यापादितश्च। अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तस्य चरणयोर्लुलोठ । ततो ऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रो ऽनेन भक्षित इत्यवधार्य व्यापादितवान् अनन्तरं यावदसावुपसृत्य पश्यति ब्राह्मणः । तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति । ततस्तमुपकारकमेव नकुलं निर्दृश्य विभावितकृत्यः संततचेताः स परं विषादमगमत् अतो ऽहं ब्रवीमि ।

यो ऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
त तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा ॥ २ ॥

39 DISTICHA AUS AMARŪ-ÇATAKA.

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती को ऽयं मुग्धे त्वयाद्य विलोक्यते ॥ ४ ॥

दत्तो ऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियं ।
मन्युर्दुःसह एष यात्युपशमं नो शान्तवादैः स्फुटं
के निस्त्रिंश विमुक्तकण्ठकरुणं तावत्साखी रोदितु ॥ ५ ॥

लिखन्नास्ते भूमिं वहिरवनतः प्राणदयितो
निराकाराः साध्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥ ६ ॥

प्रहरविरतौ मध्ये वाङ्गस्ततो ऽपि परे ऽथवा
किमुत सकले याते वाङ्गि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पकलङ्कलैः ॥ ७ ॥

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतद्धाराश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ १० ॥

धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता ।
अन्यन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥ ११ ॥

कथमपि सखि क्रीडाकोपाद्गतेति मयोदिते
कठिनहृदयस्त्यक्त्वा शय्यां बलाद्गत एव सः ।
इति सभ्रमं ध्वस्तप्रेम्णि व्यपेतघृणे जने
पुनरपि कृतव्रीडं चेतः प्रयाति करोमि किं ॥ १२ ॥

दंपत्योर्निशि जल्पतोर्गृह्यशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतस्तस्योपहारं वधूः ।
कर्णालंकृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे
व्रीडार्त्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनं ॥ १३ ॥

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषो ऽपि संविहितः ।
आलापो ऽपि न विस्मृतः परिजनं व्यापारयत्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृथार्थीकृतः ॥ १५ ॥

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चाद्गुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रिमकंधरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तो ऽपरां चुम्बति ॥ १६ ॥

चरणपतनप्रत्याख्यानात्परान्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता ॥ १७ ॥

एकस्मिञ्शयने पराग्मुखतया वीतोत्तरं ताम्यतो-
रन्योऽन्यस्य हृदि स्थिते ऽप्यनुनये संरब्धतोर्गौरवं ।
दंपत्योः शनकैरपाङ्गवलनादिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं व्यासक्तकण्ठग्रहं ॥ १९ ॥

पश्यामो मयि किं प्रयच्छत इति स्थैर्यं मयालम्बितं
किं मामालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
इत्यन्योऽन्यविलग्नदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो वाष्पस्तु मुक्तस्तया ॥ २० ॥

भ्रूभङ्गे रचिते ऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
कार्कश्यं गमिते ऽपि चेतसि तनू रोमाञ्चमालम्बते ।
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं ज्ञायते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥ २४ ॥

कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावद्व शून्या दिशः ।
आयाता वयमागमिष्यति सुहृद्वर्गस्य भाग्योदयैः
संदेशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥ २५ ॥

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनं ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठच्छ्रोलालकैरश्रुभिः ॥ २६ ॥

भवतु विदितं भाव्यालापैरलं खलु गम्यतां
तनुरपि न ते दोषो ऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथाभूतं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते कृतजीविते ॥ २७ ॥

प्रस्थानं वलयैः कृतं प्रियसखैरश्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातु निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रिय सुहृत्सार्थः किमु त्यज्यते ॥ ३१ ॥

संदष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
शीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं मुधैव मथितो मूढैः सुरैः सागरः ॥ ३२ ॥

सुतनु जल्पिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधो ऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥ ३५ ॥

गते प्रेमाबन्धे प्रणयवङ्कमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तडुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसा-
न्न जाने को हेतुर्दलति शतधा यन्न हृदयं ॥ ३८ ॥

द्वराडुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किंचिद्धृतभ्रूलतं ।
मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं
चतुर्ज्ञातमहो प्रपञ्चचतुरं ज्ञातागसि प्रेयसि ॥ ४४ ॥

अज्ञानामतितानवं कथमिदं कम्पश्च कस्मात्कुतो
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्व्या सर्वमिदं स्वभावजमिति व्याहृत्य पद्मान्तर-
व्यापी वाष्पभरस्तया चलितया निःश्वस्य मुक्तो ऽन्यतः ॥ ४५ ॥

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदो ऽस्मासु न मे ऽपराध्यति भवान्सर्वे ऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ ५३ ॥

वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा ।
उभयमेतदुपैति यथा क्षयं प्रियजनेन न यत्र समागमः ॥ ६० ॥

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशे ऽर्पिता
नो वा पादतले तया निपतितं तिष्ठेति नोक्तं वचः ।
काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः शठ-
स्तन्व्या वाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ ६२ ॥

न ज्ञाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रतां ॥ ६३ ॥

विरक्तविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादुत्तप्तश्वासौ व्यपेतवृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्नीवीदेवं कथं प्रमदाजनः ॥ ६४ ॥

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान मृदुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीताननां
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति ॥ ६७ ॥

पीतो यतः प्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः ।
तृष्णा ततः प्रभृति मे द्विगुणाबभेति
लावण्यमस्ति बत तत्र किमत्र चित्रं ॥ ६८ ॥

क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको वसति यत्र जनः प्रियो मे ।
एकाकिनी वद कथं न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदनः सहायः ॥ ६९ ॥

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि चटुलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानोद्रेकाद्दयं वचस्तया
रमणपदवी सारंगाक्ष्या सशङ्कमुदीरिता ॥ ७१ ॥

दृष्टः कातरनेत्रया चिरतरं बद्धाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः ।
इत्यानिन्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ७९ ॥

स्वं दृष्ट्वा करुणावतं मधुमदक्षीवाविचार्येर्षया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सवाष्पनयना मां मुञ्च मुञ्चेति सा
कोपात्प्रस्फुरिताधरा यदवदत्तत्केन विस्मर्यते ॥ ८१ ॥

कपोले पत्त्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतकल्पो ऽधररसः ।
मुजः कण्ठे लग्नस्तरलयति वाष्पः स्तनतटं
प्रियो मन्युर्नातस्तव निरनुरोधे न तु वयं ॥ ८७ ॥

देशैरुत्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णे दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन्मुजः क्षीयते ॥ ९३ ॥

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि
सो ऽस्तु प्रियस्तव किमत्र विधेयमन्यद् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै-
रुच्चैः समर्पय मदर्पितचुम्बनं च ॥ ९४ ॥

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागत-
श्चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्नीतीनां सखे स्व कृपां फलं ॥ ९९ ॥

कोऽयं कर्षति कार्मुकानि कुटिलान्याकृष्य कर्णान्तिकं
मुक्तानामपि दर्शयत्यविरतं के वयं स्मरकिंकराः ॥ १०० ॥

SPRUCHE VON BHARTṚHARI.

भ्रूचातुर्याकुञ्चितानाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः ।
लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चायुधं च ॥ १ ॥

द्रष्टव्येषु किमुत्तमं मृगदृशां प्रेमप्रसन्नं मुखं
घ्रातव्येष्वपि किं तदास्यपवनः श्रव्येषु किं तद्वचः ।
किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनु-
र्ध्येयं किं नवयौवनं सुकृतिभिः सर्वत्र तद्विभ्रमः ॥ २ ॥

सति प्रदीपे सत्यग्नौ सत्सु ताराशशिन्यपि ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ ३ ॥

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरंगचक्षुषां ताड्यते चपललोचनाञ्चलैः ॥ ४ ॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयो दधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरं ॥ ५ ॥

श्रुता भवति तापाय दृष्टा चोन्मादवर्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथं ॥ ६ ॥

तावदेवामृतमयी यावल्लोचनगोचरा ।
चक्षुःपथादपगता विषादप्यतिरिच्यते ॥ ७ ॥

नामृतं न विषं किंचिदेका मुक्ता नितम्बिनीं ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ८ ॥

उत्पत्तिं सार्धमन्येन पश्यत्यन्यं सविभ्रमाः ।
हृदये चिन्तयत्यन्यं प्रियः को नाम योषितां ॥ ९ ॥

मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलं ।
अत एव निपीयते ऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥ १० ॥

चिन्तास्तितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं वडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान्विकृष्य पचतीत्यनुरागवक्त्रौ ॥ ११ ॥

यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक्तां च तं च मदनं च इमां च मां च ॥ १२ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ १३ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ १४ ॥

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणीञ्छिरीषकुसुमप्रान्तेन संनह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः सतां पथि खलान्सूक्तैः सुधास्यन्दिभिः ॥ १५ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥ १६ ॥

विद्या नाम नरस्य रूपमधिकं विद्यातिगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्यापरं संबलं
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥ १७ ॥

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिं ॥ १८ ॥

कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वने ऽथवा ॥ १९ ॥

यदचेतनो ऽपि पादैः स्पृष्टः प्रज्वलति सवितुरतिकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतं कथं सहते ॥ २० ॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥ २१ ॥

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ २२ ॥

राजन्दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकमिमं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ २३ ॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानां ॥ २४ ॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनां ॥ २५ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते ॥ २६ ॥

प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रं ।
तन्मित्रमापदि सुखे च समं प्रयाति
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ २७ ॥

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणां ॥ २८ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारेण न चन्दनेन ॥ २९ ॥

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ३० ॥

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकाशयति कैरवचक्रवालं ।
नाभ्यर्थितो ऽपि जलदो सलिलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ३१ ॥

तृष्णां छिन्धि भज क्षमां त्यज मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषो ऽप्यनुनय प्रच्छादय स्वान्गुणा-
न्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणं ॥ ३२ ॥

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिं ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥ ३३ ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥ ३४ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ ३५ ॥

कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणाः प्रमार्ष्टुं ।
अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव ॥ ३६ ॥

वरं तुङ्गाच्छृङ्गाद्गुरुशिखरिणः क्वापि पुलिने
पतित्वायं कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ३७ ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
द्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गे ऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ३८ ॥

निन्दन्तु नीतिनिपुणा यदिवा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ३९ ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणं ॥ ४० ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूको ऽप्यवलोकयते यदि दिवा सूर्यस्य किं दूषणं ।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ४१ ॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुं जयत्वाहवे
वाणिज्यं कृषिसेवनादिसकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ ४२ ॥

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ४३ ॥

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ४४ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्तास्त्येते शमसुखमनन्तं विदधति ॥ ४५ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहे ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रं ॥ ३६ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरंगचञ्चलतरे सौख्यं कुतः प्राणिनां ॥ ३७ ॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसारान्ते विशति यमधानीयवनिकां ॥ ३८ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
न्संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ३९ ॥

RAGHUVAṀÇA.

BUCH XII.

निर्विष्टविषयस्नेहः स दशात्तमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥ १ ॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥ २ ॥
सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ॥ ३ ॥
तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया ।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥ ४ ॥
सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्विलग्नाविवोरगौ ॥ ५ ॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः ।
द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियं ॥ ६ ॥
पित्रा दत्तां स दत्त्वामः प्राग्महीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितो ऽग्रहीत् ॥ ७ ॥
दधतो मङ्गलस्नाने वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ ८ ॥
स सीतालक्ष्मणासखः सत्याद्गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥ ९ ॥
राजापि तद्वियोगार्त्तः स्मृत्वा शापं स्वकर्म्मजं ।
शरीरत्यागमात्रेण मुद्विलाभममन्यत ॥ १० ॥

विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरं ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनं ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥
श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मानुर्न केवलं स्वस्याः श्रियो ऽप्यासीत्पराङ्मुखः ॥ १३ ॥
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥
चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसंपदा ॥ १५ ॥
स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥ १६ ॥
तमशक्यमपाक्रष्टुं निर्देशात्स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥ १७ ॥
स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीं ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनग् ॥ १८ ॥
दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ।
मातुः पापस्य प्रुद्ध्यर्थं प्रायश्चित्तमिवाकरोत् ॥ १९ ॥
रामो ऽपि सह वैदेह्या वने वन्येन वर्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥ २० ॥
प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिं ।
कदाचिदङ्के सीतायाः शिश्ये किंचिदिव श्रमात् ॥ २१ ॥
ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ २२ ॥

तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ।
भ्रात्तश्च मुमुचे तस्मादेकनेत्रव्ययेन सः ॥ २३ ॥
रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः ।
आशङ्क्योत्सुकसारंगां चित्रकूटस्थलीं जहौ ॥ २४ ॥
प्रययावातिथेयेषु वसन्नृषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥ २५ ॥
बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥ २६ ॥
अनसूयानिसृष्टेन पुण्यगन्धेन काननं ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदं ॥ २७ ॥
संध्याब्धकपिशस्तत्र विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ २८ ॥
स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥ २९ ॥
तं विनिष्पिष्य काकुत्स्थो पुरा दूषयति स्थलीं ।
गन्धेनाशुचिना चेति वसुधायां निचक्षतुः ॥ ३० ॥
पञ्चवट्यां ततो रामः शासनात्कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥ ३१ ॥
रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमं ॥ ३२ ॥
सा सीतासंनिधावेव तं वव्रे कथितान्वया ।
अत्याढ्यो हि नारीणामकालज्ञो मनोभवः ॥ ३३ ॥
कलत्रवानहं बाले कनीयांसं भजस्व मे ।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास तां ॥ ३४ ॥

ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता ।
साभूद्रामाश्रया भूयो नदीवोभयकूलभाग् ॥ ३५ ॥
संरम्भं मैथिलीत्रासः क्षणं सौम्यां निनाय तां ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥ ३६ ॥
फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां ।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतं ॥ ३७ ॥
इत्युक्त्वा मैथिलीं भर्तुरङ्कं निर्विशतीं भयात् ।
रूपं शूर्पणखा नात्मः सदृशं प्रत्यपद्यत ॥ ३८ ॥
लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुभाषिणीं ।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति तां ॥ ३९ ॥
पर्णशालामथ क्षिप्रं विधृतासिः प्रविश्य सः ।
वैरूप्यपैशुनरुक्तेन भीषणां तामयोजयत् ॥ ४० ॥
सा वक्रनखधारिण्या वेणुकर्कशपर्वया ।
अङ्कुशाकार्यया जुल्या तावत्तर्जयदम्बरे ॥ ४१ ॥
प्राप्य चाप्रु क्षतस्थानं खरादिभ्यस्तथाविधं ।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवं ॥ ४२ ॥
मुखावयवलूनां तां नैर्ऋता यत्पुरोदधुः ।
रामाभियायिनां तेषां तदेवाभूदमङ्गलं ॥ ४३ ॥
उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः ।
निदधे वित्रयाशंसां चापे सीतां च लक्ष्मणे ॥ ४४ ॥
एको दाशरथी रामो यातुधानाः सहस्रशः ।
ते तु यावत्त एवासौ तावांश्च ददृशे स तैः ॥ ४५ ॥
असह्यनेन काकुत्स्थः प्रयुक्तमथ दूषणं ।
न चक्षमे प्रभाचारः स दूषणनिवात्मनः ॥ ४६ ॥

तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ।
क्रमशस्ते पुनस्तस्य चापात्समभिवोद्ययुः ॥ ४७ ॥
तैस्त्रयाणां शितैर्बाणैर्यथापूर्वं विशुद्धिभिः ।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ॥ ४८ ॥
तस्मिन्त्रामशरोत्कृत्ते बले महति रक्षसां ।
उत्थितं ददृशे ऽन्यच्च कबन्धेभ्यो न किंचन ॥ ४९ ॥
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषां ।
अप्रबोधाय सुष्वाप गृध्रच्छाये वनस्थिनी ॥ ५० ॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसां ।
तेषां प्रपूर्णाविवैका दुष्प्रवृत्तिरभवत् ॥ ५१ ॥
निग्रहात्स्वसुरात्तानां वधाच्च धनदानुजः ।
रामेण निहितं मेने पदं दशसु मूर्धसु ॥ ५२ ॥
रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ५३ ॥
तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यतां ।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ॥ ५४ ॥
स रावणकृतां ताभ्यां वचसाचष्ट मैथिलीं ।
आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥ ५५ ॥
तयोस्तस्मिन्नवीभूतापितृव्यापत्तिशोकयोः ।
पितरीवाग्निसंस्कारात्परा निववृते क्रिया ॥ ५६ ॥
वधनिर्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्ह सख्यं रामस्य समानव्यसने हरौ ॥ ५७ ॥
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ५८ ॥

इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥ ५९ ॥
प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तेर्णः संसारमिव निर्ममः ॥ ६० ॥
दृष्ट्वा विचिन्वता तेन लङ्कायां रात्रसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥
तस्यै भर्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुज्ञैस्तदानन्दाश्रुबिन्दुभिः ॥ ६२ ॥
निर्वाप्य प्रियसंदेशैः सीतामन्नवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥ ६३ ॥
प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ६४ ॥
स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
अपयोधरसंसर्गी प्रियालिङ्गननिर्वृतिं ॥ ६५ ॥
श्रुत्वा रामः प्रियोदन्तं मेने तत्संगमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुं ॥ ६६ ॥
स प्रतस्थे ऽरिनाशाय कपिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्तिभिः ॥ ६७ ॥
निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद्रात्मसलक्ष्म्येव बुद्धिमादिश्य चोदितः ॥ ६८ ॥
तस्मै निशाचरैश्वर्यं प्रतिश्रुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥ ६९ ॥
स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्नद्धं शेषं स्वप्नाय शार्ङ्गिणः ॥ ७० ॥

तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयं फेनप्राकारं कुर्वद्भिरिव वानरैः ॥ ७१ ॥
रणः प्रववृते तत्र भीमः प्लवगरक्षसां ।
दिग्विसृम्भितकाकुत्स्थपौलस्त्यजयघोषणः ॥ ७२ ॥
पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ।
अतिशस्त्रनाखन्यासः शैलरुग्णमतंगजः ॥ ७३ ॥
अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनां ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ॥ ७४ ॥
कामं जीवति मे नाथ इति सा विजहौ शुचं ।
प्राप्स्यावा सत्यमस्यास्तं जीवितास्मीति लज्जिता ॥ ७५ ॥
गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः ।
दाशरथ्योः क्षणाल्लेशः स्वप्नवृत्त इवाभवत् ॥ ७६ ॥
ततो विभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणं ।
रामस्त्वनाकुलो ऽप्यासीद्विदीर्णहृदयः शुचा ॥ ७७ ॥
स मारुतिसमानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥ ७८ ॥
नादं स मेघनादस्य धनुश्चेन्द्रायुधप्रभं ।
मेघस्येव शरत्कालो न किंचित्पर्यशेषयत् ॥ ७९ ॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥ ८० ॥
अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥ ८१ ॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रक्षांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ८२ ॥

निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥ ८३ ॥
रामं पदातिमालोक्य लङ्केशं च वह्निनं ।
हर्यश्वयुक्तं रथं तस्मै प्रजिघाय पुरंदरः ॥ ८४ ॥
तमाधूतध्वजपटं व्योमगङ्गोर्मिवायुभिः ।
देवसूतभुजालम्बी क्षत्रमध्यास्त राघवः ॥ ८५ ॥
मातलिस्तस्य माकेन्द्रमामुमोच तनुच्छदं ।
यत्रोत्पलदलस्थौल्यमस्त्राण्यापुः सुरद्विषां ॥ ८६ ॥
अन्योऽन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥ ८७ ॥
भुजमूर्धोरुबाहुल्यादेको ऽपि धनदानुजः ।
ददृशे सो ऽयथापूर्वो मातृवंश इव स्थितः ॥ ८८ ॥
क्षेतारं लोकपालानां स्वमुखैरर्चितेश्वरं ।
रामस्तुलितकैलाशमरातिं बह्वमन्यत ॥ ८९ ॥
तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥ ९० ॥
रावणस्यापि रामास्तो भित्त्वा हृदयमाप्रुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियं ॥ ९१ ॥
वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः ।
अन्योऽन्यक्षयसंरम्भो ववृधे वादिनोरिव ॥ ९२ ॥
विक्रमव्यतिहारेण सामान्यामूद्वयोरपि ।
जयश्रीरुत्तरा वेदिर्मत्तवारणयोरिव ॥ ९३ ॥
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ।
परस्परं शरव्राताः पुष्पवृष्टिं न सेहिरे ॥ ९४ ॥

अयःशङ्कुचितां रक्तः शतघ्नीमथ शत्रवे ।
कृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥ ९५ ॥
राघवो रथमप्राप्तां तामाशां च सुरद्विषां ।
अर्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखं ॥ ९६ ॥
अमोघं संदधे चास्मै धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधं ॥ ९७ ॥
तद्योक्ष्णि दशधा भिन्नं ददृशे दीप्तिमद्मुखं ।
वपुर्मोहगरस्येव करालफणामण्डलं ॥ ९८ ॥
तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनां ॥ ९९ ॥
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
ररक्ष रक्तःकायस्य कण्ठच्छेदपरंपरा ॥ १०० ॥
मुहुर्तां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनःसंधानशङ्किनां ॥ १०१ ॥
अथ मद्गुरुपत्नीर्लोकपालद्विपानामनुगतमलिवृन्दैर्गण्डभित्तीर्विलिम्पाय ।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥ १०२ ॥
यत्ता हरेः सपदि संहृतकार्मुकस्य मापृच्छ्य राघवमनुष्ठितदेवकार्यं ।
नामाङ्करावणशराङ्कितकेतुयष्टिमूर्ध्वं रथं हरिसहस्रयुतं निनाय ॥ १०३ ॥
रघुपतिरपि ज्ञातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीं ॥ १०४ ॥

॥ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ
रावणवधो नाम द्वादशः सर्गः ॥

GESCHICHTE DES VIDŪSHAKA.

Aus dem Kathāsaritsāgara.

ग्रस्ति भूतलविख्याता येयमुज्जयिनी पुरी
तस्यामादित्यसेनाख्यः पूर्वमासीन्नरेश्वरः ॥ १ ॥
ग्रादित्यस्येव यस्येह न चस्खाल किल क्वचित्।
प्रतापनिलयस्यैकचक्रवर्तितया रथः ॥ २ ॥
भासयत्युच्चिते व्योम यच्छत्रे तुहिनद्विषि।
न्यवर्तन्तातपत्राणि राज्ञामपगतोष्मणां ॥ ३ ॥
समस्तभूतलाभोगसंभवानां बभूव सः।
भाजनं सर्वरत्नानामम्बुराशिरिवाम्भसां ॥ ४ ॥
स कदाचन कस्यापि हेतोर्यत्रागतो नृपः।
ससैन्यो जाह्नवीकूलमासाद्यावस्थितो ऽभवत् ॥ ५ ॥
तत्रं तं गुणवर्माख्यः को ऽप्याप्तस्तत्प्रदेशजः।
ग्रभ्यगाद्दृषमादाय कन्यारत्नमुपायनं ॥ ६ ॥
रत्नं त्रिभुवने ऽप्येषा कन्योत्पन्ना गृहे मम।
नान्यत्र दातुं शक्या च देवो हि प्रभुरीदृशः ॥ ७ ॥
इत्यावेद्य प्रतीहारमुखेनात्र प्रविश्य सः।
गुणवर्मा निजां तस्मै राज्ञे कन्यामदर्शयत् ॥ ८ ॥
स तां तेजस्वतीं नाम दीप्तिद्योतितदिङ्मुखां।
ग्रनङ्गमङ्गलावासरत्नदीपशिखामिव ॥ ९ ॥

पश्यन्स्नेहमयो राज्ञाश्लिष्टस्तत्कान्तितेजसा ।
कामाग्निनेव संतप्तः स्विन्नो विगलितः स च ॥ १० ॥
स्वीकृत्यैतां च तत्कालं महादेवीपदोचितां ।
चकार गुणवर्माणं परितुष्यात्मनः समं ॥ ११ ॥
ततस्तां परिणीयैव प्रियां तेजस्वतीं नृपः ।
कृतार्थमानी स तया साकमुज्जयिनीं ययौ ॥ १२ ॥
तत्र तन्मुखसक्तैकदृष्टी राज्ञा क्वभूत्तथा ।
ददर्श राजकार्याणि न यथा सुमहात्यपि ॥ १३ ॥
तेजस्वतीकलालापकीलितेव किल श्रुतिः ।
नावसन्नप्रलापाक्रन्दैस्तस्याक्रष्टुमशक्यत ॥ १४ ॥
चिरप्रविष्टो निरगाद्दैव सो ऽन्तःपुराद्भृशं ।
निरगादरिवर्गस्य हृदयात्तु रुजाऽवरः ॥ १५ ॥
कालेन तस्य जज्ञे च राज्ञः सर्वाभिनन्दिता ।
कन्या तेजस्वतीदेव्यां बुद्धौ च विजिगीषुता ॥ १६ ॥
परमाद्भुतरूपा सा तृणीकृत्य जगत्त्रयं ।
हर्षं तस्याकरोत्कन्या प्रतापं च जिगीषुता ॥ १७ ॥
अथाभियोक्तुमुत्सिक्तं सामन्तं कंचिदेकदा ।
आदित्यसेनः प्रययावुज्जयिन्याः स भूपतिः ॥ १८ ॥
तां च तेजस्वतीं राज्ञीं समारूढकरेणुकां ।
सर्वप्रयायिणीं चक्रे सैन्यस्येवाधिदेवतां ॥ १९ ॥
आरुरोह वराश्वं च दर्पोद्भटनिकरं ।
जङ्गमाद्रिनिभं तुङ्गं सग्रीवोन्नं समोवलं ॥ २० ॥
आसक्रोत्थितपादाभ्यामभ्यस्यन्तीमवाम्बरे ।
गतिं गरुत्मतो दृष्ट्वा वेगसञ्चलचारिणः ॥ २१ ॥

ऽवस्य मम पर्याप्तः किं नु स्यादिति मेदिनीं ।
कलयन्तमिवोद्वम्य कंधरां धीरया दृशा ॥ २२ ॥
किंचिद्भत्वा च संप्राप्य समां भूमिं स भूपतिः ।
अश्वमुत्तेजयामास तेजस्वत्याः प्रदर्शयन् ॥ २३ ॥
सो ऽश्वस्तत्पार्ष्णिघातेन यत्नेणेवेरितः शरः ।
जगाम क्वाप्यतिजवादलक्ष्यो लोकलोचनैः ॥ २४ ॥
तद्दृष्ट्वा विह्वले सैन्ये क्वयोल्काः सहस्रधा ।
अन्वधावन्न च प्रापुस्तमश्वापहृतं नृपं ॥ २५ ॥
ततश्चानिष्टमाशङ्क्य ससैन्या मन्त्रिणो भयात् ।
आदाय देवीं क्रन्दन्तीं निवृत्योज्जयिनीं ययुः ॥ २६ ॥
तत्र ते पिहितद्वारकृतप्राकारगुप्तयः ।
राज्ञः प्रवृत्तिं चिन्वन्तस्तस्थुराश्वासितप्रजाः ॥ २७ ॥
अत्रान्तरे स राज्ञापि नीतो ऽभूतेन वाजिना ।
सौद्रसिंहसंचारां दुर्गां विन्ध्याटवीं क्षणात् ॥ २८ ॥
तत्र दैवात्स्थिते तस्मिन्नश्वे स सहसा नृपः ।
आसीन्महाटवीदत्तदिग्मोहो विह्वलाकुलः ॥ २९ ॥
गतिमन्यामपश्यंश्च सो ऽवतीर्य प्रणम्य च ।
तं जगादाश्वजातिज्ञो राज्ञा वरतुरंगमं ॥ ३० ॥
देवस्त्वं न प्रभुर्द्रोहं वादृशः कर्तुमर्हति ।
तन्मे त्वमेव शरणं शिवेन नय मां पथा ॥ ३१ ॥
तच्छ्रुत्वा सानुतापः सन्सो ऽश्वो जातिस्मरस्तदा ।
तत्तथेत्यग्रहीद्बुद्ध्या दैवतं हि क्वयोत्तमाः ॥ ३२ ॥
ततो राज्ञि समारूढे स प्रतस्थे तुरंगमः ।
स्वच्छशीताम्बुसरसा मार्गेणाधत्तमच्छिदा ॥ ३३ ॥

सायं च प्रापयामास स योजनशतान्तरं ।
उज्जयिन्याः समीपं तं रात्रानं वाह्निसत्तमः ॥ ३४ ॥
तद्वेगविह्वितान्वीक्ष्य सप्तापि निजवाह्निनः ।
अस्ताद्रिकन्दरालीने लज्जयेवांशुमालिनि ॥ ३५ ॥
तमसि प्रसृते द्वाराण्युज्जयिन्यां विलोक्य सः ।
पिहितानि श्मशानं च वह्निस्तत्कालभीषणं ॥ ३६ ॥
निनायैनं निवासाय भूपतिं बुद्धिमान्क्वयः ।
वाह्यैकान्तस्थितं तत्र गुप्तं विप्रमठं निशि ॥ ३७ ॥
निशातिवाह्ययोग्यं च तं स दृष्ट्वा मठं नृपः ।
आदित्यसेनः प्रारेभे प्रवेष्टुं आप्तवाहनः ॥ ३८ ॥
रुरुधुस्तस्य विप्राश्च प्रवेशं तद्विवासिनः ।
श्मशानपालश्चौरो वा को ऽप्यसाविति वादिनः ॥ ३९ ॥
निर्ययुस्ते च संसक्तकलकोलाहलानिद्रुराः ।
भयकार्कश्यकोपानां गृहं हि च्छान्दसा द्विजाः ॥ ४० ॥
रटत्सु तेषु तत्रैको निर्ययौ तो मठात् ।
विदूषकाख्यो गुणवान्धुर्यः सत्त्ववतां द्विजः ॥ ४१ ॥
यो युवा वाङ्मशाली च तपसाराध्य पावकं ।
प्राप खड्गोत्तमं तस्माद्घातमात्रोपगामिनं ॥ ४२ ॥
स दृष्ट्वा तं निशि प्राप्तं धीरो भव्याकृतिं नृपं ।
प्रच्छन्नः को ऽपि देवो ऽयमिति दध्यौ विदूषकः ॥ ४३ ॥
विधूय विप्रांश्चान्यांस्तान्स सर्वानुचिताशयः ।
नृपं प्रवेशयामास मठान्तः प्रश्रयानतः ॥ ४४ ॥
विश्रान्तस्य च दासीभिर्धूताधश्रमसः क्षणात् ।
आहारं कल्पयामास राज्ञस्तस्य निशोचितं ॥ ४५ ॥

तं चापनीतपर्याणं तदीयं तुरगोत्तमं ।
यवसादिप्रदानेन चकार विगतश्रमं ॥ ४६ ॥
स्नाम्यहं शरीरं ते तत्सुखं स्वपिहि प्रभो ।
इत्युवाच च तं आत्तमास्तीर्णशयनं नृपं ॥ ४७ ॥
सुप्ते च तस्मिन्द्वारस्थो जागरामास स द्विजः ।
चिन्तितोपस्थिताग्नेयखड्गस्तो ऽखिलां निशां ॥ ४८ ॥
प्रातश्च तस्य नृपतेः प्रबुद्धस्यैव स स्वयं ।
अनुक्त एव तुरगं सज्जीचक्रे विदूषकः ॥ ४९ ॥
राज्ञापि स तमामन्त्र्य समारुह्य च वाजिनं ।
विवेशोज्जयिनीं दूराद्दृष्टो हर्षाकुलैर्जनैः ॥ ५० ॥
प्रविष्टमभिजग्मुस्तं सर्वाः प्रकृतयः क्षणात् ।
तदागमनजानन्दलसत्कलकलारवाः ॥ ५१ ॥
आययौ राजभवनं स राज्ञा सचिवान्वितः ।
ययौ तेजस्वतोदेव्या मनसश्च महाऽवरः ॥ ५२ ॥
वाताकृतोत्सवान्वितपताकांशुकपङ्क्तिभिः ।
उत्सारिता इवाभूवन्नगर्यास्तत्क्षणं प्रुचः ॥ ५३ ॥
अकरोदादिनान्तं च देवी तावन्महोत्सवं ।
यावद्गरलोको ऽभूत्सार्कः सिन्दूरपिङ्गलः ॥ ५४ ॥
अन्येद्युः स तमादित्यसेनो राज्ञा विदूषकं ।
मठादानाययामास तस्मात्सर्वैर्द्विजैः सह ॥ ५५ ॥
प्रख्याप्य रात्रिवृत्तान्तं ददौ तस्मै स तत्क्षणं ।
विदूषकाय ग्रामाणां सहस्रमुपकारिणे ॥ ५६ ॥
पौरोहित्ये च चक्रे तं प्रदत्तच्छत्रवाहनं ।
विप्रं कृतज्ञो नृपतिः कौतुकालोकितं जनैः ॥ ५७ ॥

एवं तदैव सामन्ततुल्यः सो ऽभूद्विदूषकः ।
मोघा हि नाम ज्ञायेत मत्कृतूपकृतिः कुतः ॥ ५८ ॥
यांश्च प्राप नृपाद्ग्रामांस्तान्स सर्वान्मत्काशयः ।
तन्नठाश्रयिभिर्विप्रैः समं साधारणं व्यधात् ॥ ५९ ॥
तस्थौ च सेवमानस्तं राज्ञानं स तदाश्रितः ।
भुञ्जानश्च सहान्यैस्तैर्ब्राह्मणैर्ग्रामसंचयं ॥ ६० ॥
काले गच्छति चान्ये ते सर्वे प्राधान्यमिच्छवः ।
नैव तं गणयामासुर्द्विजा धनमदोद्धताः ॥ ६१ ॥
विभिन्नैः सप्तसंख्याकैरेकस्थानाश्रयैर्मिथः ।
संघर्षात्तैरबाध्यन्त ग्रामा दुष्टैर्ग्रहैरिव ॥ ६२ ॥
उच्छृङ्खलेषु तेषासीदुदासीनो विदूषकः ।
अल्पसत्त्वेषु धीराणामवज्ञैव हि शोभते ॥ ६३ ॥
एकदा कलहासक्तान्दृष्ट्वा तानभ्युपाययौ ।
कश्चिच्चक्रधरो नाम विप्रः प्रकृतिनिष्ठुरः ॥ ६४ ॥
परार्थन्यायवादेषु काणो ऽप्यस्खलदर्शनः ।
कुब्जो ऽपि वाचि सुस्पष्टो विप्रस्तानित्यभाषत । ६५ ॥
प्राप्ता भिक्षाचरैर्भूत्वा भवद्भिः श्रोत्रियं शठाः ।
तद्वाशयध किं ग्रामानन्योऽन्यमसहिष्णवः ॥ ६६ ॥
विदूषकस्य दोषो ऽयं येन यूयमुपेक्षिताः ।
तदसंदिग्धमचिरात्पुनर्भिक्षां भ्रमिष्यथ ॥ ६७ ॥
वरं हि दैवायत्तैकवृत्ति स्थानमनायकं ।
न तु विप्लुतसर्वार्थं विभिन्नं बहुनायकं ॥ ६८ ॥
तदेकं नायकं धीरं कुरुध्वं वचसा मम ।
स्थिरया यदि कृत्यं वो धुर्यरक्षितया श्रिया ॥ ६९ ॥

तच्छ्रुत्वा नायकत्वं ते सर्वे ऽप्यैच्छन्यदात्मनः ।
तदा विचित्य मूढांस्तान्पुनश्चक्रधरो ऽब्रवीत् ॥ ७० ॥
संघर्षशालिनां तर्हि समयं वो ददाम्यहं ।
इतः श्मशाने प्रूलायां त्रयश्चौरा निसूदिताः ॥ ७१ ॥
नासास्तेषां निशि च्छित्त्वा यः सुसत्त्व इहानयेत् ।
स युष्माकं प्रधानं स्याद्वीरो हि स्वाम्यमर्हति ॥ ७२ ॥
इति चक्रधरेणोक्तान्विप्रांस्तानन्तिकस्थितः ।
कुरुध्वमेतत्को दोष इत्युवाच विद्रूषकः ॥ ७३ ॥
ततस्ते ऽप्यावदन्विप्रा नैतत्कर्तुं क्षमा वयं ।
यो वा शक्तः स कुरुतां समये च वयं स्थिताः ॥ ७४ ॥
ततो विद्रूषको ऽवादीदहमेतत्करोमि भोः ।
आनयामि निशि च्छित्त्वा नासास्तेषां श्मशानतः ॥ ७५ ॥
ततस्तद्दुष्करं मत्वा ते ऽपि मूढास्तमब्रुवन् ।
एवं कृते त्वमस्माकं स्वामी नियम एष नः ॥ ७६ ॥
इत्येवं ख्याप्य नियमं प्राप्तायां रजनौ च तान् ।
आमन्त्र्य विप्रान्प्रययौ श्मशानं स विद्रूषकः ॥ ७७ ॥
प्रविवेश च तद्वीरो निशं कर्मेव भीषणं ।
चिताभितोपस्थिताग्नेयकृपाणीकपरिग्रहः ॥ ७८ ॥
डाकिनीनादसंवृद्धगृध्रवायसवाशिते ।
उल्कामुखमुखोल्काग्निविस्तारितचितानले ॥ ७९ ॥
ददर्श तत्र मध्ये च स ताञ्शूलाधिरोपितान् ।
पुरुषान्नासिकाछेदभियेवोर्ध्वकृताननान् ॥ ८० ॥
यावच्च निकटं तेषां प्राप तावत्त्रयो ऽपि ते ।
वेतालाधिष्ठितास्तस्मिन्प्रक्ष्वरन्ति स्म मुष्टिभिः ॥ ८१ ॥

निष्कम्प एव खड्गेन सो ऽपि प्रतिनघान तान् ।
न शिक्षितः प्रयत्नो हि धीराणां हृदये भिया ॥ ८२ ॥
तेनापगतवेतालविकाराणां स नासिकाः ।
तेषां चकर्त वङ्खा च कृती जग्राह वाससि ॥ ८३ ॥
आगच्छंश्च ददर्शैकं शवस्योपरि संस्थितं ।
प्रव्राजकं श्मशाने ऽत्र जपन्तं स विदूषकः ॥ ८४ ॥
तच्चेष्टालोकनक्रीडाकौतुकाडुपगम्य च ।
प्रच्छन्नः पृष्ठतस्तस्य तस्थौ प्रव्राजकस्य सः ॥ ८५ ॥
क्षणात्प्रव्राजकस्याधः फूत्कारं मुक्तवाञ्शवः ।
निरगाच्च मुखात्तस्य ज्वाला नाभेश्च सर्षपाः ॥ ८६ ॥
गृहीत्वा सर्षपांस्तांश्च स परिव्राजकस्ततः ।
उत्थाय ताडयामास शवं पाणितलेन तं ॥ ८७ ॥
उदतिष्ठत्स चोत्तालवेतालाधिष्ठितः शवः ।
आरुरोह च तस्यैव स्कन्धे प्रव्राजको ऽथ सः ॥ ८८ ॥
तदाद्रुश्च सहसा गन्तुं प्रववृते ततः ।
विदूषको ऽपि तं तूष्णीमन्वगच्छदलक्षितः ॥ ८९ ॥
नातिदूरमतिक्रम्य स ददर्श विदूषकः ।
शून्यं कात्यायनीमूर्तिसनाथं देवतागृहं ॥ ९० ॥
तत्रावतीर्य वेतालस्कन्धात्प्रव्राजकस्ततः ।
विवेश गर्भभवनं वेतालो ऽप्यपतद्भुवि ॥ ९१ ॥
विदूषकश्च तत्रासीद्युक्त्या पश्यन्नलक्षितः ।
प्रव्राजको ऽपि संपूज्य तत्र देवीं व्यजिज्ञपत् ॥ ९२ ॥
तुष्टासि यदि तद्देवि देहि मे वरमीप्सितं ।
अन्यथात्मोपहारेण प्रीणामि भवतीमहं ॥ ९३ ॥

इत्युक्तवन्तं तं तीव्रमन्त्रसाधनगर्वितं ।
प्रव्राजकं जगादैवं वाणी गर्भगृहोद्गता ॥ ९४ ॥
आदित्यसेननृपतेः सुतामानीय कन्यकां ।
उपकारीकुरुष्वेह ततः प्राप्स्यसि वाञ्छितं ॥ ९५ ॥
एतच्छ्रुत्वा स निर्गत्य कोणाकृत्य तं पुनः ।
प्रव्राजुत्थापयामास वेतालं मुक्तफूत्कृतिं ॥ ९६ ॥
तस्य च स्कन्धमारुह्य निर्यद्वक्त्रानलार्चिषः ।
आनेतुं राजपुत्रीं तामुत्पत्य नभसा ययौ ॥ ९७ ॥
विदूषको ऽपि तत्सर्वं दृष्ट्वा तत्र व्यचिन्तयत् ।
कथं राज्ञः सुतानेन क्रन्यते मयि जीवति ॥ ९८ ॥
इहैव तावत्तिष्ठामि यावदायात्यसौ शठः ।
इत्यालोच्य स तत्रैव तस्थौ क्षुब्धो विदूषकः ॥ ९९ ॥
प्रव्राजकश्च गत्वैव वातायनपथेन सः ।
प्रविश्यान्तःपुरं प्राप सुप्तां निशि नृपात्मजां ॥ १०० ॥
आययौ च गृहीत्वा तां गगणेन तमोमयः ।
कान्तिप्रकाशितदिशं राज्ञः शशिकलामिव ॥ १०१ ॥
हा तात हाम्बेति च तां क्रन्दन्तीं कन्यकां वदन् ।
तत्रैव देवीभवने सो ऽन्तरिक्षादवातरत् ॥ १०२ ॥
प्रविवेश च तत्कालं वेतालं प्रविमुच्य सः ।
कन्यारत्नं तदादाय देवीगर्भगृहान्तरं ॥ १०३ ॥
तत्र यावद्विक्रन्तुं तां राजपुत्रीमियेष सः ।
तावदाकृष्टखड्गो ऽत्र प्रविवेश विदूषकः ॥ १०४ ॥
आः पाप मालतीपुष्पमश्नना क्रन्तुमीक्षसे ।
यदस्यामाकृतौ शस्त्रं व्यापारयितुमिच्छसि ॥ १०५ ॥

इत्युक्त्वाकृष्य केशेषु शिरस्तस्य विवेष्टतः ।
प्रव्राजकस्य चिच्छेद खड्गेन स विदूषकः ॥ १०६ ॥
आश्वासयामास च तां राजपुत्रीं भयाकुलां ।
प्रविशन्तीमिवाङ्गानि किंचित्प्रत्यभिज्ञानतीं ॥ १०७ ॥
कथमन्तःपुरं रात्रौ राजपुत्रीमिमामितः ।
नयेयमिति तत्कालं स च वीरो व्यचिन्तयत् ॥ १०८ ॥
भो विदूषक प्राणेतव्यो ऽयं प्रव्राट्त्वया कृतः ।
मन्त्रानेतस्य वेतालः सिद्धो ऽभूत्सर्षपास्तथा ॥ १०९ ॥
ततो ऽस्य पृथ्वीराज्ये च वाञ्छा राजात्मजासु च ।
उदपद्यत तेनायमेवं मूढो ऽद्य वञ्चितः ॥ ११० ॥
तद्गृह्णीतदीयांस्त्वं सर्षपान्वीर येन ते ।
इमामेकां निशामद्य भविष्यत्यम्बरे गतिः ॥ १११ ॥
इत्याकाशगता वाणी ज्ञातहर्षं जगाद तं ।
अनुगृह्णन्ति हि प्रायो देवता अपि तादृशं ॥ ११२ ॥
ततो वस्त्राञ्चलात्तस्य स परिव्राजकस्य तान् ।
जग्राह सर्षपान्हस्ते तामङ्के च नृपात्मजां ॥ ११३ ॥
यावच्च देवीभवनात्स तस्माद्दिर्ययौ बहिः ।
उच्चचार पुनस्तावदन्या नभसि भारती ॥ ११४ ॥
इहैव देवीभवने मासस्यान्ते पुनस्त्वया ।
आगन्तव्यं महावीर विस्मर्तव्यमिदं न ते ॥ ११५ ॥
तच्श्रुत्वा स तथेत्युक्त्वा सद्यो देवीप्रसादतः ।
उत्पपात नभो विभ्रद्राजपुत्रीं विदूषकः ॥ ११६ ॥
गत्वा च गगणेनाशु स तामन्तःपुरान्तरं ।
प्रावेशयद्राजसुतां समाश्वस्तामुवाच च ॥ ११७ ॥

न मे भविष्यति प्रातर्गतिर्व्योम्नि ततश्च मां ।
सर्वे द्रक्ष्यन्ति निर्यान्तं तत्संप्रत्येव यास्यहं ॥ ११८ ॥
इति तेनोदिता बाला विभ्यती सा जगाद तं ।
गते त्वयि मम प्राणास्त्रासाक्रान्ताः प्रयास्यमी ॥ ११९ ॥
तद्मन्दभाग मा गास्त्वं देहि मे जीवितं पुनः ।
प्रतिपन्नार्थनिर्वाहः सद्भिः किं हि सतां व्रतं ॥ १२० ॥
तच्छ्रुत्वा चिन्तयामास स सुसत्त्वो विदूषकः ।
त्यक्त्वेमां यदि गच्छामि मुञ्चेत्प्राणान्भयादियं ॥ १२१ ॥
ततश्च नृपतेर्भक्तिः का मया विहिता भवेत् ।
इत्यालोच्य स तत्रैव तस्थावन्तःपुरे निशि ॥ १२२ ॥
व्यायामजागरश्रान्तो ययौ निद्रां शनैश्च सः ।
राजपुत्री त्वनिद्रैव भीता तामनयद्दिशां ॥ १२३ ॥
विश्राम्यतु क्षणं तावदिति प्रेमार्द्रमानसा ।
सुप्तं प्रबोधयामास सा प्रभाते ऽपि नैव तं ॥ १२४ ॥
ततः प्रविष्टा ददृशुस्तमन्तःपुरचारिकाः ।
ससंभ्रमाश्च गत्वैव राज्ञानं तं व्यजिज्ञपन् ॥ १२५ ॥
राज्ञाप्यवेक्षितुं तत्त्वं प्रतीहारं व्यसर्जयत् ।
प्रतीहारश्च गत्वान्तस्तत्रापश्यद्विदूषकं ॥ १२६ ॥
शुश्राव च यथावृत्तं स तद्राजसुतामुखात् ।
तथैव गत्वा राज्ञे च स समग्रं न्यवेदयत् ॥ १२७ ॥
विदूषकस्य सत्त्वज्ञस्तच्छ्रुत्वा स महीपतिः ।
किमेतत्स्यादिति क्षिप्रं समुद्भ्रान्त इवाभवत् ॥ १२८ ॥
आनाययच्च दुहितुर्मन्दिरात्तं विदूषकं ।
दत्तानुयात्रं मनसा तस्याः स्नेहानुपातिना ॥ १२९ ॥

पप्रच्छ च यथावृत्तं स राज्ञा तमुपागतं ।
आमूलतश्च सो ऽप्यस्मै विप्रो वृत्तान्तमब्रवीत् ॥ १३० ॥
अदर्शयच्च वस्त्रान्ते निबद्धाश्चौरनासिकाः ।
प्रव्राट्कुटुम्बिनस्तांश्च सर्वपान्भूमिभेदिनः ॥ १३१ ॥
ततः संभाव्य सत्यं तत्तांश्चानाय्य मठद्विजान् ।
सर्वांश्च चक्रधरोपेतान्पृष्ट्वा तन्मूलकारणं ॥ १३२ ॥
स्वयं श्मशाने गत्वा च दृष्ट्वा तांश्छिन्ननासिकान् ।
पुरुषांस्तं च निर्लूनकण्ठं प्रव्राजकाधमं ॥ १३३ ॥
उत्पन्नप्रत्ययो राज्ञा स तुतोष महाशयः ।
विदूषकाय कृतिने सुताप्राणप्रदायिने ॥ १३४ ॥
ददौ तस्मै च तामेव तदैव तनयां निजां ।
किमदेयमुदाराणामुपकारिषु तुष्यतां ॥ १३५ ॥
श्रीरुवासाम्बुजप्रीत्या नूनं राजसुताकरे ।
गृहीतपाणिर्येनास्या लेभे लक्ष्मीं विदूषकः ॥ १३६ ॥
ततो राज्ञोपचारेण स तया कान्तया सह ।
आदित्यसेननृपतेस्तस्थौ श्लाघ्ययशा गृहे ॥ १३७ ॥
अथ यातेषु दिवसेष्वेकदा दैवचोदिता ।
तमुवाच निशायां सा राजपुत्री विदूषकं ॥ १३८ ॥
नाथ स्मरसि यत्तत्र तव देवीगृहे निशि ।
मासान्ते त्वमिहागच्छेरित्युक्तं दिव्यया गिरा ॥ १३९ ॥
तत्र चाद्य गतो मासो भवतस्तच्च विस्मृतं ।
इत्युक्तः प्रियया स्मृत्वा स जहर्ष विदूषकः ॥ १४० ॥
साधु स्मृतं त्वया तन्वि विस्मृतं तन्मया पुनः ।
इत्युक्तालिङ्गनं चास्यै स ददौ पारितोषिकं ॥ १४१ ॥

सुप्तायां च ततस्तस्यां निर्गत्यान्तःपुराद्विशि ।
आदाय खड्गं स्वस्थः संस्तद्देवीभवनं ययौ ॥ १४२ ॥
प्राप्तो विद्रूषको ऽहं भोरिति तत्र वदन्बहिः ।
प्रविशेत्यशृणोद्वाचमन्तः केनाप्युदीरितां ॥ १४३ ॥
प्रविश्य चान्तरे सो ऽत्र दिव्यमावासमैक्षत ।
तदन्तर्दिव्यरूपां च कन्यां दिव्यपरिच्छदां ॥ १४४ ॥
स्वप्रभाभिन्नतिमिरां रत्ननीं ज्वलितामिव ।
कृकोपाग्निनिर्दग्धस्मरसंजीवनौषधीं ॥ १४५ ॥
किमेतदिति साश्चर्यः स तया दृष्टया स्वयं ।
सस्नेहबहुमानेन स्वागतेनाभ्यनन्द्यत ॥ १४६ ॥
उपविष्टं च संज्ञातविश्रम्भं प्रेमदर्शनात् ।
तत्स्वरूपपरिज्ञानसोत्सुकं सा तमब्रवीत् ॥ १४७ ॥
अहं विद्याधरीकन्या भद्रा नाम महान्वया ।
इह कामचरत्वाच्च त्वामपश्यमहं तदा ॥ १४८ ॥
त्वद्गुणाकृष्टचित्ता च तत्कालमहमेव तां ।
अदृश्यां वाणीमसृजं पुनरागमनाय ते ॥ १४९ ॥
अद्य विद्याप्रयोगाच्च संमोह्य प्रेरिता मया ।
सा ते रात्रसुतैवास्मिन्कार्ये स्मृतिमजीजनत् ॥ १५० ॥
त्वदर्थं च स्थितास्मीह तत्तुभ्यमिदमर्पितं ।
शरीरं सुन्दर मया कुरु पाणिग्रहं मम ॥ १५१ ॥
इत्युक्तो भद्रया भव्यो विद्याधर्या विद्रूषकः ।
तथेति परिणिन्ये तां गान्धर्वविधिना तदा ॥ १५२ ॥
अतिष्ठदथ तत्रैव दिव्यं भोगमवाप्य सः ।
स्वपौरुषफलान्येव प्रियया संगतस्तया ॥ १५३ ॥

अत्रान्तरे प्रबुद्धा सा राजपुत्री निशात्यये ।
भर्तारं तमपश्यन्ती विषादं सक्सागमत् ॥ १५४ ॥
उत्थाय चान्तिकं मातुः प्रस्खलद्भिः पदैर्ययौ ।
विह्वला सा गलद्बाष्पतरंगितविलोचना ॥ १५५ ॥
स पतिर्मे गतः क्वापि रात्राविति च मातरं ।
आत्मापराधसभया सानुतापा च साभ्यधात् ॥ १५६ ॥
ततस्तद्मातरि स्नेहात्संभ्रान्तायां क्रमेण तद् ।
बुद्ध्वा राज्ञापि तत्रेत्य परमाकुलतामगात् ॥ १५७ ॥
ज्ञाने श्मशानवाक्यं तद्गतो ऽसौ देवतागृहं ।
इत्युक्तो राजसुतया राज्ञा तत्र स्वयं ययौ ॥ १५८ ॥
तत्र विद्याधरोविद्याप्रभावेन तिरोहितं ।
विचित्यापि न लेभे तं स क्षितीशो विदूषकं ॥ १५९ ॥
ततो रात्रि परावृत्ते निराशां तां नृपात्मजां ।
देवत्यागोन्मुखीमेत्य ज्ञानी को ऽप्यब्रवीदिदं ॥ १६० ॥
नारिष्टशङ्का कर्तव्या स हि ते वर्तते पतिः ।
युक्तो दिव्येन भोगेन त्वामुपैष्यति चाचिरात् ॥ १६१ ॥
तच्छ्रुत्वा राजपुत्री सा धारयामास जीवितं ।
क्वचिद् प्रविष्टया रुद्धं तत्प्रत्यागमवाञ्छया ॥ १६२ ॥
विदूषकस्यापि ततस्तिष्ठतस्तत्र तां प्रियां ।
भद्रां योगेश्वरी नाम सखी काचिदुपाययौ ॥ १६३ ॥
उपेत्य स रहस्येनामिदं भद्रामथाब्रवीत् ।
सखि मानुषसंसर्गात्क्रुद्धा विद्याधरास्त्वयि ॥ १६४ ॥
पापं च ते चिकीर्षन्ति तदितो गम्यतां त्वया ।
अस्ति पूर्वाम्बुधेः पारे पुरं कार्कोटकाभिधं ॥ १६५ ॥

*

तदतिक्रम्य च नदी शीतोदा नाम पावनी ।
तीर्त्वा तामुदयाख्यश्च सिद्धिक्षेत्रं महागिरिः ॥ १६६ ॥
विद्याधरैरनाक्रम्यस्तत्र त्वं गच्छ सांप्रतं ।
प्रियस्य मानुषस्येह कृते चिन्तां च मा कृथाः ॥ १६७ ॥
एतद्धि सर्वमेतस्य कथयित्वा गमिष्यसि ।
येनैष पश्चात्तत्रैव सत्वरो ह्यागमिष्यति ॥ १६८ ॥
इत्युक्ता सा तया सख्या भद्रा भयवशीकृता ।
विदूषकानुरक्तापि प्रतिपेदे तथेति तद् ॥ १६९ ॥
उक्ता च तस्य तद्युक्त्या दत्त्वा च स्वाङ्गुलीयकं ।
विदूषकस्य रात्र्यन्तसमये सा तिरोदधे ॥ १७० ॥
विदूषकश्च पूर्वस्मिञ्शून्ये देवगृहे स्थितं ।
क्षणादपश्यदात्मानं न भद्रां न च मन्दिरं ॥ १७१ ॥
स्मरन्विद्याप्रपञ्चं च पश्यंश्चैवाङ्गुलीयकं ।
विषादविस्मयावेशवशः सो ऽभूद्विदूषकः ॥ १७२ ॥
अचिन्तयच्च तस्याः स वचः स्वप्नमिव स्मरन् ।
गता तावद्विवेद्यैव मम सोदयपर्वतं ॥ १७३ ॥
तन्नयाप्याप्नु तत्रैव गन्तव्यं तदवाप्तये ।
न चैवं लोकदृष्टं मां लब्ध्वा राजा परित्यजेत् ॥ १७४ ॥
तस्माद्युक्तिं करोमीह कार्यं सिध्यति मे यथा ।
इति संचिन्त्य मतिमान्नृपमन्यत्स शिश्रिये ॥ १७५ ॥
जीर्णवासा रजोलिप्तो भूत्वा देवीगृहात्ततः ।
निरगादथ हा भद्रे हा भद्र इति स ब्रुवन् ॥ १७६ ॥
तत्क्षणं च विलोक्यैनं जनास्तद्देशवर्तिनः ॥
सो ऽयं विदूषकः प्राप्त इति कोलाहलं व्यधुः ॥ १७७ ॥

बुद्ध्वा च राज्ञा निर्गत्य स्वयं दृष्ट्वा तथाविधः ।
उन्मत्तचेष्टो ऽवष्टभ्य स नीतो ऽभूत्स्वमन्दिरं ॥ १७८ ॥
तत्र स्नेहाकुलैर्यद्वदुक्तो ऽभूद्भृत्यबान्धवैः ।
तत्र तत्र स क्व भद्र इति प्रत्युत्तरं ददौ ॥ १७९ ॥
वैद्योपदिष्टैरभ्यङ्गैरभ्यक्तो ऽपि स तत्क्षणं ।
अङ्गमुद्धूलयामास भूरिणा भस्मरेणुना ॥ १८० ॥
स्नेहेन राजपुत्र्या च स्वकरताभ्यामुपाकृतः ।
आहारस्तेन सहसा पादेनाकृत्य चिक्षिपे ॥ १८१ ॥
एवं स तस्थौ कतिचिद्दिवसांस्तत्र निःस्पृहः ।
पाटयन्निजवस्त्राणि कृतोन्मादो विदूषकः ॥ १८२ ॥
अशक्यप्रतिकारो ऽयं तत्किमर्थं कदर्थ्यते ।
त्यजेत्कदाचन प्राणान्ब्रह्महत्या भवेत्ततः ॥ १८३ ॥
स्वच्छन्दचारिणस्त्वस्य कालेन कुशलं भवेत् ।
इत्यालोच्य स चादित्यसेनो राज्ञा मुमोच तं ॥ १८४ ॥
ततः स्वच्छन्दचारी सन्नन्येद्युः साङ्गुलीयकः ।
वीरो भद्रां प्रति स्वैरं स प्रतस्थे विदूषकः ॥ १८५ ॥
गच्छन्नक्षरक्षः प्राच्यां दिशि प्राप स च क्रमात् ।
मध्ये मार्गविशायातं नगरं पौण्ड्रवर्धनं ॥ १८६ ॥
मातस्त्र वसाम्येकां रात्रिमित्यभिधाय सः ।
ब्राह्मणयास्तत्र कस्याश्चिद्गृहायाः प्राविशद्गृहं ॥ १८७ ॥
प्रतिपन्नाश्रया सा च कृतातिथ्या क्षणान्तरे ।
ब्राह्मणी समुपेत्यैवं सान्त्वदुर्भ्वा जगाद् तं ॥ १८८ ॥
तुभ्यमेव मया दत्तं पुत्र सर्वमिदं गृहं ।
तद्गृहाण यतो नास्ति जीवितं मम सांप्रतं ॥ १८९ ॥

कस्मादेवं ब्रवीषीति तेनोक्ता विस्मितेन सा ।
श्रूयतां कथयाम्येतदित्युक्ता पुनरब्रवीत् ॥ १९० ॥
अस्तीह देवसेनाख्यो नगरे पुत्र भूपतिः ।
तस्य चैका समुत्पन्ना कन्या भूतलभूषणं ॥ १९१ ॥
मया दुष्खेन लब्धेयमिति तां दुष्खलब्धिकां ।
नाम्ना चकार्षि नृपस्तनयामतिवत्सलः ॥ १९२ ॥
कालेन यौवनाद्रूढामानीताय स्ववेश्मनि ।
राज्ञे कच्छपनाथाय तां प्रादाच्चैव भूपतिः ॥ १९३ ॥
स कच्छपेश्वरस्तस्या बद्धा वासगृहं निशि ।
प्रविष्ट एव प्रथमं तत्कालं पञ्चतां ययौ ॥ १९४ ॥
ततो विमनसा राज्ञा भूयो ऽप्येतेन सा सुता ।
दत्तान्यस्मै नृपायाभूत्सो ऽपि तद्वद्व्यपद्यत ॥ १९५ ॥
तद्भयाच्च यदान्ये ऽपि नृपा वाञ्छन्ति नैव तां ।
तदा सेनापतिं राज्ञा निजमेवं समादिशत् ॥ १९६ ॥
इतो देशाद्व्ययैकैकः क्रमादेकैकतो गृह्यात् ।
पुमान्प्रत्यक्षमानेयो ब्राह्मणः क्षत्रियो ऽपि वा ॥ १९७ ॥
आनीय च प्रवेश्यो ऽत्र रात्रौ मत्पुत्रिकागृहे ।
पश्यामो हि कियत्तो ऽत्र विपत्स्यन्ते कियच्चिरं ॥ १९८ ॥
यस्तरिष्यति पश्चाच्च सो ऽस्या भर्ता भविष्यति ।
गतिः शक्या परिच्छेत्तुं न ह्यद्भुतविधेर्विधेः ॥ १९९ ॥
इति सेनापतौ राज्ञा समादिष्टे दिने दिने ।
वारक्रमेण गेहेभ्यो नयत्येव नरानिह ॥ २०० ॥
एवं च तत्र यातानि त्रयं नरशतान्यपि ।
मम चाकृतपुण्याया एकः पुत्रो ऽत्र वर्तते ॥ २०१ ॥

तस्य वारो ऽद्य संप्राप्तस्तत्र गन्तुं विपत्तये ।
तदभावे मया कार्यं प्रातरग्निप्रवेशनं ॥ २०२ ॥
तज्जीवन्ती स्वहस्तेन तुभ्यं गुणवते गृहं ।
ददामि सर्वं येन स्यां न पुनर्दुष्वभागिनी ॥ २०३ ॥
एवमुक्तवतीं धीरस्तामवादीद्विदूषकः ।
यद्येवमम्ब तर्हि त्वं मा स्म चिन्तावतीं कृथाः ॥ २०४ ॥
अहं तत्राद्य गच्छामि जीवन्तेकसुतस्तव ।
किमेनं घातयामीति कृपा ते मयि मा च भूत् ॥ २०५ ॥
सिद्धियोगाद्धि नास्त्येव भयं तत्र गतस्य मे ।
एवं विदूषकेणोक्ता ब्राह्मणी सा जगाद तं ॥ २०६ ॥
तर्हि पुण्यैर्ममायातः को ऽपि देवो भवानिह ।
तत्प्राणान्देहि नः पुत्र कुशलं च तवात्मनि ॥ २०७ ॥
एवं तया सो ऽनुमतः सायं राजसुतागृहं ।
सेनापतिनियुक्तेन किंकरेण समं ययौ ॥ २०८ ॥
तत्रापश्यद्रूपसुतां तां यौवनमदोद्धतां ।
लतामनुच्चितस्फीतपुष्पभारानतामिव ॥ २०९ ॥
ततो निशायां शयने राजपुत्र्या तयाश्रिते ।
ध्यातोपनतमाग्नेयं बिभ्रत्खड्गं करेण सः ॥ २१० ॥
वासवेश्मनि तत्रासीज्जाग्रन्नेव विदूषकः ।
पश्यामि तावत्को वृत्तिं नरानत्रेति चिन्तयन् ॥ २११ ॥
प्रसुप्ते च जने द्विप्रादपावृत्तकपाटकं ।
स द्वारदेशादायान्तं घोरं राक्षसमैक्षत ॥ २१२ ॥
स च द्वारि स्थितस्तत्र राक्षसो वासकान्तरे ।
भुक्तं नरशताकीर्णडयमदण्डं न्यवेशयत् ॥ २१३ ॥

विद्रूषकश्च चिच्छेद धावित्वा तस्य तं क्रुधा ।
एकखड्गप्रहारेण बाहुं सपदि रक्षसः ॥ २१४ ॥
छिन्नबाहुः पलाय्याशु जगाम स निशाचरः ।
भूयो नागमनायैव तत्सत्त्वोत्कर्षभीतितः ॥ २१५ ॥
प्रबुद्धा वीक्ष्य पतितं रक्षोबाहुं नृपात्मजा ।
भीता च जातहर्षा च विस्मिता च बभूव सा ॥ २१६ ॥
प्रातश्च ददृशे राज्ञा देवसेनेन तत्र सः ।
स्वसुतान्तःपुरद्वारि स्थितश्छिन्नच्युतो भुजः ॥ २१७ ॥
इतः प्रभृति नेहान्यैः प्रवेष्टव्यं नरैरिति ।
दत्तो विद्रूषकेणैव सुदीर्घः परिघार्गलः ॥ २१८ ॥
ततो दिव्यप्रभावाय तस्मै प्रीतः स पार्थिवः ।
विद्रूषकाय तनयां तां ददौ विभवोत्तरां ॥ २१९ ॥
ततस्तया समं तत्र कान्तया स विद्रूषकः ।
तस्थौ दिनानि कतिचिद्रूपवत्येव संपदा ॥ २२० ॥
एकस्मिंश्च दिने सुप्तां राजपुत्रीं विहाय तां ।
स ततः प्रययौ रात्रौ तां भद्रां प्रति सत्वरः ॥ २२१ ॥
राजपुत्री च सा प्रातस्तं ददर्श न दुष्खिता ।
आसीदाश्वासिता पित्रा तत्प्रत्यावर्तनाशया ॥ २२२ ॥
सोऽपि गच्छन्नरण्यानीः क्रमात्प्राप विद्रूषकः ।
पूर्वाम्बुधेरदूरस्थां नगरीं ताम्रलिप्तिकां ॥ २२३ ॥
तत्र चक्रे स केनापि वणिजा सह संगतिं ।
स्कन्ददासाभिधानेन पारम्ब्येर्यायासता ॥ २२४ ॥
तेनैव सह सोऽनल्पतदीयधनसंभृतं ।
यानपात्रं समारुह्य प्रतस्थेऽम्बुधिवर्त्मना ॥ २२५ ॥

ततः समुद्रमध्ये तद्यानपात्रमुपागतं ।
अकस्माद्भवद्दुःखं व्यासक्तमिव केनचित् ॥ २२६ ॥
अर्चिते ऽप्यर्णवे रत्नैर्यदा न विचचाल तद् ।
तदा स वणिगार्त्तः सन्स्कन्ददासो ऽब्रवीदिदं ॥ २२७ ॥
यो मोचयति संरुद्धमिदं प्रवहणं मम ।
तस्मै निजधनार्धं च स्वसुतां च ददाम्यहं ॥ २२८ ॥
तच्छ्रुत्वैव जगादैवं धीरचेता विदूषकः ।
अहमत्रावतीर्यात्तर्विचिनोम्यम्बुधेर्तलं ॥ २२९ ॥
क्षणाच्च मोचयाम्येतद्दुःखं प्रवहणं तव ।
यूयं चाप्यवलम्बध्वं वद्ध्वा मां पाशरज्जुभिः ॥ २३० ॥
विमुक्ते च प्रवहणे तत्क्षणं वारिमध्यतः ।
उद्धर्तव्यो ऽस्मि युष्माभिरवलम्बनरज्जुभिः ॥ २३१ ॥
तथेति तेन वणिजा तद्वचस्यभिनन्दिते ।
बबन्धुः कर्णधारास्तं रज्जुबन्धेन कक्षयोः ॥ २३२ ॥
तद्वद्धो ऽवततारैव वारिधौ स विदूषकः ।
न जातवत्सरे प्राप्ते सत्त्ववानवसीदति ॥ २३३ ॥
ध्यातोपस्थितमाग्नेयं खड्गं कृत्वा च तं करे ।
वीरः प्रवहणस्याधो मध्ये वारि विवेश सः ॥ २३४ ॥
तत्र चैकं महाकायं सुतं पुरुषमैक्षत ।
जङ्घायां तस्य रुद्धं च यानपात्रं व्यलोकयत् ॥ २३५ ॥
चिच्छेद तां स जङ्घां च तस्य खड्गेन तत्क्षणं ।
चचाल च प्रवहणं रोधमुक्तं तदैव तद् ॥ २३६ ॥
तद्दृष्ट्वैव वणिक्पापश्छेदयामास तस्य सः ।
विदूषकस्य रज्जूस्ताः प्रतिपन्नार्थलोभतः ॥ २३७ ॥

वृत्तेन चैव मुक्तेन द्रुतं प्रवहणेन सः ।
स्वलोभस्येव महतः पारमम्बुनिधेर्ययौ ॥ २३८ ॥
विद्रूषको ऽपि संछिन्नरज्ज्वालम्बो ऽम्बुमध्यगः ।
उद्गत्य तत्तथा दृष्ट्वा धीरः क्षणमचिन्तयत् ॥ २३९ ॥
किमिदं वणिजा तेन कृतं किमथ चोच्यते ।
कृतघ्ना धनलोभान्धा नोपकारेक्षणक्षमाः ॥ २४० ॥
तदेष कालः सुतरामवैक्लव्यस्य सांप्रतं ।
न हि सत्त्वावसादेन स्वल्पाप्यापद्विलङ्घ्यते ॥ २४१ ॥
इति संचिन्त्य तत्कालं जङ्घां तामारुरोह सः ।
यामत्तर्ह्यलसुतस्य पुंसस्तस्य न्यकृत्तत ॥ २४२ ॥
तया ततार नावेव हस्तन्यस्ताम्बुरम्बुधिं ।
दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनां ॥ २४३ ॥
तं मारुतिमिवाम्भोधिपारं रामार्थमागतं ।
बलवन्तमुवाचैवमन्तरिक्षात्सरस्वती ॥ २४४ ॥
साधु साधु सुसत्त्वो ऽसि को ऽन्यस्त्वत्तो विद्रूषक ।
अनेन तव धैर्येण तुष्टो ऽस्मि तदिदं शृणु ॥ २४५ ॥
प्राप्तो ऽसि नद्यविषयमिमं संप्रत्यतो ऽपि च ।
कार्कोटकाख्यं नगरं दिनैः प्राप्स्यसि सप्तभिः ॥ २४६ ॥
ततो लब्धधृतिर्गत्वा शीघ्रं प्राप्स्यसि चेप्सितं ।
अहं चाराधितः पूर्वं भवता कव्यकव्यभुग् ॥ २४७ ॥
मद्वराच्च तवेदानीं क्षुत्तृष्णा च न वर्त्स्यति ।
तद्गच्छ सिद्धौ विश्रब्धमित्युक्ता विरराम वाक् ॥ २४८ ॥
विद्रूषकश्च तच्छ्रुत्वा प्रणम्याग्निं प्रहर्षितः ।
प्रतस्थे सप्तमे चाह्नि प्राप कार्कोटकं पुरं ॥ २४९ ॥

तत्र च प्रविवेशैकं मठमार्यैरधिष्ठितं ।
नानादेशोद्भवैस्तैस्तैर्द्विजैरभ्यागतप्रियैः ॥ २५० ॥
श्रीमता निर्मितं राज्ञा तत्रत्येनार्यवर्मणा ।
सद्मं समग्रसौवर्णकुड्यदेवकुलान्वितं ॥ २५१ ॥
तत्र सर्वैः कृतातिथ्यमेकस्तं ब्राह्मणो ऽतिथिं ।
स्नानेन भोजनैर्वस्त्रैर्नीत्वा गृह्यमुपाचरत् ॥ २५२ ॥
सायं च तन्मठस्थः सन्पुरे शुश्राव तत्र सः ।
विदूषकः सपटहं घोष्यमाणमिदं वचः ॥ २५३ ॥
ब्राह्मणः क्षत्रियो वापि परिणेतुं नृपात्मजां ।
प्रातरिच्छति यः सो ऽद्य रात्रौ वसतु तद्गृहे ॥ २५४ ॥
तच्छ्रुत्वा च निमित्तं च तदाशङ्क्य स तत्क्षणं ।
गन्तुं राजसुतावासमियेष प्रियसाहसः ॥ २५५ ॥
ऊचुस्तं मठविप्रास्ते ब्रह्मन्मा साहसं कृथाः ।
तत्र राजसुतासद्म तन्मृत्योर्विवृतं मुखं ॥ २५६ ॥
यो हि तत्र प्रविशति क्षपायां न स जीवति ।
गताः सुबहवश्चैवमत्र साहसिकाः क्षयं ॥ २५७ ॥
इत्युक्तो ऽपि स तैर्विप्रैरनङ्गीकृततद्वचाः ।
विदूषको राजगृहं ययौ तत्किंकरैः सह ॥ २५८ ॥
तत्रार्यवर्मणा राज्ञा स्वयं दृष्ट्वाभिनन्दितः ।
विवेश तत्सुतावासं नक्तमर्क इवानलं ॥ २५९ ॥
ददर्श राजकन्यां च तामाकृत्यानुरागिणीं ।
नैराश्यदुष्खविधुरं पश्यन्तीं साश्रया दृशा ॥ २६० ॥
आसीच्च ज्ञाग्रदेवात्र स रात्रावबलोकयन् ।
करे कृपाणमाग्नेयं चिन्तितोपनतं दधत् ॥ २६१ ॥

अकस्माच्च महाघोरं ददर्श द्वारि राक्षसं ।
छिन्नदक्षिणबाहुत्वात्प्रसारितभुजान्तरं ॥ २६२ ॥
दृष्ट्वा व्यचिन्तयच्चासौ कस्त्वं सो ऽयं निशाचरः ।
यस्य बाहुर्मया छिन्नो नगरे पौण्ड्रवर्धने ॥ २६३ ॥
तदस्य न पुनर्बाहो प्रक्षिप्स्यामसौ हि मे ।
पलाय्य पूर्ववच्छेत्तस्मात्साधु निकृन्त्यमुं ॥ २६४ ॥
इत्यालोच्य प्रधाव्यैव केशेष्वाकृष्य तस्य सः ।
राक्षसस्य शिरश्छेत्तुं प्रारेभे स विदूषकः ॥ २६५ ॥
तत्क्षणं भीतभीतश्च तमुवाच स राक्षसः ।
मा मां वधीः सुसत्त्वस्त्वं तत्कुरुष्व कृपामिति ॥ २६६ ॥
किंनामा त्वं च केयं च तव चेष्टेति तेन सः ।
मुक्तः पृष्टश्च वीरेण पुनराह स्म राक्षसः ॥ २६७ ॥
यमदंष्ट्राभिधानस्य ममाभूतां सुते इमे ।
इयमेका तथा सा च पौण्ड्रवर्धनवर्तिनी ॥ २६८ ॥
अवीरपुरुषासङ्गाद्रक्षणीये नृपात्मजे ।
शंकराज्ञाप्रसादो हि ममाभूदयमीदृशः ॥ २६९ ॥
तत्रादौ बाहुरेकेन छिन्नो मे पौण्ड्रवर्धने ।
त्वया चाद्य जितो ऽस्मीह तत्समाप्तमिदं मम ॥ २७० ॥
तच्छ्रुत्वा स विहस्यैनं प्रत्युवाच विदूषकः ।
मयैव स भुजस्तत्र लूनस्ते पौण्ड्रवर्धने ॥ २७१ ॥
राक्षसो ऽप्यवदत्तर्हि देवांशस्त्वं न मानुषः ।
मन्ये त्वदर्थ एवाभूच्छार्वाज्ञानुग्रहः स मे ॥ २७२ ॥
तदिदानीं सुहृद्भो त्वं यदा मां च स्मरिष्यसि ।
तदाहं संनिधास्ये ते सिद्धये संकटेष्वपि ॥ २७३ ॥

एवं स राजसो मैत्र्याद्वशयित्वा विदूषकं ।
तेनाभिनन्दितवचा यमदंष्ट्रस्तिरोदधे ॥ २७४ ॥
विदूषको ऽपि सानन्दमभिनन्दितविक्रमः ।
राजपुत्र्या तया तत्र दृष्टस्तामनयद्दिशां ॥ २७५ ॥
प्रातश्च ज्ञातवृत्तान्तस्तुष्टस्तस्मै ददौ नृपः ।
विभवैः सह शौर्यैकपताकामिव तां सुतां ॥ २७६ ॥
स तया समं तत्रासीद्रात्रीः काश्चिद्विदूषकः ।
पदात्पदमनुच्चत्या लक्ष्म्येव गुणवद्धया ॥ २७७ ॥
एकदा च निशि स्वैरं ततः प्रायात्प्रियोत्सुकः ।
लब्धदिव्यरसास्वादः को हि रज्येद्रसान्तरे ॥ २७८ ॥
नगराच्च विनिर्गत्य स तं सस्मार राजसं ।
स्मृतमात्रागतं तं च जगाद रचिताञ्जलिं ॥ २७९ ॥
सिद्धक्षेत्रे प्रयातव्यमुदयाद्रौ मया सखे ।
भद्राविद्याधरीक्षेत्रोरुतस्त्वं तत्र मां नय ॥ २८० ॥
तथेत्युक्तवतस्तस्य स्कन्धमारुह्य रक्षसः ।
ययौ च स तया रात्र्या दुर्गमां षष्टियोजनीं ॥ २८१ ॥
प्रातश्च तीर्त्वा शितोदामलङ्घ्यां मानुषैर्नदीं ।
उदयाद्रेरथ प्रापत्संनिकर्षमयत्नतः ॥ २८२ ॥
अयं स पर्वतः श्रीमानुदयाख्यः पुरस्तव ।
अत्रोपरि च नास्त्येव सिद्धयाम्नि गतिर्मम ॥ २८३ ॥
इत्युक्ता राक्षसे तस्मिन्प्राप्तानुज्ञे तिरोहिते ।
दीर्घिकां स ददर्शैकां रम्यां तत्र विदूषकः ॥ २८४ ॥
वदत्याः स्वागतमिव भ्रमद्भमरगुञ्जितैः ।
तस्यास्तीरे न्यषीदच्च फुल्लपद्माननश्रियः ॥ २८५ ॥

स्त्रीणामिवात्र चापश्यत्पद्मपङ्क्तिं सुविस्तरां ।
अयं प्रियागृहे मार्गस्तवेति ब्रुवतीमिव ॥ २८५ ॥
अलङ्घ्यो ऽयं गिरिर्मर्त्यैस्तदिहैव वरं क्षणं ।
स्थितो भवामि पश्यामि कस्येयं पद्मपङ्क्तिः ॥ २८७ ॥
इति चिन्तयतस्तस्य तत्र तोयार्थमाययुः ।
गृहीतकाञ्चनघटा भव्याः सुवल्गवः स्त्रियः ॥ २८८ ॥
वारिपूरितकुम्भाश्च ताः स पप्रच्छ योषितः ।
कस्येदं नीयते तोयमिति प्रणयपेशलं ॥ २८९ ॥
आस्ते विद्याधरी भद्र भद्रा नामात्र पर्वते ।
इदं स्नानोदकं तस्या इति ताश्च तमब्रुवन् ॥ २९० ॥
चित्रं धातैव धीराणामारब्धोद्दामकर्मणां ।
परितुष्येव सामग्रीं घटयत्युपयोगिनीं ॥ २९१ ॥
यदेका सकलैव स्त्री तासां मध्यादुवाच तं ।
महाभाग मम स्कन्धे कुम्भ उत्क्षिप्यतामिति ॥ २९२ ॥
तथेति च घटे तस्याः स्कन्धोत्क्षिप्ते स बुद्धिमान् ।
निदधे भद्रया पूर्वं दत्तं रत्नाङ्गुलीयकं ॥ २९३ ॥
उपाविशच्च तत्रैव स पुनर्दीर्घिकातटे ।
ताश्च तज्जलमादाय ययुर्भद्रागृहं स्त्रियः ॥ २९४ ॥
तत्र तासिश्च भद्राया यावत्स्नानाम्बु दीयते ।
तावत्तस्यास्तदुत्सङ्गे निपपाताङ्गुलीयकं ॥ २९५ ॥
तद्दृष्ट्वा प्रत्यभिज्ञाय भद्रा पप्रच्छ ताः सखीः ।
दृष्टः किं को ऽपि युष्माभिरित्थापूर्वः पुमानिति ॥ २९६ ॥
दृष्ट एको युवास्माभिर्मानुषो वापिकातटे ।
तेनोत्क्षिप्तो घटश्चायमिति प्रत्यब्रुवंश्च ताः ॥ २९७ ॥

ततो भद्राब्रवीच्छीघ्रं प्रक्षालस्नानमण्डनं ।
इहानयत गत्वा तं स हि भर्ता समागतः ॥ २९८ ॥
इत्युक्ते भद्रया गत्वा यथावत्तु निवेद्य च ।
स्नातश्च तद्वयस्याभिस्तत्रानिन्ये विदूषकः ॥ २९९ ॥
प्राप्तश्च स ददर्शात्र भद्रां मार्गोन्मुखीं चिरात् ।
निःसत्त्वतरोः साक्षात्पद्मामिव फलश्रियं ॥ ३०० ॥
सापि दृष्ट्वा तमुत्थाय हर्षबाष्पाम्बुशीकरैः ।
दत्तार्घेव ववन्धास्य कण्ठे भुजलतास्रजं ॥ ३०१ ॥
परस्परालिङ्गितयोस्तयोः स्वेदच्छलादिव ।
अतिपीडनतः स्नेहः सस्यन्दे चिरसंभृतः ॥ ३०२ ॥
अथोपविष्टावन्योऽन्यमवितृप्तौ विलोकने ।
उभौ शतगुणीभूतामिवोत्कण्ठामुदूहतुः ॥ ३०३ ॥
आगतोऽसि कथं भूमिमिमामिति च भद्रया ।
परिपृष्टः स तत्कालमुवाचेदं विदूषकः ॥ ३०४ ॥
समालम्ब्य भवत्स्नेहमारुह्य प्राणसंशयान् ।
सुवङ्कनागतोऽस्मीह किमन्यद्वच्मि सुन्दरि ॥ ३०५ ॥
तच्छ्रुत्वा तस्य दृष्ट्वा तामनपेक्षितजीवितां ।
प्रीतिं कष्टागतं स्नेहात्सा भद्रा तमभाषत ॥ ३०६ ॥
आर्यपुत्र न मे कार्यं साध्वीभिर्न च सिद्धिभिः ।
त्वं मे प्राणो गुणैः क्रीता दासी चाहं तव प्रभो ॥ ३०७ ॥
विदूषकस्ततोऽवादीत्तर्ह्यागच्छ मया सह ।
मुक्त्वा दिव्यमिमं भोगं वस्तुमुज्जयिनीं प्रिये ॥ ३०८ ॥
तथेति प्रतिपेदे सा भद्रा सपदि तद्वचः ।
तत्संकल्पपरिभ्रष्टा विद्याश्च तृणवल्लघ्वीः ॥ ३०९ ॥

ततस्तया समं तत्र स विशश्राम तां निशां ।
कृतोपचारस्तत्साध्या योगेश्वर्या विदूषकः ॥ ३१० ॥
प्रातश्च भद्रया साकमवतीर्योदयाद्रितः ।
सस्मार यमदंष्ट्रं तं राक्षसं स पुनः कृती ॥ ३११ ॥
स्मृतमात्रागतस्योक्ता गत्वाधक्रमं निजं ।
तस्यारुरोह स स्कन्धे भद्रामारोप्य तां पुरः ॥ ३१२ ॥
सापि सेहे तदत्युग्रराक्षसांशाधिरोपणं ।
अनुरागपरायत्ताः कुर्वते किं न योषितः ॥ ३१३ ॥
रक्षोऽधिरूढश्च ततः स प्रतस्थे प्रियासखः ।
विदूषकः पुनः प्राप तच्च कार्कोटकं पुरं ॥ ३१४ ॥
रक्षोदर्शनसत्रासं तत्र चालोकितो जनैः ।
दृष्ट्वार्यवर्मनृपतिं स्वां भार्यां मार्गति स्म सः ॥ ३१५ ॥
दत्तां तेन गृहीत्वा च तत्सुतां तां भुजार्जितां ।
तथैव राक्षसारूढः स प्रतस्थे पुरात्ततः ॥ ३१६ ॥
गत्वाम्बुधेस्तटे प्राप पापं तं वणिजं च सः ।
येनास्य वारिधौ पूर्वं छिन्नाः क्षिप्तस्य रज्जवः ॥ ३१७ ॥
जघार तस्य च सुतां वणिजः स धनैः सह ।
प्रागम्बुधिप्रवहणप्रमोचनपणार्जितां ॥ ३१८ ॥
धनापहारमेवास्य वधं मेने सपाप्मनः ।
कदर्याणां परे प्राणाः प्रायेण ह्यर्थसंचयाः ॥ ३१९ ॥
ततो रक्षोरथारूढस्तामादाय वणिक्सुतां ।
स भद्रारात्नपुत्रीभ्यां सहैवोदपतद्नभः ॥ ३२० ॥
दर्शयन्निजकान्तानां द्युमार्गेण ततार च ।
विलसत्सत्त्वसंरम्भं स्वपौरुषमिवाम्बुधिं ॥ ३२१ ॥

प्राप तच्च स भूयो ऽपि नगरं पौण्ड्रवर्धनं ।
दृष्टः सविस्मयं सर्वैर्वाल्पनीकृतराक्षसः ॥ ३२२ ॥
तत्र तां देवसेनस्य सुतां राज्ञश्चिरोत्सुकां ।
भार्यां संभावयामास राक्षसावन्नयान्वितां ॥ ३२३ ।
रुध्यमानो ऽपि तत्पित्रा स स्वदेशसमुत्सुकः ।
